ISSN– 2320–5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य संस्कृताध्ययनविभागस्य
शोधपत्रिका)

## द्वितीयः अङ्कः

उपदेष्टा

**स्वामी आत्मप्रियानन्दः**

सम्पादकमण्डली

राकेशदाशः
वेङ्कटरमणभट्टः
गोपीकृष्णन् रघुः
नागराजभट्टः

संस्कृतविभागः
रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयः
वेलुडमठम्

प्रज्ञालोकः
(संस्कृताध्ययनविभागस्य शोधपत्रिका)
*Prajñāloka*
(Research Journal of Department of Sanskrit Studies)

ISSN– 2320–5911

सम्पादकमण्डली–
राकेशदाशः वेङ्कटरमणभट्टः
गोपीकृष्णन् रघुः
नागराजभट्टः
Board of Editors–
Rakesh Das
Venkataramana Bhat
Gopikrishnan Reghu
Nagaraja Bhat

प्रकाशकः– स्वामी दुर्गानन्दः
कुलसचिवः
रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु
Publisher– Swami Durgananda
Registrar
Ramakrishna Mission Vivekananda University
Belur Math, Howrah, West Bengal

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्– २०१४
Year of Publishing– 2014

मूल्यम्– ₹ ५०/-
Price– ₹ 50/-

Powered by LaTeX 2ε

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
|---|---|---|
| १. | निवेदनम् | 1 |
| २. | Foreword<br>Swami Atmapriyananda | 2 |
| ३. | सामगानस्य स्वरविषये किञ्चिद् विचारणम्<br>सौगतमुखर्जी | 5 |
| ४. | मारुतेर्वाक्कौशलम्<br>ब्रह्मचारी भूदेवचैतन्यः | 15 |
| ५. | सुषुप्तौ अविद्या : उपनिषन्मतसमीक्षणम्<br>पलाश-घोडइः | 24 |
| ६. | समासतत्त्वविमर्शः<br>सुव्रतमण्डलः | 36 |
| ७. | न्यायनये अपवर्गस्वरूपम्<br>हाराधननगराइः | 50 |
| ८. | न्यायनये कारणस्वरूपविवेकः<br>ईश्वर-आखुलिः | 62 |
| ९. | अप्रमोपजीव्या अलङ्काराः<br>विप्लवचक्रवर्ती | 83 |
| १०. | जगन्नाथोत्तरकालिकं संस्कृतालङ्कारशास्त्रम्<br>शुभ्रजित्सेनः | 90 |

१९. भारतीयकाव्यव्याकरणशास्त्रयोः लक्षणास्वरूपविचारः 111
शम्पापालः

१२. संस्कृतस्तोत्रसाहित्ये ब्रह्मचारिणो मेधाचैतन्यस्य योगदानम् 119
नारायणदाशः

१३. सुरभारतीसुधापिपासुः स्वामिविवेकानन्दः 124
पीताम्बरनिराला

२०. Dreaming In *Vaiśeṣika* Philosophy 133
Devalina Saikia

२१. *Vibhakti* Divergence Between Sanskrit and Bengali 143
Rakesh Das

# निवेदनम्

प्राचीनभारतीयज्ञानशेवधिसम्पदो वाङ्मयस्य योगक्षेमं कर्तव्यत्वेन निश्चित्य रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य संस्कृतविभागेन वर्षात् पूर्वं जगति प्रज्ञालोकप्रसारणाय प्रज्ञालोकनाम्नी पत्रिका समारब्धा। अध्ययनाध्यापनाभ्यां यज् ज्ञानं परिनिष्ठितरूपतामेति तस्य नव्येन प्रकारेण समाजोपयोगितया प्रकटीकरणं शोधस्य लक्षणं चेत् तादृशशोधस्य प्रकाशनेन प्रज्ञावतां संस्कृतवाङ्मयविदुषां समुल्लासाय येयं पत्रिका समारब्धा सा द्वितीये वर्षे पदं निधत्ते।

अस्मिन्नङ्के प्राच्यनूत्नविदुषां लेखानां समन्वयो नितरां हर्षमावहति। अत्र हि, वेद-वेदान्ते-तिहास-व्याकरण-न्याय-वैशेषिकाऽ-लङ्कारशास्त्र-साहित्यादिप्राचीनविषयेषु इव विवेकानन्दाऽ-धुनिकसाहित्य-सहजभाषाविश्लेषणा-दिनव्यविषयेषु अपि निबन्धान् प्रकाश्य मोमुदीति नश्चेतः।

अस्मिन् कर्मणि अस्मान् प्रेरितवतः कुलपतीन् वयं सश्रद्धं स्मरामः। एवं प्रकाशकेभ्यः कुलसचिवेभ्यः अन्येभ्यश्च हार्दं कार्तज्ञं निवेदयामः। केषाञ्चन लेखानां परिष्कारे सहायं कृतवन्तं विश्वविद्यालयच्छात्रं पलाशं सबहुमानं स्मरामः। निबन्धप्रदातॄन् अपि वयं हृदयाद् अभिनन्दामः।

प्रज्ञालोकस्येयं सारस्वती धारा निरवच्छिन्ना भवतादिति सम्प्रार्थये भगवन्तम् , अनुरुन्ध्महे च विदुषः काले वैदुष्यवैदग्ध्यसम्पादितान् प्रबन्धान् सम्प्रेष्य कृतार्थयन्तु न इति

सम्पादकाः

RAMAKRISHNA MISSION VIVEKANANDA UNIVERSITY
(Declared by Government of India under Section 3 of UGC Act, 1956)
PO Belur Math, Dist Howrah 711202, West Bengal, India

# Foreword

Swami Vivekananda prophesied that the religion and philosophy of *Vedānta* will be the future religion of rational and thinking humanity. The reason for this bold assertion by this Prophet and Seer (*ṛṣi*) of the modern age was born of a deep conviction that *Vedāntic* doctrine of the *Ātman*, the immortal Spirit in all beings, is the most universal and life-giving message that the world is longing for. During his extensive travels all over the world, Swami Vivekananda could see how the peoples everywhere, no matter what their nationality, religion, creed, language or gender was, were all thirsting to have a 'sip of that nectar', that elevating and life-giving message of the immortality of the *Ātman*, the Spirit, that is at once transcendent and immanent, the omniscient, omnipresent, omnipotent, whom 'the sword cannot cut, fire cannot burn, waters cannot wet, air cannot dry', the eternally pure, eternally awakened, eternally free *(nitya-śuddha-buddha-mukta)*. This message of *Vedānta* is the inheritance of the whole of humankind and is the only basis for the new age of 'spiritual globalization', that world-wide-web (www) that can unite the whole world in one net of Love and Equality (*prema* and *samatva*). Swami Vivekananda therefore wanted that this message of *Vedānta* should be broadcast in simple language to all like— scholars and the so-called uneducated, women and children, rich and the poor, stationed anywhere in the world and in any position of life. For this truth of the immortal Self, the *Ātman*, transcends the limitations of time, space and causation, cuts boldly across any division and is the one golden thread

unifying all in a web of universal love and infinite compassion.

Further, Swami Vivekananda wanted these grand *Vedāntic* truths embedded in the ancient scriptures of India, the *Upaniṣads* and *Gītā* in particular, to be made intensely practical in everyday life. He emphasized that these great *Vedāntic* truths should be put in actual practice in society to build up a strong and vigorous, morally and spiritually powerful nation wherein men and women will stand tall and bold on the rock of their impeccable character imbued with realization of the immortal Spirit or *Ātman*.

Swamiji wanted that the grand truths in our ancient scriptures, particularly *Vedānta* and *Yoga*, should be actualized in the daily lives of every Indian in order that a powerful India—spiritually advanced, morally elevated, economically strong—may be built on the bedrock of ancient Indian spiritual wisdom blended harmoniously with the modern scientific knowledge. He in fact envisioned that Belur Math itself would one day bloom into a full-fledged University, an all-round temple of learning *(Vidyāmandira)*, wherein will be combined the best elements of the East and the West. He wanted to create machinery that would "bring to the door of everybody what our ancients thought about the most momentous questions of life". Swami Vivekananda's genius for synthesis and harmony has been succinctly put by Romain Rolland in his famous biography of Swamiji in the following telling words: "In the two words 'equilibrium' and 'synthesis', the whole of Vivekananda's constructive genius may be summed up." Swamiji's vision in regard harmonizing and synthesizing the vast body of knowledge in our ancient system of *Vedānta* and *Yoga* could best grasped by quoting his own powerful words: "The dry, abstract *Advaita* must become living—poetic—in everyday life; out of hopelessly intricate mythology must come concrete moral forms; and out of bewil-

dering Yogi-ism must come the most scientific and practical psychology—and all this must be put in a form so that a child may grasp it. That is my life's work.” (Swami Vivekananda’s Complete Works, Vol.5, p.104).

Our humble effort in this direction, mainly to inspire young scholars, is this annual journal *Prajñāloka*, literally meaning Light of *Prajñā* (higher intuitive intelligence), wherein we publish original articles and papers by various scholars drawn from all over India on themes having a bearing on ancient Indian wisdom of *Vedānta* and *Yoga* and on how these truths could become transforming forces in the modern age to rejuvenate and awaken India, to rebuild a strong nation based on the eternal values of purity, truthfulness, selflessness, universal love and all-encompassing compassion. We are grateful to our dedicated team of faculty members, students and other scholars for their untiring effort to enable this publication see the light of day on this sacred occasion of the Foundation Day of Swamiji’s University and sanctified by him as his day of *mahāsamādhi* (4th of July) on which day he threw away his mortal body saying: “It may be that I may think it best to get out of this body and throw it off as a worn out garment, but I shall not cease to work. I shall inspire men and women everywhere until the world shall know that it is one with God.” We firmly believe that his living force and power, albeit invisible, are still with us inspiring and elevating us always.



Belur Math
13 June 2014
(Sacred day of *Jagannātha's Snānayātrā*)

Swami Atmapriyananda
Vice Chancellor

# सामगानस्य स्वरविषये किञ्चिद् विचारणम्

## सौगतमुखर्जी*

**०.भूमिका–** अखिलधर्ममूलत्वेन गीयमानो वेदस्तावद् गद्यपद्यगीत्यात्मकेन त्रिविध इति जैमिनीयशास्त्रे प्रख्यापितम्। तत्र गीत्यात्मको वेदः सामाख्य इत्युच्यते। यथा– "गीतिषु सामाख्या"[1] इति। वस्तुतः, सामवेद ऋषीणां गीतिमयानुभूतिस्वरूपः। ते महर्षयो ब्रह्मानन्दानुभूतेरेव सामानि गीतवन्तः। यथाम्नायते तैत्तिरीयोपनिषदि– "एतमानन्दमयमात्मानमुपसङ्क्रम्य। इमाँल्लोकान् कामान्नी कामरूप्यनुसञ्चरन्। एतत्साम गायन्नास्ते हावु३ हावु३ हावु३"[2] इति। तच्च गानं स्वराश्रयमेव। तर्ह्यत्र स्वराणां गुरुत्वमधिकतरमेव। यथाम्नातम्- "का साम्नो गतिरिति? स्वर इति होवाच"[3] इति। अधुना तस्यैव गानस्य स्वरविषये किञ्चिदालोच्यते।

**१.स्वरविवरणी–** सामगाने सप्त स्वरा भवन्ति। यथा– क्रुष्टः, प्रथमः, द्वितीयः, तृतीयः, चतुर्थः, मन्द्रः, अतिस्वार्यश्चेति। नारदीयशिक्षायामेषां स्वराणां नामान्युल्लिखितानि सन्ति–

प्रथमश्च द्वितीयश्च तृतीयोऽथ चतुर्थकः।
मन्द्रः क्रुष्टो ह्यतिस्वार एतान् कुर्वन्ति सामगाः॥ [4]इति।

सायणाचार्येणापि सामवेदभाष्यभूमिकायां स्वराणां नामान्युल्लिखितानि। परन्तु, तत्र भिन्ननाम्ना केषाञ्चित् स्वराणामुल्लेखोऽस्ति। यथा- "क्रुष्टः प्रथमो द्वितीयस्तृतीयश्चतुर्थः पञ्चमः षष्ठश्चेत्येते सप्त स्वराः"[5] इति। अत्र यद्यपि क्रुष्टतश्चतुर्थस्वरं यावत् स्वराणां नामसादृश्यात् परिचयविषये नास्ति संशयावकाशस्तथाप्युत्तरवर्तिनोः स्वरयोर्नामवैसादृश्याद् अस्ति प्रभूतः संशयावकाशः। शिक्षाग्रन्थे येन क्रमेण स्वराणामुल्लेखोऽस्ति तेन यथासङ्ख्यन्यायो

---

*अध्यापकः, संस्कृतविभागे, वर्धमानविश्वविद्यालयस्य पश्चिमवङ्गस्थस्य

[1]पूर्वमीमांसासूत्रम् २/१/३६

[2]तैत्तिरीयोपनिषद् ३/१०/५

[3]छान्दोग्योपनिषद् १/८/५

[4]नारदीयशिक्षा १/१/१२

[5]सायणकृता भाष्यभूमिका,पृ. ६८

यद्यपि प्रयोक्तुं नार्हति, तथापि पारिशेष्यन्यायेनात्र मन्द्रा-तिस्वार्ययोरेव यथाक्रमं पञ्चमषष्ठसंज्ञाद्वयम्। सायणोऽप्यन्यत्रोक्तवान्– "मन्द्रोऽवरेषां मध्ये पञ्चमः स्वरः। अतिस्वार्यः षष्ठः"[६]इति। शिक्षाग्रन्थेऽपि मानवशरीरे स्वराणामवस्थानविषये स्वराणां यः क्रम उपदिष्टस्तेन चापीदमेव वचनमवतिष्ठते। परन्तु, बृहद्देवतायाम्– "यस्तु सामस्वरः षष्ठः स सौम्यो मन्द्र उच्यते"[७] इत्युक्तत्वात् पुनरप्यनयोः स्वरयोः परिचयविषये संशयो जायते। तथा च शिक्षाग्रन्थेऽपि लौकिकस्वरैः सह वैदिकानां स्वराणां सामञ्जस्यस्थापनाकाले मन्द्रातिस्वार्यक्रुष्टानां स्वनामधेयता नास्ति। तत्र तेषां स्थले पञ्चमषष्ठसप्तमेत्युल्लिखितम्। यथा–

यः सामगानां प्रथमः स वेणोर्मध्यमः स्वरः।
यो द्वितीयः स गान्धारस्तृतीयस्त्वृषभः स्मृतः॥
चतुर्थः षड्ज इत्याहुः पञ्चमो धैवतो भवेत्।
षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः॥[८] इति।

अनेन कस्य वा स्वरस्य किं नामधेयमस्ति तद्विषये काचिद् विभ्रान्तिर्जायते। परन्तु, शिक्षाग्रन्थे गात्रवीणाप्रसङ्गे स्वराणां गणनाद्वारेण चतुर्थादुत्तरं मन्द्रस्य, तदुत्तरं त्वतिस्वार्यस्य समुल्लेखोऽस्ति। यथा–

क्रुष्टस्य मूर्धनि स्थानं ललाटे प्रथमस्य तु।
भ्रुवोर्मध्ये द्वितीयस्य तृतीयस्य तु कर्णयोः॥
कण्ठस्थानं चतुर्थस्य मन्द्रस्योरसि तूच्यते।
अतिस्वारस्य नीचस्य हृदिस्थानं विधीयते॥[९] इति।

तर्हि, मन्द्रस्य पञ्चमाङ्कभाक्त्वम्, अतिस्वार्यस्य षष्ठाङ्कभाक्त्वं निर्दिष्टमिति सिद्धान्तितम्। तथा च, पारिशेष्यन्यायात् क्रुष्टस्य सप्तमत्वमिति। वैदिकाः स्वरास्तेषां नामानुक्रमेणैव सङ्ख्याङ्कद्वारेण गानग्रन्थेषूपदिश्यन्ते। यथा– प्रथमः स्वरः-"१", द्वितीयः स्वरः-"२", तृतीयः स्वरः-"३", चतुर्थः स्वरः-"४", मन्द्रः स्वरः-"५", अतिस्वार्यः-"६" इति। परन्तु, क्रुष्टस्य कृते सप्तमसङ्ख्याङ्कः न व्यवस्थापितः। तत्र "११" इत्यनेन क्रुष्टस्योल्लेखो भवति॥ परन्तु, बृहद्देश्या

[६]सायणभाष्यम् ,सामविधानब्राह्मणम्-१/१/१४

[७]बृहद्देवता-८/११९

[८]नारदीयशिक्षा १/५/१

[९]नारदीयशिक्षा-१/७/१-२

वचनस्यार्थो न सुस्पष्टतां याति। तत्र क्रुष्टव्यतिरिक्ता अपि सप्त स्वराः परिगणिताः सन्ति। तथा च, मन्द्रस्य विकर्षेणातिस्वारस्योपलब्धिरिति कथितमस्ति[१०]।

**२.वैदिकस्वरक्रमोपदेशनम्–** नारदीयशिक्षायां वैदिकस्वराणां लौकिकस्वरैः सह साम्यं प्रख्यापितम्। तत्र यथा लौकिकस्वराणां कीर्तनमस्ति तेन वैदिकाः स्वरा अवरोहक्रमिण इति लभ्यते। अर्थात् , लौकिकस्य मध्यमस्थानस्य मध्यमे समुत्पद्य वैदिकाः स्वरा मन्द्रस्थानस्य पञ्चमे विरमन्ते। तेन प्रथमस्वरस्य प्राथम्यं, क्रुष्टस्य त्वन्तिमत्वम्। परन्तु, पूर्वोल्लिखिते मानवदेहे स्वराणामवस्थानविषये क्रुष्टस्यैव प्राथम्यम्। तथा गात्रवीणाप्रसङ्गेऽन्यत्रापि–

अङ्गुष्ठस्योत्तमे क्रुष्टोऽङ्गुष्ठे प्रथमः स्वरः।
प्रदेशिन्यां तु गान्धार ऋषभस्तदनन्तरम्॥
अनामिकायां षड्जस्तु कनिष्ठिकायां च धैवतः।
तस्याधस्ताच्च योऽन्यस्तु निषादं तत्र विन्यसेत्॥[११] इति।

तैत्तिरीयप्रातिशाख्यस्य "तेषां दीप्तिज्ञोपलब्धिः"[१२] इति सूत्रस्य व्याख्यानप्रसङ्गे त्रिभाष्यरत्न उक्तम्– "तेषां खलु सप्तयमानामुत्तरोत्तरदीप्तिजा पूर्वपूर्वोपलब्धिः स्यात्। कथम्? अतिस्वार्यदीप्तिजा मन्द्रोपलब्धिः; मन्द्राच्चतुर्थोपलब्धिः; चतुर्थात्तृतीयः; तृतीयाद् द्वितीयः; द्वितीयात् प्रथमः; प्रथमात् कृष्ट उपलभ्यते"[१३] इति। तत्रैव वैदिकाभरणेऽप्युक्तम्– "ततश्च तृतीयाख्यान्मध्यमस्वरादायामादिभिरुत्क्षेपकारणैः किञ्चिदुत्क्षिप्तो द्वितीयाख्यः स्वरः। उत्क्षिप्ततरः प्रथमाख्यः। उत्क्षिप्ततमः क्रुष्टाख्यः"[१४] इति। एतेनायमेव विषयः स्पष्टो यत् , क्रुष्टः प्रथमस्वरादप्युच्चतरः स्वर एवेति।

वङ्गीयः सङ्गीतशास्त्रज्ञो राज्येश्वरमित्रमहोदयोऽपि प्रथमस्वरात् कर्षणद्वारेणोच्चः स्वरः क्रुष्ट इति निर्णीतवान्[१५]। तदेव चेत् , प्रथमस्वरस्य प्राथम्ये तत्र को हेतुः स्यात्? वस्तुतः, सामगाने क्रुष्टाख्यः स्वरोऽत्यन्तं स्वल्पमेव श्रूयते। पुष्पसूत्रमते गानद्वये मात्रं तस्य श्रवणं जायते। यथोक्तम्–

---

[१०]बृहद्देशी ८/११२-१२४

[११]नारदीयशिक्षा १/७/३-४

[१२]तैत्तिरीयप्रातिशाख्यम् २३/१३

[१३]तैत्तिरीयप्रातिशाख्यस्य त्रिभाष्यरत्नं २३/१३

[१४]तैत्तिरीयप्रातिशाख्यस्य वैदिकाभरणम् २३/१३

[१५]मित्रः पृ.-१२

पञ्चस्वेव तु गायन्ति भूयिष्ठानि स्वरेषु तु।
सामानि षड्सु चान्यानि सप्तसु द्वे तु कौथुमाः॥[१६] इति।

अर्थात्, सामद्वय एव सप्तानां स्वराणां व्यवहारोऽस्ति; अन्यत्र पञ्च वा षड् वा स्वरा व्यवह्रियन्ते। तत्रैव सामद्वये क्रुष्टस्य व्यवहारोऽस्ति। यथा– आत्रे साम्नि[१७] वारद्वयम् "११ऊ" इति। तथा काश्यपव्रतसाम्नि[१८] चापि वारद्वयम् "११ऊऽ-२" इति। अन्यत्र क्रुष्टस्य व्यवहारो दुर्लभः। तस्मात्, अन्येषां स्वराणां मध्ये प्रथमाख्यस्य स्वरस्य प्राधान्यहेतोरस्यैवमेव नामधेयम्। सायणाचार्योऽपि "योऽवरेषां प्रथमस्तं मनुष्याः..."[१९] इति ब्राह्मणश्रुतिव्याख्यान उक्तवान्– "यश्चावरेषामवशिष्टानां षण्णां मध्ये प्रथमो मुख्योऽस्ति, तं मनुष्या उपजीवन्ति..."[२०] इति। परन्तु, राज्येश्वरमित्रमहोदयस्य मतेन क्रुष्टोऽनिर्दिष्टः स्वरः। स न स्वरक्रमस्यादौ प्रयोक्तुमर्हः। तस्मात्, तस्य स्वरोपदेशनस्यान्ते कीर्तनम्; प्रथमस्य त्वादाविति। परन्तु, आचार्याणां मतसमीक्षणेन नेदं मतं ग्रहणीयं प्रतिभाति। सर्व आचार्याः सक्रुष्टान् सामस्वरान् पृथक् पृथक् सप्त यमानाह। यथा तैत्तिरीयप्रातिशाख्ये– "मन्द्रादिषु त्रिषु स्थानेषु सप्त सप्त यमाः। कृष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वार्याः"[२१] इति। तथा च, भरतस्वामी– "क्रुष्टादयः स्वरा यमा उच्यन्ते"[२२] इति।

सायणोऽपि "क्रुष्टादय एवात्र यमा उच्यन्ते"[२३] इत्युक्तवान्। तथा चान्यत्रापि सायणेनैवोच्यते "ये यमा इत्युक्ताः सप्त ते स्वराः षड्जादयः। पृथग्वा क्रुष्टादयः षड्जादिभ्योऽन्ये वा बोद्धव्या इति"[२४] इति। अर्थात्, नायं स्वरोऽवान्तरः न च विकृतः; परन्तु, स्वरोऽयं स्वतन्त्र एव। पङ्कजमालाशर्ममहोदयाऽत्र

[१६]पुष्पसूत्रम् ९/२/५-६

[१७]ग्रामगेयम्-२८४/२

[१८]आरण्यकम्-१४१/१

[१९]सामविधानब्राह्मणम् १/१/८

[२०]तत्रैव सायणभाष्यम्

[२१]तैत्तिरीयप्रातिशाख्यम् २३/११-१२। अत्र कृष्टशब्देन क्रुष्ट एव बोध्यः।

[२२]सामविधानब्राह्मणस्य भरतस्वामिभाष्यम् १/१/८

[२३]तत्रैव सायणभाष्यम् १/१/८

[२४]तत्रैव सायणभाष्यम् १/१/८। मूलस्तु "सप्तस्वरा ये यमास्ते पृथग्वा" इति ऋक्प्रातिशाख्यवचनम्(१३/१७)।

पराञ्जपेमहोदयस्य मतमुल्लिख्य वदति, सामगाने प्रथमतः षण्णामेव स्वराणां व्यवहार आसीत्। उत्तरकाले क्रुष्टाख्यस्य स्वरस्य संयोजना समजनि। तस्य स्वरस्य स्वरक्रमस्यादौ व्यवस्थापनञ्चापि समभवदिति[२५]। अस्मादेव कारणात् क्रुष्टस्य कृते सप्तमसङ्ख्याङ्को न गृह्यत इति मन्यामहे। प्रथमादपि स्वरादुच्चः स्वर इति बोधे तस्य कृते प्रथमाङ्कद्वयम्– "११" इति व्यवह्रियते।

क्रुष्टस्योत्तरकालोत्पत्तिविषये पङ्कजमालाशर्ममहोदया यदुक्तवती तदपि युक्ततरं मन्ये। वस्तुतोऽयं स्वरः कौथुमशाखायामेव गीयते। इयञ्चापि शाखा जैमिनीयप्रभृतिभ्य उत्तरकालीनेति वाय्वादिषु पुराणेषु प्रख्यापितम्[२६]। तर्ह्ययं स्वरः पूर्वमासीत्, परं विलुप्तोऽभवदिति कल्पनाद् युक्ततरं भवत्यस्योत्तरोत्पत्तिकल्पनम्।

अत्र मन्द्रातिस्वार्ययोर्विषये चापि किञ्चिच्चिन्तनीयमस्ति। शिक्षावचने यदा लौकिकैः स्वरैः सह साम्यता प्रतिपाद्यते, तदा मन्द्रस्य धैवतरूपत्वम्, अतिस्वार्यस्य तु निषादरूपत्वमस्ति। तेन वैदिकस्वरक्रमस्यावरोहित्वे कश्चन क्रमभङ्गो दृश्यते। राज्येश्वरमित्रमहोदयो वैदिकस्वरक्रमस्येदृशमनार्जवं समर्थयामास[२७]। परन्तु, स्वरक्रमोपदेश ईदृशी वक्रता कथं ख्याप्यते, तन्न परिष्कृतम्। अन्यतः, वैदिकस्वरक्रमस्यार्जवे बहुविधं समर्थनमुपलभ्यते। यथा–

१) त्रिभाष्यरत्ने स्वरक्रमस्यार्जवस्य विवरणमस्ति– "अतिस्वार्यदीप्तिजा मन्द्रोपलब्धिः; मन्द्राच्चतुर्थोपलब्धिः; चतुर्थात्तृतीयः; तृतीयाद् द्वितीयः; द्वितीयात् प्रथमः; प्रथमात् कृष्ट उपलभ्यते"[२८] इति। वैदिकाभरणेऽप्येवम्– "ततश्च तृतीयाख्यान्मध्यमस्वरादायामादिभिरुत्क्षेपकारणैः किञ्चिदुत्क्षिप्तो द्वितीयाख्यः स्वरः। उत्क्षिप्ततरः प्रथमाख्यः। उत्क्षिप्ततमः क्रुष्टाख्यः। एतेन चतुर्थादीनां परेषां त्रयाणां स्वराणामवक्षेपित्वमपि दर्शितं भवति। तत्र मध्यमात्तृतीयात्स्वरादन्ववसर्गादिभिरवक्षेपकारणैः किञ्चिदवक्षिप्तश्चतुर्थस्वरः, अवक्षिप्ततरो मन्द्राख्यः, अवक्षिप्ततमोऽतिस्वार्याख्यः..."[२९]इति।

---

[२५]शर्मा पृ.-३८७।

[२६]वायुपुराणे ६१/२७अत उत्तरेऽपि श्लोकाः। विष्णुपुराणे ३/६/२अत उत्तरेऽपि श्लोकाः।

[२७]मित्रः, राज्येश्वरः, वैदिक ऐतिह्ये सामगान, पृ. १७

[२८]पादटीका१२ द्रष्टव्या।

[२९]तैत्तिरीयप्रातिशाख्यस्य वैदिकाभरणम् २३/१३

२) शिक्षाग्रन्थेऽतिस्वार्यस्य नामकरणहेतुत्वेन यदुक्तं तदपि, तस्य स्वरस्य सर्वापेक्षं नीचैष्ट्वं प्रख्यापयति। यथा– “मन्द्रो हीनो हि भूतस्तु परिस्वार इति स्मृतः”[३०]इति। अर्थात्, सर्वान् स्वरानतिक्रम्य मन्द्रादपि हीनतया स्थितो यः स्वरः स एव परिस्वारोऽतिस्वारो वेति।

३) उदूहलक्षणेनापि स्वरक्रमस्यार्जवं स्वीक्रियेत। प्रकृतिगाने चतुर्थ-मन्द्रातिस्वार्येषु गीतस्य गानस्योत्तरगाने यथाक्रमं प्रथमद्वितीय-तृतीयस्वरेषु गानमुदूहशब्दाभिधेयम्। यथोक्तं पुष्पसूत्रे– “यथैतच्चतुर्थमन्द्रातिस्वाराणां द्यन्तरमुच्चमुदूहः”[३१] इति। अत्र यदि स्वरसंवादोऽपेक्षते तर्हि मन्द्रादतिस्वार्यस्य नीचैष्ट्वमवश्यं स्वीकरणीयमेव; यतः, द्वितीयात् तृतीयस्वरस्य नीचैष्ट्वं सुप्रसिद्धमेव।

४) मानवदेहे स्वराणामवस्थानवर्णनकालेऽतिस्वारमतिनीचमाह नारदीय-शिक्षायाम्– “अतिस्वारस्य नीचस्य हृदिस्थानं विधीयते”[३२] इति। यदि तत्रातिस्वारस्य निषादत्वं मन्द्रस्य च धैवतत्वं भवति, तर्ह्यस्यातिस्वारस्य नीचत्वं न स्यात्।

५) शिक्षायां मन्द्रस्यापि दीप्ताश्रुतौ गानं परिकल्पितमस्ति। मन्द्रो यदि निषादरुपी भवति, तर्हि तस्य गानं दीप्ताश्रुतौ भवति। एतेन वैदिकस्वरक्रमस्यार्जवं पुनरपि प्रतिपाद्यते खलु।

तर्हि, केचन गवेषका नारदीयशिक्षायाः “पञ्चमो धैवतो भवेत्। षष्ठो निषादो विज्ञेयः”[३३] इत्ययं पाठो भ्रान्त इति मन्यन्ते। परन्तु, राज्येश्वरमित्रमहोदयस्य वक्रस्वरक्रमस्वीकारे को हेतुरिति? वस्तुतः, साम्नां गानकाले पञ्चमस्वरस्थाने यदि धैवतो गीयते, अतिस्वारस्थाने चापि निषादो गीयते, तर्ह्यधिकतरं श्रुतिरोचकं भवति। मन्येऽस्मादेव कारणाद् राज्येश्वरमित्रमहोदय इमां स्वरक्रमवक्रतां स्वीकरोति। परन्तु, गानकाले स्वराणां क्रमभङ्गेन श्रुतिमाधुर्योत्पादनं स्वतन्त्रो व्यापारः; स्वरक्रमस्तु पृथगेव। सामगानेऽपि बहुत्रैवैवं स्वराणां भिन्नक्रमेण विन्यासेन श्रुतिमाधुर्योत्पादनप्रचेष्टा कृता। परन्तु, तत्कारणात् स्वरक्रमस्य वक्रता न सम्पर्किता। तथैवात्रापि धैवतनिषादयोः क्रमभङ्गेन न प्रयोजनम्। तस्माद्,

[३०]नारदीयशिक्षा २/७/५
[३१]पुष्पसूत्रम् ८/५/७
[३२]नारदीयशिक्षा १/७/२
[३३]तत्रैव १/७/२

वैदिकः स्वरक्रमोऽवरोहक्रमी तथाऽवक्रोऽपि भवतीति सिद्धान्तितम्।

**३.स्वरसमञ्जनम्–** सामस्वराणां सामूहिकपरिचयप्रसङ्गे नारदीयशिक्षाया लौकिकैः स्वरैर्वैदिकस्वराणां सामञ्जस्यविधानं समुल्लेखनीयः पदक्षेपः। तत्रैषां स्वराणां लौकिकैः स्वरैः सह सुदृढं सम्पर्कोऽस्तीति कथ्यते। तर्हि, नामभेदादतिरिक्तो नास्त्येषां कोऽपि भेदः। यथा–

यः सामगानां प्रथमः स वेणोर्मध्यमः स्वरः।
यो द्वितीयः स गान्धारस्तृतीयस्त्वृषभः स्मृतः॥
चतुर्थः षड्ज इत्याहुः पञ्चमो धैवतो भवेत्।
षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः॥"[३४] इति।

सङ्गीतरत्नाकरेऽप्ययमेव विषयश्चर्चितोऽस्ति। तत्र शार्ङ्गदेवेनोक्तम्– "सामवेदादिदं गीतं सञ्जग्राह पितामहः"[३५] इति। कल्लिनाथस्य व्याख्यानेऽप्यस्यैव साम्यस्योल्लेखोऽस्ति– "सामनि ह्युत्कृष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वार्याख्याः सप्त स्वराः। इह तु त एव यथायोगं षड्जादिव्यपदेशभाज इति..."[३६] इति। यद्यपि सायणाचार्यः "...षड्जादिभ्योऽन्ये वा" इत्युक्तवांस्तथापि मन्येऽनयोः स्वरसङ्घयोः स्वरूपतः पार्थक्यं नास्ति। सायणस्य वक्तव्यं मन्य एतयोर्नामभेदमुपजीव्य प्रसारितमिति।

**३.१ पाश्चात्त्यमतम्–** पाश्चात्त्यगवेषका अपि सामस्वरविषय आत्ममतं समुपस्थापितवन्तः। तेषां प्रमुखतः Wayne Howardमहोदय मात्रालक्षणग्रन्थस्य प्राक्कथायां ताञ्जोराधिवासिनां कौथुमसामगायिनामष्टमस्वरव्यवहारप्रवणतां समुल्लिखितवान्। तस्य मतेन– "The chanters employ a seven-tone scale with a central pitch located approximately in the middle of the gamut (pitches are relative); an eighth tone is heard but rarely"[३७] इति। परन्तु, अत्र नायं विषयः स्पष्टतां याति कोऽयमष्टमः स्वर इति। तत्रभवान् यानि गानानि संश्रुत्यैवमाह, यद्यप्यहं तानि न श्रुतवानस्मि, तथापि तस्य वक्तव्यमुपजीव्यैव स्वमतं किञ्चित् प्रस्तोतुकामोऽस्मि। तत्रभवान् वदति,

---

[३४]नारदीयशिक्षा १/५/१-२ अत्र मन्द्रातिस्वार्ययोः प्रकृतस्वरूपविषये पूर्वसिद्धान्त एव बलवत्तरः।

[३५]सङ्गीतरत्नाकरः १/१/२५

[३६]तत्रैव कल्लिनाथस्य व्याख्यानम् १/१/२५

[३७]Howard p. xiii

अमुमष्टमं स्वरं ताञ्जोरीयाः कौथुमा एव गायन्ति, नान्ये। कन्नरीया हाविका नैनं स्वरं गायन्तीति। अनेन संशयो जायते, किमयं स्वरः क्रुष्ट इति न वेति? पुष्पसूत्र एवमुक्तमस्ति, क्रुष्टः कौथुमानामेव गाने स्थानद्वये केवलमुपलभ्यते; अन्येषां तु षडेव स्वरा भवन्तीति। उभयोर्दुष्प्राप्यतात्र सादृश्यमावहति।

तत्रभवान् पाश्चात्त्यरीत्या स्वराणां यच्चित्रमुपस्थपितवांस्तेनाद्यन्त्ययोः स्वरयोः सादृश्यं स्पष्टमस्ति; केवलं स्थानगतं पार्थक्यं तत्रोपलभ्यत इति। अत्राष्टमस्य स्वरस्योदाहरणप्रसङ्गेन तत्रभवान् रथन्तरसाम प्रस्तुतवान्। तत्र तेनोक्तम्– "For example, the following fragment is from a transcription of the Rathantaram…,where a short syllable, under normal circumstances, is equivalent to an eighth note"[३८] इति। परन्तु, गानग्रन्थानुसारेण तत्र प्रथमद्वितीयातिरिक्तः कोऽपि स्वरो नास्तीति लक्ष्यते।

तथा च, तत्रभवानुत्तरकर्णाटकरीतौ षड्स्वरान्वितं स्वरक्रममस्तीति कथितवान्। ताञ्जोरीयाणां स्वरस्थानात् तेषां स्वरस्थानं पृथगस्तीत्यपि तेनैव कथितम्[३९]। परन्तु, तत्रभवान् कथं स्वरग्रामं निर्णीतवानिति न स्पष्टम्। अस्मिन् विषये श्रुतीनामालोचनं किञ्चिदुपकरिष्यतीति मन्ये। परन्तु, बाहुल्यभियात्र नालोच्यते।

प्रसङ्गेऽस्मिन् Louis Renouमहोदयकृतं सामस्वरलिप्यन्तरमपि पर्यालोचयामः। तत्रभवान् पर्कसाम्नः[४०] पाश्चात्त्यरीत्यानुवादकाले यच्चित्रमुपस्थापयति, तेन गानग्रन्थस्य साम्यं नास्ति[४१]। तत्र गानग्रन्थे यत्स्वराङ्कनं प्राप्यतेऽत्र ग्रन्थे तन्नीचैरुदाह्रियते–

४ २र र १ ॒ १ ॒ १ र २र १ ॒
ओऽग्नाइ॥ आयाहिऽ३ वोइतोयाऽ२इ। तोयाऽ२इ। गृणानोह। व्यदातोयाऽ२इ।
१ ॒ १ २र र १ ३ ५र र ३ ५
तोयाऽ२इ॥ नाइहोतासाऽ२३॥ त्साऽ२इबाऽ२३४औहोवा॥ हीऽ२३४षी॥

परन्तु, Louis Renouमहोदयस्य लिप्यन्तरे "व्यदातोया" इत्यत्र

---

[३८]तत्रैव p. xiv

[३९]तत्रैव पृ. xiii

[४०]ग्रामगेयम् १/१

[४१]Renou, p. 119

दाकारस्य प्रथमस्वरभाक्त्वं नास्ति। तथा च, "त्साऽ२इबा" इत्यत्रापि त्साकारस्य प्रथमस्वरभाक्त्वं नास्ति। तथा च, "षी" इत्यत्र मन्द्रस्य स्थाने चतुर्थस्वराङ्कनमस्ति।

स्थानेऽस्मिन् राज्येश्वरमित्रमहोदयकृतं स्वरलिप्यन्तरमपि संयोजितुमर्हम् ; तथापि तस्य विचारणार्थमवान्तरस्वराणां विषये ज्ञानमावश्यकम्। परन्तु, बाहुल्यभियात्र तेषामालोचनं न क्रियते।

**४.उपसंहृतिः–** अधुना चिन्तनीयमेतत्, भूरिप्राचीनस्य सामगानस्य स्वरव्यवस्था नितान्तमर्वाचीनानां सङ्गीतशास्त्राणां साक्ष्येण विचारणीया न वेति? अत्रोच्यते, यद्यप्यत्र कालानौचित्यमापद्यते, तथापि सर्वेषां सङ्गीतग्रन्थानां पारस्परिकं सामञ्जस्यमवलोक्यास्माभिरेवं चिन्तितमिति। तथा च, पुराऽधुनापि वा स्वराणां श्रुतिस्वरूपत्वे नास्ति विरोधः। तर्हि, सर्वे शास्त्रग्रन्थाः सर्वत्रैव गानप्रसङ्गे सप्तैव स्वरा इति स्वीकुर्वन्ति। केवलं कतिषुचित् स्थानेषु श्रुतिसाम्यं न दृश्यते। ननु, Wayne Howardमहोदयकथितस्याष्टमस्वरस्य तर्हि का गतिः? मन्ये, तत्रभवान् पाश्चात्त्यरीत्या प्रभावितः सन् स्वराष्टकस्य सापेक्ष्येण सामस्वरानपि निर्णेतुं प्रवृत्तोऽभवत्। तस्मादिदं मतद्वैधं समजायत इति। तथा च, सम्प्रदायद्वयस्य स्वरस्थानपार्थक्यविषयेऽपि तत्रभवान् यदुक्तवांस्तदपि पाश्चात्त्यरीतेरेव प्रभावः। वस्तुतः, अस्मद्देशे सम्प्रदायेषु स्वराणां न्यौन्याधिक्ये प्रसिद्धे एव। तेन स्वरस्य पार्थक्यमस्तीति न कथ्यते। अत्र यद्यप्यवान्तरस्वराणामालोचनमावश्यकमासीत् ; तथापि बाहुल्यभिया तत्करणेऽस्माकमत्र न प्रचेष्टा। तर्हि सामगाने सप्तैव स्वरा वर्तन्त इत्ययमस्माकं प्रस्तावो विदुषां विवेचनार्थमत्रोपन्यस्यते। इति शम्।

✦ ✦ ✦

## संक्षिप्तग्रन्थपञ्जी

1. Bhise, Usha R (ed). (1986). *Nāradīyaśikṣā, with commentary of Bhaṭṭaśobhākara & English translation & explanatory notes.* Poona: Bhandarkar Oriental Research Institute.
2. Didhiti Biswas (ed). (2000). *Nāradīyaśikṣā with Bengali translation & explanatory notes.* Kolkata.
3. Dikshit, Ra. Narayanswami (ed). (2004). *Sāmagāna – Kauthumaśākhīya* (Vrajajivan PracyabharatiGranthamala-105). Delhi.

4. Howard, Wayne (ed). (1988). *Mātrālakṣaṇam, With English translation & explanatory notes.* New Delhi: Indira Gandhi national Center for Arts, (Kalamula Sastragranthamala).
5. Mitra, Rajyeshwar. (1978). *Vaidik Aitihye Sāmagān*(Bengali), Kolkata.
6. Renou, Louis. (1971). *Vedic India*, translated into English by Philip Spratt, Delhi.
7. Sastri, R. Sharma & Rangacarya, K. (eds.). (1985) *The Taittirīya-prātiśākhya: with the commentaries Tribhāṣyaratna of Somayārya and Vaidikābharaṇa of Gārgya Gopāla Yajvā* Delhi: Motilal Banarasidass Pub.P.Ltd.
8. Sharma, Pankajmala. (1996). *Sāmagān- Udbhav Vyavahār Evaṃ Siddhānt.* Hoshiyarpur.
9. Tarlekar G.H. (tr. & ed.). (2001) *The Puspasutra: a Patisakhya of the Samaveda* Delhi: Indira Gadhi National Center for the Arts, Motilal Banarsidass.

# मारुतेर्वाक्कौशलम्

ब्रह्मचारी भूदेवचैतन्यः*

विद्यन्ते मानवस्य बहूनि इष्टसाधनोपकरणानि। मुख्यं तत्र आत्मगतं करणत्रयम् - शरीरं, वाक्, मनश्चेति। शरीरं तावत् सर्वप्रथमम्। "शरीरमाद्यं खलु धर्मसाधनम्"[१] इति सुष्ठूक्तं कविकुलगुरुणा। ततः सूक्ष्मतरा ज्यायसी वाक्, ततश्च सूक्ष्मतमं ज्येष्ठं मनः। निकृतं चेदेतत् त्रयम् असमर्थं तिष्ठेद् आपदां च आस्पदं भवेत्। कृते च संशोधने, संस्करणे, संवर्धने सम्पदाम् आयतनं स्यात्। वाक् तत्र अन्यतमम् अत्युपयुक्तं साधनम्। तदुपासकं सम्पदः समायान्तीति शंसति श्रुतिः– "भद्रैषां लक्ष्मीर्निहिताधि वाचि" इति।[२] भगवता महाभाष्यकारेणापि अभाणि– "एकः शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति"[३] इति। वचसाम् अनुशीलनं न केवलं सम्पदमावहति परमपवित्रतामपि आदधाति। शब्दतत्त्वसाक्षात्कारवन्तो वाक्यविशारदाः पावनान् पुरुषान् पावनतरान् विदधति इति उच्यते–

> यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम्।
> तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ॥

अतो निष्फलो न कदापि वाक्क्षेत्रे कृतः परिश्रमः। कविपथप्रदर्शनो महाकविर्दण्डी प्राह– "श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्" इति। सुष्ठु प्रयुक्ता वाक् मानवस्य भाग्यद्वारं यथा तथा दुष्प्रयुक्ता सैव अनिष्टापत्तिस्थानमपि। तथा हि–

> लक्ष्मीर्वसति जिह्वाग्रे जिह्वाग्रे मित्रबान्धवाः।
> जिह्वाग्रे बन्धनं प्राप्तं जिह्वाग्रे मरणं ध्रुवम्॥

अतः श्रेयस्कामैः वाक् अनवरतमनुसन्धेया। व्यावहारिकस्तरे वाक्शैलीम् अवेक्ष्यैव वक्तुः स्वभावादिकं वेत्तुं पारयन्ति वाक्पारगाः। अत्र विषये श्रूयत एका उपाख्यायिका–

---

*अध्यापकः, रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालये संस्कृताध्ययनविभागे।

[१]कुमारसम्भवे - ५.३३

[२]ऋग्वेदे १०.७१.२

[३]पतञ्जलेः व्याकरणमहाभाष्ये

पुरा खलु तपोनिधिः कश्चन महर्षिः घनमरण्यम् अधिवसति स्म। जातुचित् मृगयार्थम् आरान्नगराद् आगतो राजा मार्गभ्रष्टः तदाश्रमपदे पदं निदधे। स तज्जनाश्च आखेटान्वेषणे रता विविक्ता अभूवन्। परस्परं गवेषयन्तस्ते एकैकशः महर्षिं प्राप्ताः। बहिः कुटीराद् उपविष्टमृषिं कश्चिद् दृढगात्रो युवा समायात्य चीत्कुर्वन् पप्रच्छ - "अयि रे! इतः कोऽपि अयात् किम् ?" इति। निरभिमानो मुनिः "न" इत्युवाद। गते च तस्मिन् द्वतीयो मध्यवयाः तत्रोपस्थाय अपृच्छत्– "हे साधो! अपि कश्चिदयासीद् एतन्मार्गेण, यथायथं वद" इति। निरपेक्षो मुनिरवोचत्– "आम् , महूर्तात् प्राक् कश्चिदागतः, वामतो यातश्च।" श्रुत्वैतत् स जनः "साधयामि तावत् " इति ब्रुवन् प्रातिष्ठत। यावत् स दृष्टिपथाद् अपगतः तावत् तृतीयः उपागतः। आगम्यावनम्य प्रणम्य च सविनयम् ऋषिम् अप्राक्षीत्– "भो भगवन्! सनमोवाकं कुशलं भवतः सम्भाव्यते। मृगयार्थं वनमागतोऽहं सहचरैर्वियुक्तः। अन्विष्यन् तानत्र सम्प्राप्तः। अथाऽनेन पथा गच्छन् कोऽपि दृष्टिपथमायातः?" गुणज्ञो महर्षिरब्रवीत्– "राजन् , भृत्यामात्यौ तव आगमतां, विचिन्वन्तौ त्वां निरगमताम् " इति। साधुना साधूक्तं किलेति आकलयन् स भूपतिः मुहुरभ्यभाषत– "अत्रभवान् कथम् अभ्यजानात् मां मज्जनान् चेति विद्यते मेऽनुयोगो महान्। तत्समादधातु भगवान् " इति। प्रश्रयावनतं तं प्राज्ञस्तपोधनः प्रत्युवाच– "श्रूयतां तर्हि। वाणी भवति पुरुषप्रकृतेः आख्यायिका। वचः श्रुत्वा किंस्वभावोऽयं जन इत्यवगन्तुं शक्यते। पुरुषस्य विद्या विनयस्तपश्चेति सर्वं तद्वचसि विभासते। युष्माकं वाचं श्रुत्वैव मया अवेतं कः कीदृक् पुमानिति। प्रथमेन यद् अनार्यं व्याहृतं तेनैव तत्प्राकृतत्वं निकृष्टकर्मचरत्वं च स्फुटम्। द्वितीयस्य वाक्ये स्थानमानादिजन्यावलेपो लसति स्म। तेन तन्मन्त्रित्वम् अनुमितम्। तव च विद्याविनयवर्षिणी वाणी कस्य न मनोहारिणी! आचारकुशलः कुशलाकाङ्क्षी काङ्क्षितप्रदश्च भवान् नान्यो राज्ञा विना इति विनाऽऽयासं विनिश्चितम् " इति। बोधमयमेतन्महर्षेः वचनं निशम्य प्रहृष्टो राजा यथोचितं तं संपूज्य स्वगन्तव्यं जगाम।

एवं भवति वाक् शीलपरिचायिका। अत एव"वचनं श्रुतमाख्याति" इत्यवादि[४]। अद्यत्वे तु यथाकथञ्चिद् वाक्यं प्रयुञ्जाना जना लोकव्यवहारं निर्वहन्ति। निदर्शनार्थम् अधुनातनच्छात्राणां वाक्छटामेव परामृश्यताम्। अतीत्य समयं

[४]आचारः कुलमाख्याति वपुराख्याति भोजनम्। वचनं श्रुतमाख्याति स्नेहमाख्याति लोचनम्॥

विद्यालयं विशन्तम् विद्यार्थिनम् आचार्यः पृच्छति– "अयि भोः, कुत एतावान् विलम्बः?" सादरं खलु वदति छात्रः– "क्षम्यताम् आर्य, विलम्बो जातः" इति। अहो वाग्विक्रमः! प्रश्नमेव उत्तरत्वेन व्यावर्तयामास शौण्डः! तद्वचने आचार्यं प्रति आदरो विद्यते न वेति प्रश्नस्तिष्ठतु दूरे, परस्परं वाक्ययोः सामञ्जस्यमेव नास्ति ननु इति कुतो न विचार्यते। लोके प्रायेण एवमेव प्रसङ्गादिसङ्गतिरहितानि असम्बद्धानि असमर्थानि वाक्यानि वावद्यन्ते वावदूकाः। नैष आर्याणां भारतानां क्रमः। मनुकुलं शिशिक्षयिषवो वाक्प्रयोगपद्धतिं प्रतिपिपादयिषवश्च ऋषयः कथा आख्यायिकाश्च उपनिबबन्धुः। छात्राः पदशास्त्रं पाठं पाठं पदपाटवं प्राप्नुवन्ति, महाकविवाचं वाचं वाचं वचोवैदुष्यं च वेविदति। यथोचितवक्तृणाम् अत्युत्तमनिदर्शनत्वेन आञ्जनेयं मारुतिम् उपस्थापयामास आदिकविः।

सीतान्वेषणार्थं गतः पवमानतनय अशोकवनिकायां तां ददर्श। अवलोक्य तां प्राज्ञः स आत्मन्येवानेकशः तर्कयामास। सीताभिभाषणं कर्तव्यम् उत न, वाक् चेत् प्रयोक्तव्या संस्कृतेन उत मानुषगिरा इत्येवमादि बहुधा विचचार विचक्षणः। वाग्व्यवहारमेवान्ते व्यवस्य"राजा दशरथो नाम..."[५] इति सीताश्रवणसुखं सुखदं वाक्यमकथयत्। रामशब्देन यदि स आरप्स्यत तर्हि प्रतारणार्थं छद्मरुपान्तरेण पुनरागतं रावणं तं सा अमंस्यत। वानरं मां विजानीहि ...इत्यादिना चेद् उपाक्रंस्यत दर्शनमात्रेण प्रतीयमानस्य कपिरुपस्य पुनर्वचसा प्रदरशनं मूर्खत्वाय अकल्प्स्यत। अतः प्रत्ययोत्पादकेन रामान्वयस्तोत्रेण वागारब्धा धीमता। इत्थं सर्वत्र स महामतिः यथाप्रसङ्गं यथोद्देशं निष्कृष्टं वचः प्रयुयुजे।

दृष्टान्तान्तरम्। नगेन्द्रं महेन्द्रम् आसन्ना अवसन्ना अङ्गदादयो लङ्कादिशः प्रत्यागच्छन्तं नभसि प्लवमानं प्लवङ्गमं प्रदृश्य प्रमोदं प्रपन्नाः। सीतावार्ताश्रवणोत्सुकान् तान् समीक्ष्य वानरान् वानरोत्तमः"दृष्टा सीता" इति माङ्गलिकम् उपचक्रमे।[६] प्रप्रथमः शब्दः दृष्टा इति यद् व्याहृतं तत्तस्य वाक्प्रयोगनैपुण्यं द्योतयति। सीतादर्शनकथाश्रवणेच्छादाहतप्तानां माम्लायमानमानसानां मानसे पीयूषं विवर्षिषुणाऽमुना अमृतायमानोऽयं शब्द आदौ समर्पितः– दृष्टा इति। क्षणमात्रमपि मन एषां व्यथास्पदं न भूयादिति

---

[५]राजा दशरथो नाम रथकुञ्जरवजिमान्। पुण्यशीलो महाकीर्तिरिक्ष्वाकूणां महायशाः॥ इत्यादि। वाल्मीकिरामायणे ४.३१.२

[६]स ताभ्यां पूजितः पूज्यः कपिभिश्च प्रसादितः। दृष्टा सीतेति विक्रान्तः संक्षेपेण न्यवेदयत्॥ वा.रा. ४.५७.३६

तस्य धीः समादरणीया। सीता इति चेद् आदौ अवादीत्, किमापतितं तस्याः इति पापम् आशङ्क्य मनः क्षणं व्यथितं स्यात्। किल"स्नेहः पापशङ्की"[७]। प्रतीक्षाग्निज्वालातापिते मुहूर्ते नान्यद् वचः प्रशस्यत इति साधु विनिश्चित्य सूक्तमुक्तं तेन।

रामस्य आदिमसन्दर्शने "राजर्षिदेवप्रतिमौ ..."[८] इत्यादि स्तेत्रमालां विनिवेद्य अन्ते आत्मपरिचयं न्यवेदयत्। स एव रावणं प्रथमवारं भाषमाणः"अहम्" इति वाक्यमारेभे।[९] सम्भावितात्मभिः साकं सम्भाषणे विनयसंभिन्नः शिष्टः क्रमः। उद्भटैः सह संल्लापे स्वधाम संस्थापिका निशिता वाणी।

एवं समयानुसन्धि प्रसङ्गानुरोधि व्यक्तिविशेषानुबन्धि भवेद् भाषणम्। वचने विशदता स्यात्, विशिष्टो महान् अर्थो भवेत्, वैविध्यं विलसेत्, विषयस्य अनुस्यूतता स्यन्देत, इति सतां सम्मतं प्रशस्यतेतरां भारविमतम्।[१०] वेदा अपि वाग्विषयिणीं विमर्शाम् अकार्षुः।"चत्वारि वाक्परिमिता पदानि ..." इत्यादिमन्त्रेषु महता गाम्भीर्येण विहिता वाक्चर्चा।[११]। वाग्विशोधनविधिरपि श्रुतिभिः प्रदर्शितः। चालन्या यथा सक्तून् शोधयन्ति तद्वद् (शास्त्राध्ययनादिना संस्कृतेन) मनसा वाचं संशोध्य सम्प्रयञ्जते धीराः इति उद्घोषयति ऋग्वेदः।[१२] पुराणेषु काव्येषु सुभाषितेषु च वाग्विषयिणी चर्चा बोभवीति। भगवद्गीतासु वाङ्मयं तपः निपुणं निरूपितम्। प्रयत्नपण्यक्रेया इयं वाग्विभूतिः न सर्वसुलभा। जुषते चेयं सुकृतिनः, जुगुप्सते च अकृतात्मभ्यः।"प्रवर्तते नाऽकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती।" इति महाकविवचनं सत्यं सत्यादनपेतम्।[१३] इदमपि

---

[७]अभुज्ञानशाकुन्तले चतुर्थेऽङ्के सख्यौ शकुन्तलां प्रति।

[८]वा.रा. ४.३.५ - तत्प्रसङ्गे उक्तानि हनुमद्वचांसि पूर्णतो दत्तानि अग्रे द्रष्टव्यानि।

[९]अहं सुग्रीवसन्देशादेव प्राप्तस्तवान्तिके। राक्षसेश हरीशस्त्वां भ्राता कुशलमब्रवीत्॥ वा.रा. ४.५१.२

[१०]स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्। रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्॥ किरातार्जुनीये २.२७

[११]चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मण ये मनीषिणः। गुहा त्रीणि निहिता नेऽङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति। ऋग्वेदसंहितायाम् १.१६४.४५

[१२]सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत। अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि॥ इति ऋग्वेदसंहितायाम् १०.७१.२

[१३]विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम्। प्रवर्तते...॥ किरातार्जुनीये

न विस्मृतिम् अर्हति–

गौर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥[14]

अतः शिष्टानां वचनानि वाक्यविदां वक्यानि चानुसन्धेयानि। वाक्तत्त्वज्ञानां शूश्रूषा, सुधियां सन्निधौ भाषाभ्यासः, प्रवक्तृणां सहचरत्वम् इत्यादयोऽपि वाग्विभूतिप्रापकान्येव। विशिष्य सततोद्यमः सन्ततानुशीलनं च वाक्सिद्धेः उपनिषत् परा। वाङ्नियोगनैपुण्यम् अधिजिगमिषूणां छात्राणां रामायणादीनां पाठो महते लाभाय कल्पेत। तत्र रामवचस्सु विहिता मारुतेः वाक्कौशलस्य प्रशंसा संस्कृतवाङ्मये अपूर्वं स्थानं भजते। वाचम् अधिजिगांसूनां स्फूर्तिप्रदम् अवश्यवाच्यं श्लोकनिचयं नु तत् -"नानृग्वेदविनीतस्य ..." इत्यादि।

सीताम् अन्विष्यमाणौ ऋष्यमूकपर्वतम् आगतौ रामलक्ष्मणौ सुग्रीवेण सपरिच्छदेन लक्षितौ। वालिना प्रेषितौ छद्मवेषधारिणौ किन्नु एतौ इति शङ्कितः सुग्रीवः सूरिप्रवरं वाक्यतज्ञं हनूमन्तं प्राहिणोत् तयोरन्तिकम्। सत्यं जिज्ञासुः पवनसुतः स्वरूपं संपरिवर्त्य विप्ररूपेण तत्रोपस्थितः। यथोचितेन च वचसा तौ वीरौ सत्यपराक्रमौ संपूज्य आबभाषे। आञ्जनेयस्य वचोभङ्ग्या प्रभूतं प्रभावितो भगवान् पुरुषोत्तमः मुक्तमनसा तद्वचसां प्रशंसां चकार। पार्श्ववर्तिनं सुमित्रानन्दनं शशंस रामचन्द्रः–

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः।
नासामवेदविदुषः शक्यमेवं प्रभाषितुम्॥[15]

ऋग्वेदाध्ययनं पृथक्, यजुर्वेदाधिगमेन विना, सामवेदज्ञानात् नाना एवं भाषितुं न शक्यम्। विनयो नाम वैदिकव्याकरणादिज्ञानपूर्वकं वेदाभ्यासः। ऋग्वेदविषये तादृशविनयोपेत एषः। यजुर्वेदस्य धारणं कष्टसाध्यम्। अनुवाके अनुवाकान्तरसाङ्कर्यं यतो हि वरीवर्ति तत्र। अवश्यम् एषः तादृशस्य यजुर्वेदस्य धारणं कृतवानस्ति। वेदमन्त्राणां गायनविषये ऊहादिकं (विभक्त्यादीनां समुचितविपरिणामः इत्यादिकं) दुर्ज्ञेयम्। तत्रापि प्राप्तनैपुण्योऽसौ भासते।

---

१४.३

[14]काव्यादर्शे १.६

[15]वा.रा. ४.३.२८

नोचेद् एवं वक्तुं नैव अशक्ष्यत्।[16]

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहु व्याहरताऽनेन न किञ्चिदपशब्दितम्॥[17]

न केवलं वेदाध्ययनं वेदाङ्गेष्वपि व्युत्पत्तिमान् अयम्। समग्रं शब्दशास्त्रम् अनेकवारम् अधीतवान् एषः। बहुविधं उपश्लोकयता अनेन स्तोकमप्यशुद्धं नोदितम्।

न मुखे नेत्रयोश्चापि ललाटे च भ्रुवोस्तथा।
अन्येष्वपि च गात्रेषु दोषः संविदितः क्वचित्॥[18]

शिक्षाशास्त्रेऽपि कृतभूरिपरिश्रमोऽयम् इति सुसूचयिषति इतः चतुर्भिश्श्लोकैः।[19] भाषणवेलायाम् अस्य मुखे, नयने, ललाटे, भ्रुवोः वा न कोऽपि दोषः कृतः। अनुचितं चलनं, वृथा अङ्गसंसर्गसम्मर्दादिकं न विहितम्। श्रेष्ठानां धीरगम्भीरचेतसां लक्षणमेतदस्मिन् लक्ष्यते। अतो न केवलं वचसा शिष्टः, इङ्गितैरपि श्रेष्ठो विश्वासयोग्यश्चासौ विभाति।

अविस्तरम् असन्दिग्धम् अविलम्बितम् अव्यथम्।
उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरम्॥[20]

अतिविस्ताररहितम्, अर्थतो वर्णतश्च सुस्पष्टम् अस्य वचनम्। अविलम्बितम्– वर्णयोः उच्चारे दीर्घं व्यवधानं नास्ति, निरर्गला अस्खलद्गीः अस्य। अपि च कटुवर्णरहितं कठोरार्थहीनं श्रवणसुखं वदति। मध्यमारूपेण हृदि स्थिता, वैखरीरूपेण कण्ठात् निर्गताऽस्य वाणी अत्युच्चैः अतिनीचैः उच्चारणरहिता सती मध्यमस्वरयुक्ता प्रवहति। इत्थमत्र वचनरचनासौष्ठवं कीर्तितम्। पुनश्च–

संस्कारक्रमसम्पन्नाम् अद्रुतामविलम्बिताम्।

---

[16] रामप्रणीत-रामायणतिलकटीका, शिवसहायप्रणीत-रामायणशिरोमणिटीका, गोविन्दराजप्रणीत-रामायणभूषणेति टीकात्रयं प्रसिद्धम्। तत एव सङ्गृह्यात्र अर्थो लिखितः। उत्तरश्लोकेष्वपि एवमेव बोध्यम्।

[17] वा.रा. ४.३.२९

[18] वा.रा. ४.३.३०

[19] तथा च– गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः। अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥ पाणिनीयशिक्षायाम् ३२। अन्यत्र चोक्तम्– न शिरः कम्पयेद्गात्रं भ्रुवौ चाप्यक्षिणी तथा। तैलपूर्णमिवात्मानं तत्तद्वर्णे प्रयोजयेत्॥ इति।

[20] वा.रा. ४.३.३१

उच्चारयति कल्याणीं वाचं हृदयहारिणीम्॥[21]

संस्कारो व्याकरणकृता शब्दशुद्धिः, व्यक्तपदत्वम्। क्रमो वर्णानां क्रमिकता, व्यक्ताक्षरत्वम्। एवं पदसंस्कारो वर्णक्रमश्चेति उभयथा साधिष्ठं तद्वचः। अद्रुताम् अतिवेगरहितां वाणीं वदति। एकस्य वर्णस्य श्रवणात् प्राक् अन्यस्योच्चारणं कृतं चेत् स्फुटश्रवणं न भवति। तादृशत्वरारहीता अविलम्बिता समुचितवेगसहिता मङ्गलप्रदा अत एव मनोहारिणी अस्य वाक् आकर्षति।

अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया।
कस्य नाराध्यते चित्तम् उद्यतासेररेरपि॥[22]

त्रिषु स्थानेषु अभिव्यक्तिं प्राप्ता वाणी प्रस्फुटा अपूर्वशक्तिसम्पन्ना सती श्रोतृषु अनपोह्यं प्रभावं जनयति। ईदृशी वाक् श्रुतिपथम् आयाति चेत् कस्य नाराध्यते चित्तम् , सर्वस्यापि प्रसाद्यते एव। खड्गमुद्धृत्य हननोद्यतस्य शत्रोः अपि मनः प्रसन्नतां याति, किमुत शान्तस्य जनस्य। एवं वाक्चातुरीम् अभिनन्द्य अथ बुद्धिचातुरीम् अभिनिनन्दिषति–

एवं विधो यस्य दूतो न भवेत्पार्थिवस्य तु।
सिद्ध्यन्ति हि कथं तस्य कार्याणां गतयोनघ॥[23]

कार्याणां गतयः परिपाकाः। यस्य राज्ञः एवंविधः पूर्वोक्तगुणैर्युक्तो दूतो न भवेत् तस्य कार्याणि कथं वा सफलानि स्युः।

एवं गुणगणैर्युक्ता यस्य स्युः कार्यसाधकाः।
तस्य सिद्ध्यन्ति सर्वेऽर्थाः दूतवाक्यप्रचोदिताः॥[24]

उक्तगुणसमूहैः सम्पन्नाः कार्यसाधका दूता यस्य नृपस्य भवन्ति तस्य सर्वाणि कार्याणि दूतवाक्यप्रचोदितानि एव सिद्ध्यन्ति। अतो राजभिः ईदृशो दूतो अवश्यं सम्पादनीय इत्याशयः। हनूमति रामचन्द्रस्यात्र प्रीत्यतिशयोऽपि अनेन व्यज्यते।

स्वयं भगवान् श्रीरामचन्द्रः एवं स्तुवीयात् तथा किं वा अवोचत् स अञ्जनानन्दनः इति चेद् आचाकाङ्क्ष्यते मनः कौतुकविनोदार्थं तद्वचांसि पाठ्यानि।

मारुतेः वचांसि[25]

---

[21]वा.रा. ४.३.३२
[22]वा.रा. ४.३.३३
[23]वा.रा. ४.३.३४
[24]वा.रा. ४.३.३५
[25]वा.रा. ४.३.५-२४

राजर्षिदेवप्रतिमौ तापसौ संशितव्रतौ॥[२६]
देशं कथमिमं प्राप्तौ भवन्तौ वरवर्णिनौ।
त्रासयन्तौ मृगगणानन्यांश्च वनचारिणः॥
पम्पातीररुहान् वृक्षान् वीक्षमाणौ समन्ततः।
इमां नदीं शुभजलां शोभयन्तौ तरस्विनौ॥
धैर्यवन्तौ सुवर्णाभौ कौ युवां चीरवाससौ।[२७]
निःश्वसन्तौ वरभुजौ पीडयन्ताविमाः प्रजाः॥
सिंहविप्रेक्षितौ वीरौ महाबलपराक्रमौ।
शक्रचापनिभे चापे गृहीत्वा शत्रुनाशनौ॥
श्रीमन्तौ रूपसंपन्नौ वृषभश्रेष्ठविक्रमौ।
हस्तिहस्तोपमभुजौ द्युतिमन्तौ नरर्षभौ॥
प्रभया पर्वतेन्द्रोऽसौ युवयोरवभासितः।
राज्यार्हावमरप्रख्यौ कथं देशमिहागतौ॥
पद्मपत्रेक्षणौ वीरौ जटामण्डलधारिणौ।[२८]
अन्योन्यसदृशौ वीरौ देवलोकादिहागतौ॥
यदृच्छयेव संप्राप्तौ चन्द्रसूर्यौ वसुन्धराम्।
विशालवक्षसौ वीरौ मानुषौ देवरूपिणौ॥[२९]
सिंहस्कन्धौ महोत्साहौ समदाविव गोवृषौ।
आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः॥
सर्वभूषणभूषार्हाः किमर्थं न विभूषिताः।

---

[२६]वा.रा. ४.३.५

[२७]रचिता पृथगर्थता गिराम् इति भारव्युक्तेः निदर्शनमेतत्। अर्थद्वयप्रत्यायनसमर्थं शब्दं प्रायुङ्क्त सः। ननु रामवर्णः श्यामवर्णः, सुवर्णाभौ इति कथं युज्यते इति चेदुच्यते (रामायणशिरोमणिटीकायाम्)– द्रुतसुवर्णस्य श्यामत्वेन दृश्यमानत्त्वात् अद्रुतस्य च गौरवर्णत्वेन दृश्यमानत्वात् सुवर्णवर्णाभौ इति न विरुद्धं, सुवर्णशब्देन अवस्थाद्वयापन्नयोर्ग्रहणे बाधकाभावात् इति।

[२८]असामवेदविदुषः सुवर्णाभौ पद्मपत्रेक्षणौ इत्येवं भाषितुं न शक्यते। छान्दोग्ये हि अथ य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते इत्यारभ्य तस्य यथा काप्यासं पुण्डरीकमेवमक्षिणी इत्याम्नायते। इति गोविन्दराजः रामायणभूषणे।

[२९]अयजुर्वेदधारिणः मानुषौ देवरूपिणौ इत्यादिना अजायमानो बहुधा विजायते इत्युक्तावताररहस्यं वक्तुं न शक्यते।

उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम्॥[30]
ससागरवनां कृत्स्नां विन्ध्यमेरुविभूषिताम्।
इमे च धनुषी चित्रे श्लक्ष्णे चित्रानुलेपने॥
प्रकाशेते यथेन्द्रस्य वज्रे हेमविभूषिते।
संपूर्णाश्च शितैर्बाणैस्तूणाश्च शुभदर्शनाः॥
जीवितान्तकरैर्घोरैर्ज्वलद्भिरिव पन्नगैः।
महाप्रमाणौ विपुलौ तप्तहाटकभूषणौ॥
खड्गावेतौ विराजेते निर्मुक्तभुजगाविव।
एवं मां परिभाषन्तं कस्माद्वै नाभिभाषतः॥
सुग्रीवो नाम धर्मात्मा कश्चिद्वानरपुङ्गवः।
वीरो विनिकृतो भ्रात्रा जगद्भ्रमति दुःखितः॥
प्राप्तोहं प्रषितस्तेन सुग्रीवेण महात्मना।
राज्ञा वानरमुख्यानां हनुमान्नाम वानरः॥
युवाभ्यां स हि धर्मात्मा सुग्रीवः सख्यमिच्छति।
तस्य मां सचिवं वित्तं वानरं पवनात्मजम्॥
भिक्षुरूपप्रतिच्छन्नं सुग्रीवप्रियकारणात्।
ऋष्यमूकादिह प्राप्तं कामगं कामचारिणम्॥
एवमुक्त्वा तु हनुमांस्तौ वीरौ रामलक्ष्मणौ।
वाक्यज्ञो वाक्यकुशलः पुनर्नोवाच किंचन॥

य एवं प्रभञ्जनात्मजो दशरथात्मजं प्रसादयामास स नः प्रसीदतु विद्वद्वरो वाक्पतिः। वैयाकरणानां गुरुकल्पम् अमुं मारुतिं स्तुमः–

बुद्धिर्बलं यशो धैर्यं निर्भयत्वमरोगिता।
अजाड्यं वाक्पटुत्वं च हनूमत्स्मरणाद्भवेत्॥

✦✦✦

[30] अनृग्वेदविनीतस्य उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम् इत्यादिनोक्तसृष्टिस्थितिसंहारकर्तृत्वं वक्तुं न शक्यम्। ऐतरेयके हि ब्रह्म वा इदमेक एवाग्र आसीत् इत्यादिना तथात्वं प्रथमतः प्रतिपाद्यते।

# सुषुप्तौ अविद्या : उपनिषन्मतसमीक्षणम्

पलाश-घोडइः*

The message of the *Vedānta* may be summed up thus: Arise, awake, and know the serene self of dreamless sleep. Thou art That. The philosophy of deep sleep is the key to the realization of Brahman.[१]

## ०. उपोद्घातः

अद्वैतसिद्धान्ते अवस्थात्रयविचारस्य माहात्म्यं सुप्राचीनकालादेव दरीदृश्यते। अवस्थात्रयं व्यतिरिच्यापि तुरीयाभिधेया काचिद् अवस्था विद्यत इति माण्डूक्योपनिषद्याम्नायते। सैव समेषां संसारिणां समासाद्यत्वेन संकीर्त्यते शास्त्रेषु। यद्यपि सा वस्तुतो नैव काचिदवस्था तथापि अवस्थात्रयसाम्येन बोधसौकर्याय सापि अवस्थेति गीयते।[२] शङ्करोत्तरकालिनः शङ्करमतानुसारिणो बहवः साम्प्रदायिका अद्वैतिनस्तुरीयावस्थामेव सर्वोत्कृष्टावस्थात्वेन स्वीकुर्वन्ति, न तु सुषुप्त्यवस्थाम्। सुषुप्त्यवस्थायामपि अविद्यासद्भावान्न सावस्था सर्वोत्कृष्टेति तेषामविप्रतिपन्नो राद्धान्तः। सा च सुषुप्तिगताविद्या मूलाविद्येति कथ्यते। केचन आधुनिकाः शङ्करानुसारिण एवाचार्या सच्चिदानन्देन्द्रसरस्वत्यादय आवेदयन्ति यत् सुषुप्तौ मूलाविद्याभिधेया भावरूपाविद्या विद्यत इति यन्मतं तन्न शङ्कराचार्यस्याभिमतं किन्तु शङ्करपरवर्तिकालिकानां पद्मपादप्रकाशात्ममुन्यादीनां मतं, यच्चाद्वैतसिद्धान्तविरोधि। अद्वैतसिद्धान्तस्य प्रतिष्ठापका गौडपाद-शङ्करभगवत्पाद-सुरेश्वराचार्यादयः सुषुप्तिगतभावाविद्यां न कदाचिदप्युररीकृतवन्त

---

*रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालये संस्कृताध्ययनविभागे शोधच्छात्रः।

[१]Swami Iswarananda, God Realization Through Reason, Second Edition, Trichur, Sri Ramakrishna Ashrama, Nov. 1959, p. 42 − Swami Iswarananda

[२]मूलाविद्यानिरासः अथवा श्रीशङ्करहृदयम्, सच्चिदानन्देन्द्रसरस्वती, अध्यात्मप्रकाशकार्यालय, होलेनारासिपुर, २००९, पत्राङ्कः १९२. “माण्डूक्यश्रुतिस्तावन्न सुषुप्तिव्यतिरिक्तस्थानबोधनार्था, विश्वादीनामात्मनः पादत्रयकथनेनैव तुरीयस्य व्यतिरिक्तत्वसिद्धेः। कल्पितप्राज्ञत्वनिषेधेनात्म-स्वरूपकथनार्था त्वेषा श्रुतिः। यथा हि “रज्जुरेषा न सर्पः” इति वाक्ये सर्पप्रतिषेधस्तद्वत्रापि “न प्रज्ञानघन”मित्यादिवाक्ये कल्पितप्राज्ञत्वप्रतिषेधः।”

इति ते सघोषमुद्घोषयन्ति। किञ्च त एवमपि वदन्ति यत् सुषुप्तौ जीवः स्वयंज्योतिस्स्वरूपेण परेण ब्रह्मणैकीभूतो भवति, सा च मोक्षसमानैवावस्था, नास्ति तत्राविद्यालेशोऽपि।

प्रबन्धेऽस्मिन् सुषुप्तावविद्या विद्यते न वेत्युपनिषत्प्रमाणमनुसृत्य विचार्यते। अर्थात् सुषुप्तावविद्यासद्भाव उपनिषत्सम्मतो न वेति विस्तरेण मयात्र विचार्यते। मन्मत उपनिषत्सु साक्षात् कुत्रापि सुषुप्तावविद्यासद्भावोल्लेखो न दृश्यते, तथापि तत्र तत्राविद्यासद्भावे लिङ्गानि दृश्यमानानि विद्यन्ते। अतो यद्यप्यद्वैतिनो युक्त्यनुरोधवशात् सुषुप्तावविद्यासद्भावं स्वीकुर्वन्ति तथापि तत्साक्षादुपनिषत्सम्मतं न भवतीति विज्ञेयम्। किं बहुना, उपनिषत्सु वर्णिता सुषुप्त्यवस्था मोक्षसमानैवेति दृश्यते।

शङ्करभगवत्पादैः क्वचित् साक्षात् सुषुप्तावविद्या बीजाकारेण विद्यत इति निगद्यते,[३] क्वचिच्च सुषुप्तावविद्याविषये नैव किञ्चित् कथ्यते, क्वचिच्चाविद्या न विद्यत इति निगद्यते[४]। तस्मात् सुषुप्तौ अविद्यासद्भावविषये शङ्कराचार्यस्य वस्तुतः किमभिमतमिति सम्यक्तया न विज्ञायते। मन्मते आचार्यशङ्करभगवत्पादैरपि स्वीक्रियते यत् सुषुप्तौ जीवः परेण ब्रह्मणा एकीभूतो भवति चेदपि अविद्या बीजाकारेण तत्र विद्यत एव। परन्तु उपनिषत्सु कुत्रापि सुषुप्तावविद्यासद्भावो न निगद्यते। अत्र शङ्कराचार्यमतं नालोच्यते किन्तु सुषुप्तिपराण्युपनिषद्वाक्यानि केवलं विचार्यन्ते।

## १ उपनिषत्सु सुषुप्तिविचारः

प्रसिद्धासु दशस्वपनिषत्सु[५] मुख्यतश्चतसृष्वपनिषत्सु सुषुप्तिविषये आलोचनं

---

[३]तस्मात् प्रकृतित्वेऽपि सुषुप्तप्रलयबीजभावावशेषैवैषा सत्सम्पत्तिः (ब्रह्मसूत्रशाङ्करभाष्यम्-४.२.८), अविद्यात्मकबीजसद्भावकारितमुत्थानम् (ब्र.सू.शा.भा. २.३.३१), यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ मिथ्याज्ञानस्यानपोदितत्वात् पूर्ववस्तुनः प्रबोधे विभागः (ब्र.सू.शा.भा. २.१.९), यथा ह्यविभागेऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितौ दृश्यते, एवमपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते (ब्र.सू.शा.भा. २.१.९)।

[४]अत्र चैतत्प्रकृतमविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं यत्सुषुप्त आत्मनो गृह्यते प्रत्यक्षत इति (बृहदारण्यकभाष्यम्-४.३.२२), अभयं रूपमित्यविद्यावर्जितमित्येतत् (बृ.भा.४.३.२१), अन्यत्वप्रत्युपस्थापकहेतोरविद्याया अभावात् (बृ.भा.४.३.२१)।

[५]ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-तैत्तिरीय-ऐतरेय-बृहदारण्यक-छान्दोग्योपनिषदः

विराजते। ता हि बृहदारण्यकोपनिषच्, छान्दोग्योपनिषत्, प्रश्नोपनिषन्, माण्डूक्योपनिषच्चेति। इदानीमेकैकश उपनिषत्स्वपन्यस्तः सुषुप्तिविषयः सविस्तरं पर्यालोच्यते।

## १.१ बृहदारण्यकोपनिषदि सुषुप्तिविचारः

बृहदारण्यकोपनिषदि (बृ.उ) मुख्यतः स्थानद्वय एव सुषुप्तिः पर्यालोचिता। द्वितीयाध्यायस्य प्रथमब्राह्मणस्य सप्तदशमन्त्रे अजातशत्रुः गार्ग्यं प्रति सुषुप्तिविषये वक्ति- "स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते तानि यदा गृह्णात्यथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति गृहीता वाग्गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः"[६] इति।

पुनश्च तत्रैवाम्नायते– "अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो वा महाब्राह्मणो वाऽतिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते"[७] इति। अत्र सुषुप्तिस्थः पुरुषः स्वपिति नाम्नाख्यायते। स च नाडीपुरीतद्द्वारेण हृदयाकाशे अन्तःकरणमुपसंहृत्य शेते। स न किञ्चन वेद। अत्र मन्त्रे सुषुप्तिस्थः पुरुषः परमात्मनि एकतामेतीत्यादिविषये न किञ्चिदपि उच्यते, किन्तु "न कस्यचन वेद" इति विषयज्ञानं तस्य नास्तीत्याम्नायते। किञ्च, स न किञ्चिज्जानातीति कारणात्तस्याज्ञानमासीदित्यपि वक्तुं युज्यते।

बृहदारण्यकोपनिषदि ज्योतिर्ब्राह्मणे यदा याज्ञवल्क्यो जनकमात्मनः स्वयंज्योतिष्ट्वमुपदिशति तदा सुषुप्तिविषये वदति– "तद्यथाऽस्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कंञ्चन कामं कामयते न कंचन स्वप्नं पश्यति"[८] इति, "तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभयं रूपं तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नाऽऽन्तरमेवमेवायं पुरुषः प्राज्ञेनाऽऽत्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नाऽऽन्तरं तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम्"[९]

[६]बृ.उ-२.१.१७
[७]बृ.उ २.१.१९
[८]बृ.उ ४.३.१९
[९]बृ.उ ४.३.२१

इति च। स्वप्नजागरितयोर्विषयान् भुञ्जानो जीवो यदा परिश्रान्तो भवति तदा उपाधिद्वयं परित्यज्य कामस्पर्शविहीनः सुषुप्तिमुपैति। तत्र पुरुषः परमात्मना संपरिष्वक्तः बाह्यान्तरविशेषविज्ञानरहितः विगतपाप्मा अभयः अकाम आप्तकामः शोकरहितश्च भवति। अत्र तु स्पष्टतया जीवस्य परब्रह्मणा सममेकतां निगदयति श्रुतिः, सा चावस्था मोक्षावस्थातुल्येत्येव भाति। किञ्च, परमात्मना एकीभूतत्वादेव तत्र किञ्चन बाह्याभ्यन्तरंज्ञानं नास्तीति निगद्यते, न त्वज्ञानसद्भावस्तेन कल्प्य इति ज्ञाप्यते। पुनश्च अवस्थायामस्यां सर्वसंसर्गरहित आत्मा भासत इति ज्ञायते "अत्र पिताऽपिता भवति माताऽमाता"[10] इत्यादिश्रुतेः। वस्तुतः सुषुप्तावात्मा न विनष्टिमेति परन्तु द्वितीयाभावादेव तत्र दर्शनं नास्ति कस्यचिदपि। तच्चाम्नायते बृहदारण्यकोपनिषदि- "यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्" इति[11]। अतो द्वितीयाभावादेव तत्र दर्शनाभावो नाम ज्ञानाभावः। स च द्वितीयो न द्रष्टा, किन्तु दृश्यमानो विषय एव। विषयाभावादेव तत्र ज्ञानाभावो विद्यते। अतः सुषुप्त्यवस्थायां जीवपरमात्मनोरेकीभूतत्वादात्मन उपाधिरहितं स्वरूपं यद्भासते तदेव आत्मनः प्रकृतं स्वरूपं, नास्ति तत्राविद्यालेशोऽपि। अतः सुषुप्त्यवस्थायां आत्मस्वरूपेण स्थितिः समेषामेव भवतीति श्रुतिः निगदयति।

अत्रेदं विचार्यं यद् यदि जीवपरमात्मनोरेकत्वमेव वेदान्तशास्त्रस्य विषयस्तर्हि सुषुप्तौ स्वाभाविकतया समेषां परमात्मना साकमैक्यं भवतीति कारणान्न केनचिदपि परमात्मनि ऐक्यप्राप्तये यतनीयम् अनायासलभ्यत्वादैक्यस्य। किञ्च, जीवपरमात्मनोरैक्यमेव यदि मोक्षः स्यात्तेन सुषुप्त्यवस्था मोक्षावस्थेत्येव वक्तव्यं, न तु मोक्षतुल्येति। मन्मते मोक्षस्तु बन्धसापेक्षः, बन्धश्च अज्ञानम्। अतो मोक्षो नाम अखिलाज्ञाननाशः। तच्चाज्ञानं सुषुप्तौ न नश्यति, किन्तु बीजाकारेण विद्यत एव, यद्धि जीवस्य स्वप्नजाग्रदवस्थाप्रतिपत्तौ हेतुर्भवति। अतो युक्त्यनुरोधेनास्माभिः सुषुप्तौ अज्ञानमस्तीति स्वीक्रियते परन्तु अत्रोपनिषदि तद्विषये नाम्नायते। अपि तु, सुषुप्तौ आत्मस्वरूपेणावस्थितिरेव भवतीति कारणात् सा मोक्षावस्थासमानेत्येव प्रतिभाति।

---

[10] बृ.उ ४.३.२२

[11] बृ.उ ४.३.२३

## १.२ प्रश्नोपनिषदि सुषुप्तिविचारः

प्रश्नोपनिषदि (प्र.उ) सम्पूर्णतया चतुर्थः प्रश्नः सुषुप्तिविषयकः। तत्र सौर्यायणी गार्ग्यः सुषुप्तिविषये भगवन्तं पैप्पलादं पप्रच्छ। पैप्पलाद उवाच- "यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति। ताः पुनः पुनरुदयतः प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवति। तेन तर्ह्येष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नाऽऽदत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते"[१२] इति। पुनश्च "स यदा तेजसाभिभूतो भवत्यत्रैष देवः स्वप्नान्न पश्यत्यथ तदैतस्मिञ्छरीरे एतत्सुखं भवति"[१३] इति, "स यथा सोम्य वयांसि वासोवृक्षं सम्प्रतिष्ठन्ते। एवं ह वै तत्सर्वं पर आत्मनि सम्प्रतिष्ठते"[१४] इति, "एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः। स परेऽक्षर आत्मनि सम्प्रतिष्ठते"[१५] इति। अस्यामुपनिषदि सामान्यतो विषयत्रयं सुस्पष्टतया बोध्यते। सुषुप्तिस्थः पुरुषः तेजसाभिभूतो भवति, तदा च तस्य सुखं भवति, स च विज्ञानस्वरूपः पुरुषः पर आत्मनि सम्प्रतिष्ठते। अत्रापि सुषुप्त्यवस्था "स्वपिति" इति नाम्नाम्नायते। जीवात्मा स्वस्वरूपे पर आत्मनि प्रतिष्ठां लभत इति उपनिषद्वाक्यादिदं स्पष्टं प्रतीयते यदत्रापि सुषुप्तौ जीवपरमात्मनोरेकत्वमेव निगद्यते।

## १.३ छान्दोग्योपनिषदि सुषुप्तिविचारः

छान्दोग्योपनिषदि (छा.उ) बहुत्र सुषुप्त्यवस्था पर्यालोचिता। अत्र तु केचन विशेषश्लोका उपस्थाप्यन्ते। छान्दोग्योपनिषदि षष्ठेऽध्याये स्वसुनुं श्वेतकेतुमाह उद्दालकस्तत्सकाशात् सुषुप्तिविषयं ज्ञातुम्- "उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति"[१६] इति। अत्रापि सुषुप्त्यवस्था स्वपितिनाम्ना व्यपदिश्यते। प्रसङ्गवशादत्र स्वपितिशब्दस्य अर्थो विचार्यते। अपीतशब्दस्यार्थो लयं प्राप्तो, लीन इति। तेन

---

[१२]प्र.उ ४.२

[१३]प्र.उ ४.६

[१४]प्र.उ ४.६

[१५]प्र.उ ४.९

[१६]छा.उ ६.८.१

स्वपीतिशब्दस्यार्थः स्वस्मिन् लीनो भवतीति समायाति।[१७] सुषुप्त्यवस्थायां पुरुषः सदाख्येन परमात्मना सम्पन्नो भवति, स्वस्मिन् आत्मस्वरूपे लीनो भवतीति अत्र स्फुटतया निगद्यते। किञ्च, जाग्रत्स्वप्नयोर्भ्रमित्वा श्रान्तो जीव उपाधिद्वयरहितो सुषुप्तिमुपैतीति अत्रापि निगद्यते– "स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा बन्धनमेवोपाश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनं हि सोम्य मन इति"[१८] इति।

सुषुप्तौ विशेषविज्ञानाभाव एकीभवनमेव कारणमिति दर्शयति अत्रापि। तथाहि श्रुतिः - "यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान् समवहारमेकतां रसं गमयन्ति। ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह इति"[१९] इति। अत्र केचिद् आक्षेपं कुर्युः- "न विदुः" इति श्रुतिसद्भावाद् अज्ञानं तत्र विद्यते इति ज्ञायते। अतः सुषुप्तौ अज्ञानं नास्तीति वदतां वचनं निरर्थकमिति चेत्।

मन्मते मदमिदं न यथायथमिति भाति। अत्र प्रसङ्गे "न जानाती"ति पदेनाज्ञानसद्भाव ऊहितुं शक्यते न वेति विषये किञ्चिद् विचारणीयम्। "न जानाती"ति पदेन सर्वदा अज्ञानं विद्यते इति मन्मते स्वीकर्तुं न शक्यते। उदाहरणत्वेन स्थलद्वयं प्रदर्शयितुं शक्यते। तथाहि- जीवन्मुक्तः सुषुप्तिं गच्छेच् चेत् तत्र न स किञ्चिज्जानीयात्, तेन तस्य अज्ञानमस्तीति स्वीकरणीयं, यच्चाद्वैतसिद्धान्तविरोधि। निर्विकल्पसमाधावपि त्रिपुटीलयात्तत्र पुरुष आत्मानमेव जानाति, न तु अन्यत्किञ्चिज् जानाति। तेन निर्विकल्पसमाधावप्यविद्यासद्भावः स्वीकरणीयः। परन्तु निर्विकल्पसमाधौ अखण्डकाराचित्तवृत्तिनाशाद् अज्ञानं

---

[१७]भाष्यकारोऽपि एतदेव कथयति- "एषा श्रुतिः स्वपितीत्येतत्पुरुषस्य लोकप्रसिद्धं नाम निर्वक्ति। स्वशब्देनेहात्मोच्यते। यः प्रकृतः सच्छब्दवाच्यस्तमपीतो भवत्यपिगतो भवतीत्यर्थः। अपिपूर्वस्यैतेर्लयार्थत्वं प्रसिद्धम्, प्रभवाप्ययावित्युत्पत्तिप्रलययोः प्रयोगदर्शनात्। मनःप्रचारोपाधिविशेषसम्बन्धादिन्द्रियार्थान्गृह्णंस्तद्विशेषापन्नो जीवो जागर्ति; तद्वासनाविशिष्टः स्वप्नान्पश्यन्मनःशब्दवाच्यो भवति; स उपाधिद्वयोपरमे सुषुप्तावस्थायामुपाधिकृतविशेषाभावात्स्वात्मनि प्रलीन इवेति "स्वं ह्यपीतो भवति इत्युच्यते"। (ब्र.सू.शा.भा.१.१.९)

[१८]छा.उ ६.८.२

[१९]छा.उ ६.९.१,२

सम्पूर्णतया नश्यतीत्येव प्रायः वेदान्तिभिः स्वीक्रियते। अतो यत्र विषयाभावाज् ज्ञानाभावस्तत्र नाज्ञानसद्भावः कल्प्यः, परन्तु यत्र विषयसत्त्वेऽपि ज्ञानं नास्ति तत्रैव "न जानाती"ति पदेन अज्ञानसद्भावो वक्तव्य इति मे मतम्। अतः सुषुप्तौ पुरुषो न किञ्चिदपि न जानातीति कारणात् सुषुप्तावज्ञानमस्तीति वचनं न यथायथम्। अपि च, न हि "सति सम्पद्य न विदुः" इति श्रुतिः सुषुप्तौ अविद्यासद्भावप्रतिपादनार्था किन्तु सदात्मनोरेकत्वप्रतिपादनपरा इति तत्प्रकरणतो ज्ञायते। तेनापि अविद्या विद्यते इति अङ्गीकारः अप्राकरणिकः स्यात्। किञ्च, मधुरसदृष्टान्तेन परमात्मनि एकीभवनमेव विशेषविज्ञानाभावे हेतुरिति स्पष्टं निगदितम्, न तु अज्ञानात्। तेनापि सुषुप्तावविद्याकारणाज्ज्ञानाभाव इति वक्तुं न युज्यते।

पुनरपि सुषुप्तौ अविद्या नास्तीति छान्दोग्योपनिषदि आम्नायते– "अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति। तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति"[२०] इति। अस्मिन् मन्त्रे स्पष्टतया निगद्यते यदवस्थायामस्यां लभ्यते सम्यक् प्रशान्तिरित्यस्मात् सम्प्रसाद इति तस्याभिधानम्। अपि च अवस्थायामस्यां जीवः स्वस्वरूपम् आत्मानं प्राप्नोति, स चात्मा अमृतमभयं ब्रह्म। अतो जीवः परमात्मना एकीभवति अस्यामवस्थायाम्। तेन सुषुप्तावस्थैव जीवपरमात्मनोरभेदावस्था आत्मस्वरूपेणावस्थितिरित्यर्थः।

छान्दोग्योपनिषदि अष्टमाध्यायस्य एकादशे खण्डे इन्द्र-प्रजापतिसंवादाज्ज्ञायते यत् सुषुप्त्यवस्था न इन्द्राय रोचते स्म - "तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेद्ब्रह्मेति। स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति" इति। सुषुप्त्यवस्थायां नान्तरं न च बाह्यं किञ्चिदपि ज्ञातुं शक्यते। किञ्च अहमस्मीति ज्ञानमपि तत्र न जायत इति कारणात्तत्रस्थ आत्मा न ज्ञातुं शक्यते। अतः सुषुप्त्यवस्थायां सम्प्रसन्न आत्मा अमृतमभयं ब्रह्म भवतीति नास्ति प्रमाणम्। तस्मादिन्द्रस्य मनसि पुनः प्रश्नः समुदितः। इन्द्रस्यासन्तोषकारणादत्र कैश्चिदाक्षेप्तुं शक्यते यन्निश्चयेनावस्थेयं न तुरीयावस्थातुल्या, नितरामवस्थायामस्यां शुद्धं ब्रह्म न भासते, अन्यथेन्द्रस्यान्तोषः कथं स्यादिति चेदत्र वक्तुं शक्यते

[२०]छा.उ ८.३.४

यत् सुषुप्त्यवस्थायां जीवः परेण शुद्धेन ब्रह्मणा ऐकात्म्यं प्राप्नोतीति साक्षाद् बह्वीषु उपनिषत्सु आम्नातमित्यस्मात् सुषुप्तौ 'शुद्धं ब्रह्म न भासत' इति विषये न कथञ्चिदपि शङ्कनीयम्। सुषुप्तौ जीवः परेण ब्रह्मणा ऐकात्म्यं प्राप्नोति, मोक्षावस्थायामपि जीवः परेण ब्रह्मणा सहैकतामेतीति विषय उभयोस्तुल्यता विद्यत इत्यङ्गीकरणीयमेव। परन्तु सुषुप्तावपि बीजाकारेण अज्ञानं विद्यते, यच्च मोक्षावस्थायां नास्तीति तयोरवस्थयोर्भेदोऽङ्गीकरणीयः, अन्यथा सुषुप्त्यवस्थायामेव सर्वेषां मोक्षः स्यात्तेन न कश्चिन् मोक्षाय यत्नं कुर्यात् , शास्त्रोपदेशानर्थक्यमपि तत्र प्रसज्येत। अपि च, सुषुप्तौ भासमानमात्मस्वरूपमजानता इन्द्रेण शुद्धात्मप्रतिपत्तये तस्य अनधिकारित्वमेव प्रकटीकृतं, येन आत्मस्वरूपप्रतिपत्तिये पुनर्दीर्घकालं ब्रह्मचर्याय स उपदिष्टः प्रजापतिना। न त्वेतेन सुषुप्तौ शुद्धात्मस्वरूपप्रतिभासो न भवतीति, सुषुप्तावस्था नोत्कृष्टावस्थेति च वक्तुं युज्यते।

## १.४ माण्डूक्योपनिषदि सुषुप्तिविचारः

माण्डूक्योपनिषदि (मा.उ) सुषुप्तिस्थजीवविषये आनन्दमय एकीभूतः प्रज्ञानघन इत्येतानि विशेषणानि प्रयुक्तानि।[२१] सुषुप्तिस्थो जीवस्तत्र प्राज्ञशब्देन व्यपदिश्यते। सुषुप्तिविषये तत्राम्नायते- “यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः”[२२] इति। माण्डूक्योपनिषदि सुषुप्तिविषये यो मन्त्र आम्नायते प्रायस्तत्समान एव मन्त्रो बृहदारण्यकोपनिषदि[२३] अप्याम्नातः। किञ्च, प्राज्ञस्य विशेषणत्वेन यानि पदानि प्रयुक्तानि तानि प्रायशः परब्रह्मणि एव श्रुतौ प्रयुक्तानि सन्दृश्यन्ते। आनन्दमयः सर्वज्ञः सर्वेश्वरः अन्तर्यामीत्यादिविशेषणानि[२४] उपनिषत्सु ब्रह्मण्येव प्रयुज्यमानानि दृष्टानि। अतः सुषुप्तौ ब्रह्म भासते इत्यत्रापि आम्नायते। ननु सुषुप्त्यवस्थामतिरिच्यात्र तुरीयावस्था प्रतिपादिता इत्यस्मात् सुषुप्त्यवस्था न सर्वोत्कृष्टेति केषाञ्चन मतं स्यादिति चेन्न। मतमिदं न यथायथमिति पूर्वमेव विचारितम्। वस्तुतो तुरीयाभिधेया

---

[२१]एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् (मा.उ ६)

[२२]मा.उ ५

[२३]बृ.उ ४.३.१९

[२४]अन्योऽन्तर आत्मा आनन्दमयः (तै.उ-२.२.५), यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि। (मु.उ-२.२.७)

नास्त्यवस्थात्रयव्यतिरिक्ता काचिदवस्था किन्तु अवस्थात्रयानुगतमपि तद्व्यतिरिक्तं शुद्धं ब्रह्मस्वरूपमेव तुरीयत्वेन प्रतिपाद्यमत्र। तेन अवस्थारूपस्य तुरीयस्य नैव श्रुतिप्रतिपाद्यता।

एतदङ्गीकृत्यापि मन्मते सुषुप्त्यपेक्षया तुरीयस्थानस्य किञ्चिद् वैलक्षण्यमस्ति। यद्यपि तुरीयस्य अवस्थात्रयमतिरिच्य न काचिदवस्थेति प्रतिपादिता, तथापि सुषुप्तौ आत्मनो यथा स्थितिस्तद्भिन्ना स्थितिस्तुरीयस्थान इत्यवश्यमङ्गीकार्यम्। ननु सुषुप्तौ तुरीयस्थाने च जीवपरमात्मनोरैक्यमुभयोः समानमिति चेत्, सत्यम्, परन्तु सुषुप्तावपि उपाधिस्तिष्ठतीत्यङ्गीकार्यमन्यथा तुरीयप्रतिपादनस्य वैयर्थ्यमापद्येत। ननु कल्पितप्राज्ञत्वनिषेधेनात्म-स्वरूपकथनार्था त्वेषा माण्डूक्यश्रुतिः, न तु तुरीयस्थानप्रतिपादनार्था। यथा नायं सर्प इति कल्पितसर्पत्वनिषेधेनैव रज्जुस्वरूपं भासते तद्वत् कल्पितप्राज्ञत्वनिषेधेनात्मस्वरूपं तुरीयं प्रकाशते इति चेद् भवतापि तर्हि प्राज्ञस्य कल्पितत्वं स्वीकृतम्। तेन तस्यापि उपाधित्वेनैव प्राज्ञत्वम्, किमसौ उपाधिरिति वक्तव्यम्। ननु नात्र अज्ञानमुपाधिः किन्तु सर्वज्ञत्वादिकमेवेति चेत् तथाप्यविद्यैव वस्तुत उपाधिरिति अन्ततः स्वीकरणीयम्, अविद्यात्मकोपाधिपरिच्छेदापेक्षत्वात् सर्वज्ञत्वस्य।[२५] तेन सुषुप्तौ प्राज्ञस्याविद्यात्मकोपाधिरस्तीति स्वीकार्यम्। तेन सुषुप्तावविद्या विद्यते, न तु सा तुरीयस्थानतुल्येति ज्ञेयम्। तुरीये तु अखिलाज्ञाननाशो भवति।

## २ माण्डूक्यकारिकायां सुषुप्तिविचारः[२६]

प्रसङ्गेऽस्मिन् सुषुप्तिविषये माण्डूक्यकारिकोपस्थापितविचार आलोच्यत्वेनोपस्थापनीयम्। माण्डूक्यकारिकायां गौडपादाचार्यः सुस्पष्टतया निगदति यत् सुषुप्तौ प्राज्ञ आनन्दं भुङ्क्ते, स च कारणबद्धस्तिष्ठति। तथाहि कारिके–

विश्वो हि स्थूलभुङ् नित्यं तैजसः प्रविविक्तभुक्।
आनन्दभुक्तथा प्राज्ञस्त्रिधा भोगं निबोधत॥ (मा.का.१.३)

---

[२५] "तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च, न परमार्थतो विद्यया अपास्तसर्वोपाधिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते" (ब्र.सू.शा.भा.२.१.१४)

[२६] यद्यपि माण्डूक्योपनिषद्भाष्यं तथा माण्डूक्यकारिकाभाष्यं शङ्कराचार्यकृतमिति सम्प्रदायप्रसिद्धं तथापि केचन आधुनिका आचार्या तन्नाङ्गीकुर्वन्तो युक्तिं रचनाशैलीभेदं च प्रदर्शयन्तीत्यतो माण्डूक्योपनिषद्भाष्यान्मया किञ्चिदप्यत्र नोद्धृतम्।

कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः॥ (मा.का.१.११)

प्राज्ञः कारणबद्ध इत्यत्र कारणं किमिति चेदुच्यते तत्रैव कारिकायां यत् कारणं नाम तत्त्वाग्रहणम्। प्रथमत उच्यते प्राज्ञः कारणबद्धः, तत उच्यते बीजनिद्रायुतः प्राज्ञः[२७]। सा च निद्रा किंस्वरूपेति चेदुच्यते– "निद्रा तत्त्वमजानतः"[२८] इति। अतो ब्रह्मस्वरूपाग्रहणाभाव एव तत्त्वाग्रहणशब्देन बोध्यते।

किञ्च सुषुप्तौ प्राज्ञो न किञ्चन संवेत्ति, नात्मानं न च परान्। अतस्तत्त्वाग्रहणात्मकम् अज्ञानं तत्र विद्यत एवेति स्वीकार्यम्। अपि च प्राज्ञः कारणबद्ध इत्युक्तः। तच्च कारणं किम् अभावात्मकं स्यादुत भावात्मकम्? अभावात्मकत्वे अभावेन कस्यचिद् बन्धासम्भवात् कारणबद्ध इति वचनं निरर्थकं स्यात्। अतो भावात्मकेन केनचित् तत्त्वाग्रहणात्मकेनाज्ञानेन प्राज्ञः सुषुप्तौ बद्धस्तिष्ठतीति स्वीकार्यम्। तेन सुषुप्तौ अज्ञानसद्भावः गौडपादाचार्येण स्पष्टतया स्वीकृत इति भाति।

एवं सम्यक्तया विचारे क्रियमाणे सुषुप्तिविषये उपनिषदि मतद्वयं निगदितमिति स्पष्टं प्रतिभाति। प्रथमं तावत्– सुषुप्तौ जीवः परेण ब्रह्मणा एकतां याति; नास्ति तत्र अज्ञानलेशोऽपि; तत्रस्था स्थितिः साक्षाद् ब्रह्मस्वरूपस्थितिरेव। बृहदारण्यकोपनिषत्, प्रश्नोपनिषद्, आंशिकतया छान्दोग्योपनिषच्चैतन्मतं समर्थयन्ति। द्वितीयं मतं तावद्- सुषुप्तौ जीवो न किञ्चन जानाति। अतोऽज्ञानं तत्र विद्यते। तस्मात् सुषुप्तिस्थितिः आत्मस्वरूपेण स्थितिरिति मतं न युक्तम्। अंशतश्छान्दोग्योपनिषन् माण्डूक्योपनिषन् माण्डूक्यकारिका चैतन्मतं समर्थयन्ति। किञ्च, अप्रसिद्धासु कैवल्योपनिषदप्येतन्मतं समर्थयतीति दृश्यते– "सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति" (कै.उ-१३) इति।[२९]

---

[२७]द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः। बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते॥ (मा.का.१.१३)

[२८]अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः। विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते॥ (मा.का.१.१५)

[२९]"अनृतेन हि प्रत्यूढाः", "त इमे सत्याः कामा अनृतापिधानाः", "नीहारेण प्रावृताः" इत्यादिवाक्येषु साक्षाद् अविद्योल्लेखो विद्यते चेदपि तेषाम् अज्ञानस्वरूपादिप्रतिपादने न तात्पर्यं, ज्ञाननिवर्त्यसूचनेनैवोपक्षीणत्वात्। तथाहि मूलाविद्यानिरासे उच्यते– "यथा हि विधिशास्त्रं कर्माणि विदधत्कर्मविधिविषयसत्यत्वप्रतिपादनेऽपि व्याप्रियत इति नोपेयते,

अत्रेदं समुल्लेखनीयं यद् उपनिषदि कुत्रापि भावरूपाविद्या सुषुप्तौ विद्यते इति नाम्नायते। परन्तु माण्डूक्यकारिकायाः सम्यग् विचारे क्रियमाणे अभावरूपैवाविद्या सुषुप्तौ विद्यत इति स्पष्टं बुध्यते। माण्डूक्यकारिकायाः १.११-कारिकायामुच्यते– यद् विश्वस्तैजसश्च कार्यकारणाभ्यां बद्धौ, परन्तु प्राज्ञः केवलं कारणबद्धः। तुरीयश्च न कार्यकारणबद्धः। अत्र कारणं तत्त्वाग्रहणं, कार्यं तु अन्यथाग्रहणम्। तत्त्वाग्रहणं नाम तत्त्वस्य न ग्रहणम्, तत्त्वग्रहणाभाव इत्यर्थः। अतः प्राज्ञो येन कारणेन बद्धस्तदभावात्मकमेव। तेन भावरूपाविद्या सुषुप्तौ न प्रतिपाद्यते, किन्तु अभावरूपैव। परन्तु इदमपि न यथायथमिति भाति। कथम्? तत्त्वाग्रहणाभावः कारणमित्युक्तम्। तत्कार्यं तु अन्यथाग्रहणम्। यदि नाम कारणमभावात्मकं स्यात्तर्हि असत्कारणवादोऽङ्गीकार्यः। न हि कथञ्चिदपि असत्कारणवादो वेदान्तिभिरङ्गीक्रियते। अतो भावरूपैव अविद्या कारणत्वेन अङ्गीकार्या भवति। वस्तुतो अद्वैतसिद्धान्ते अविद्याया भावरूपत्वमपि नास्ति, तस्माद् अभावव्यावर्तकत्वेनैव भावरूपपदस्य तात्पर्यं बोध्यम्। सुषुप्तौ विद्यमानाविद्या नाभावरूपा न च भावरूपा, किन्तु ताभ्यां भिन्ना, अस्माभिर्वक्तुं चिन्तयितुं वायोग्या काचिदिति स्वीकार्यम्।

## ३ उपसंहृतिः

सुषुप्तौ अविद्या विद्यते न वेति विशये साम्प्रदायिकास्तु विद्यत एवेत्यङ्गीकुर्वन्ति। परन्तु प्रसिद्धासु उपनिषत्सु साक्षात् कुत्रापि तदुल्लेखो न विद्यते इति प्रबन्धेऽस्मिन् विस्तरेण दर्शितम्। ईश्वरानन्दस्वामिपादैः स्वकीये God Realization Through Reason इति ग्रन्थे तुरीयसम्प्रसादयोरभेदः स्वीकृतः। मूलाविद्यानिरासग्रन्थे सच्चिदानन्देन्द्रसरस्वत्या मूलं प्रतिपाद्यं तावत् सुषुप्तौ भावरूपाविद्या न विद्यत इति। किञ्च, अविद्येति पदेन तैः सर्वदा अध्यासमात्रं गृहीतम्। तन्मतानुसारेण शङ्करभगवत्पादैरध्यासार्थ एवाविद्याशब्दः प्रयुक्तः सर्वदा। मतमिदं Paul Hacker, Michael Comans इत्यादयः पाश्चात्त्यविद्वांसः समर्थयन्ति।[३०] सच्चिदानन्देन्द्रेणाध्यासरूपाविद्या सुषुप्तौ नास्तीति

---

विधानेनैवोपक्षीणत्वात्। तद्वदत्राप्यज्ञानोपदेशकं वाक्यं ज्ञाननिवर्त्यसूचनेनैवोपक्षीणम्, तस्याज्ञानस्वरूपाश्रयविषयादिप्रतिपादनेऽपि व्यापारो नाङ्गीकार्य इति युक्तमुत्पश्याम"। (मूलाविद्यानिरासः, पत्राङ्कः १७९)

[३०] Paul Hacker स्वकीये Philology and Confrontation: Paul Hacker on Tra-

यत्प्रतिपादितं मन्मते तदङ्गीकर्तुं युक्तमेव, यतो हि अध्यासो नाम मिथ्याज्ञानं सुषुप्तौ नास्त्येव। परन्त्वविद्या नाम केवलमध्यास एवेति मतं यथायथं न वेत्यादावस्माभिः शङ्करभाष्यानुसारेण तत्प्रणीतग्रन्थाननुसृत्य च विचारार्हम्।

✦ ✦ ✦

ditional and Modern Vedanta इति ग्रन्थे, Michael Comans स्वकीये The Method of Early *Advaita Vedānta*: A Study of *Gauḍapāda, Śaṅkara, Sureśvara* and *Padmapāda* इति ग्रन्थे विषयेऽस्मिन् आलोचितवन्तौ।

# समासतत्त्वविमर्शः

सुव्रतमण्डलः*

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम्।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥ १॥
प्रणम्य मनसा सर्वान् शिक्षायनप्रदर्शकान्॥
समासतत्त्वविज्ञानं समक्षमर्प्यते विदाम्॥ २॥

## ०. भूमिका

उपनिषदि यथा द्वैतलेशरहितं सच्चिदानन्दस्वरूपं ब्रह्म परमतत्त्वरूपेण वर्णितं तथैव वैयाकरणदार्शनिकानां नये शब्दतत्त्वं हि तत्परमतत्त्वम्। तथाहि ब्रह्मकाण्डस्यादिम एव श्लोके शब्दतत्त्वं ब्रह्मत्वेनोपवर्णयताचार्येण निगदितम्–

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ इति।

उत्पत्तिविनाशरहितं प्रागभावप्रध्वंसाभावाप्रतियोगि यद्दर्शनान्तरप्रतिष्ठितं ब्रह्म तदत्र व्याकरणदर्शने शब्दतत्त्वमिति प्रतिज्ञायते। यो हि वाग्योगविद् व्यैयाकरणः स हि प्रकृतिप्रत्ययादिरूपविभागं प्राप्ताया वैखर्या वाचः प्रकृतिभूतां प्रतिभाख्यां समनुगच्छति। ततश्च प्रत्यस्तमितसर्वविकारां सत्तामात्रां परां प्रकृतिं प्रतिपद्यते। अयमेव शाब्दिकानामपवर्गः। अतो व्याकरणमेव मुख्यं "द्वारमपवर्गस्य"। तस्य च राजमार्गत्वसूचिका प्रसिद्धा भणितिर्हि–

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥ इति।

"प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नो फलवान् भवति।" इति महाभाष्यकाराणां भणितिः। अनुरूपञ्चोक्तं वाक्यपदीये–

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥ इति।

एवं व्याकरणस्य माहात्म्यं सर्वतो विदितम्। व्याकरणस्य शब्दानुशिष्टिः, शब्दानुशासनं वा मुख्यं प्रयोजनमिति सर्वदर्शनसङ्ग्रहकारेण सङ्गृहीतं पाणिनिदर्शने। तथाहि तेन तत्रोक्तं– "भवति च शब्दसंस्कारो व्याकरणस्य

*शोधच्छात्रः।

प्रयोजनम्। तस्य तदुद्देशेन प्रवृत्तेः। यथा स्वर्गोद्देशेन प्रवृत्तस्य यागस्य स्वर्गः प्रयोजनम्। तस्मात् शब्दानुशिष्टिः संस्कारपदवेदनीया शब्दानुशासनस्य प्रयोजनम्" इति। वस्तुतो नियमो वर्तते– "नापदं शास्त्रे प्रयुञ्जीत" इति। भाषापरिच्छेदकारेण विश्वनाथाचार्येण शाब्दबोधं प्रति पदज्ञानस्य करणत्वं सूचयतोक्तं–

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥ इति।

विभक्तीनां द्वैविध्यात् पदस्यापि द्वैविध्यं– सुबन्तं, तिङन्तञ्चेति। अस्ति च पाणिनीयं सूत्रं– 'सुप्तिङन्तं पदम्' इति। धातुरेव तिङन्तपदानां प्रकृतिः। सुबन्तपदानां ङ्यन्तमाबन्तं प्रातिपदिकञ्चेति प्रकृतित्रयम्। ङीबन्त-ङीषन्त-ङीनन्तानां समासतः ङ्यन्तमिति समाख्या। टाबन्तडाबन्तचाबन्तानाञ्च संक्षेपेणाबन्तमिति समाख्या। नाम्नः प्रातिपदिकस्य हि चतुर्विधा प्रकृतिः– कृदन्तः, तद्धितान्तः, समासः, केवलविशेष्यश्चेति।समासस्य प्रातिपदिकत्वं सूत्रितवन्त आचार्या अष्टाध्याय्यां– 'कृत्तद्धितसमासाश्च' इति।

एवं पदसाधुत्वसाधनाय समासविज्ञानं गुरुत्वावहम्। सन्ति च नैकानि प्रयोजनानि इतोऽपि समासस्य। तथाहि शाब्दिका आमनन्ति– 'ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वञ्च समासप्रयोजनम्' इति। वस्तुतः 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते'। अतः समासस्यैतादृशं गुरुत्वं प्रयोजनीयताञ्च मनसि निधायैव नैके आचार्याः स्वग्रन्थेषु विशेषतः भट्टोजिदीक्षितपादाः प्रक्रियक्रमानुसारिणः स्वकीयायां वैयाकरणसिद्धान्तकौमुद्यां समासविषये विशदतः पर्यालोचितवन्तः। भावाविष्काराय भाषा प्रस्फुटिता सती भाषणेनैव पर्याप्तिमधिगच्छति। कदाचिच्च लिपिबद्धतां याति। तत्र भावगाम्भीर्य-द्योतनायाल्पीयसा शब्देन विशदार्थस्य बोधनाय चानेकभाषाप्रादुर्भावसमकालादेव लोके ख्याता विद्यते। उच्यते च–

विस्तीर्य हि महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत।
इष्टं हि विदुषां लोके समासव्यासधारणम्॥ इति।

वैदिकवाङ्मये संहितापाठस्य पदद्वयात्मकः क्वचिच्चानेकपदात्मकः समस्तपदप्रयोगो दरीदृश्यते। लौकिकसंस्कृतसाहित्येऽपि वाल्मीकिव्यास-कालिदासभवभूतिहर्षदण्डिप्रभृतिभिः तूत्तरोत्तरं समासप्रक्रिया वैदुष्यज्ञापनाय भावगाम्भीर्यद्योतनाय च समादृता दृश्यते। क्वचिच्च वाक्यापेक्षया समासेनार्थावबोधः

सुकरो भवति, यथा– चित्रा गावो यस्य सन्ति, चित्राणां गवां स्वामी वेति वक्तव्ये चित्रगुरिति लघीयः समस्तपदमेव तदर्थबोधक्षमम्। अविग्रहे अस्वपदविग्रस्थले नित्यसमासत्वमुररीकृत्य समासबलेन हि योगरूढानाम् उद्भिद्-मण्डपादिशब्दानां यथार्थबोधो जायते। एवमेव श्रवणसुखकरत्वमोजस्त्वधायकत्वञ्च समासस्य।

समस्तपदस्य विश्लेषणेनैव तन्निहितार्थस्यावबोधः सम्भवति। तादृशं विश्लेषणञ्च विग्रहवाक्येन व्यासवाक्येन वा क्रियते। तथाहि विग्रहशब्दस्य व्युत्पत्तिः प्रदर्श्यते–'विशेषेण ग्राह्यते ज्ञायते वृत्त्यर्थोऽनेनेति विग्रहः' इति। भट्टोजिदीक्षितपादैरप्युदीरितं– 'वृत्त्यर्थावबोधकं वाक्यं विग्रहः' इति। विग्रहवाक्यञ्च द्विविधं लौकिकमलौकिकञ्चेति। वृद्धस्य वचनमित्यत्र लौकिकविग्रहः। वृद्ध ङस् वचन सु इत्यलौकिकविग्रहः। परार्थाभिधानं वृत्तिः। अत्र समासवृत्त्या पदसमूहस्य विशिष्टमेकार्थाभिधानं भवति वृद्धवचनमिति।

समुपसर्गपूर्वकात् सत्तार्थकाद् अस्-धातोः 'समसनमि'ति व्युत्पत्तौ 'भावे' इति सूत्रेण घञि समासशब्दः सिद्ध्यति। 'प्राक्कडारात्समासः' इति सूत्रस्य व्याख्यानवेलायां बालमनोरमाकारेण व्युत्पन्नार्थः समासस्यैवमुपपादितः– "सम्पूर्वकस्यास्यतेरेकीकरणात्मकः संश्लेशोऽर्थः। समस्यतेऽनेकं पदमिति समासः। 'अकर्तरि च कारके संज्ञायाम् ' इति कर्मणि घञ् " इति।

तत्त्वबोधिनीकारेणापि स्वकीयराद्धान्त उपस्थापितः– "समसनं समासः, भावे घञ्। अनेकस्य पदस्यैकपदीभवनमित्यर्थ इत्येके। वस्तुतस्तु अकर्तरि कारके इति कर्मणि घञ्। अन्यथा सुबन्तं समस्यते इत्युत्तरग्रन्थो न संगच्छते।" इति। समासप्रकरणे समस्यते इति वचनं सूत्रार्थकरणवेलायां दरीदृष्टम्। यथा– 'सह सुपा' इत्यत्रोक्तं 'सुबन्तं समर्थेन समस्यते' इति, 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' इत्यत्र चोक्तं वृत्तौ– 'द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते, स तत्पुरुषः' इति।

एवं 'सुबन्तं समस्यते', 'द्वितीयान्तं समस्यते' इत्याद्यर्थलाभाय कर्मघञन्तः समासशब्दोऽत्र ग्राह्य इति तत्त्वबोधिनीकाराणां मतम्।पदमञ्जरीकारेण समासस्यान्वर्थसंज्ञात्वं स्वीकृतम्। समस्यतेऽस्मिन्निति व्युत्पत्तौ 'हलश्च' इति सूत्रेणाधिकरणे घञ् तेन स्वीकृतः।

पदद्वयसम्मेलने द्विधा शक्तेः परिकल्पना दृश्यते। अस्मिन्विषये तत्त्वबोधिनीकारेण 'समर्थः पदविधिः' इत्यस्यालोचनावसरे उक्तं– 'सामर्थ्यञ्च द्विविधं– व्यपेक्षालक्षणमेकार्थीभावलक्षणञ्चेति। तत्र स्वार्थपर्यवसायिनां

पदानामाकङ्क्षादिवशाद्यः परस्परसम्बन्धः सा व्यपेक्षा। सैव वाक्ये राज्ञः पुरुष इत्यादौ। ...एकार्थीभावस्तु राजपुरुष इत्यादिवृत्तावेव' इति।

पदविधिरित्यत्र विधिग्रहणं तु पदस्य विधिः, पदयोर्विधिः, पदानां विधिरित्यनेकविभक्त्यन्तसमासलाभार्थम्। पदस्येत्युक्तौ तु 'उपपदमतिङ्' इत्यादावेवास्योपस्थितिः स्यात्। पदविधिश्च समाससंज्ञादिः। तस्य च न सामर्थ्यं साक्षाद् विशेषणम् असम्भवात्|eng , समर्थाश्रिते लक्षणां विधाय कार्यं भवति। तच्च सामर्थ्यमेकार्थीभावरूपं न तु व्यपेक्षारूपं, समासादिषु तु व्यपेक्षाया असम्भावात्। स चैकार्थीभावो विशेष्यविशेषणभावावगाह्युपस्थितिजनकत्वं, 'संसृष्टार्थं समर्थमि'ति भाष्योक्तेः।

भर्तृहरिणाप्युक्तं–

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।
बहूनां वृत्तिधर्माणां वचनैरेव साधने।
स्यान्महद्गौरवं तस्मादेकार्थीभाव इष्यते॥ इति।

## १. समासलक्षणम्

'लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः'इत्यस्ति सुप्रसिद्धा भणितिः। पदत्वसाधनाय तथैकपद्यैकस्वर्यैकविभक्तिकत्वनिष्पादनाय समासो हि गुरुत्वावह इति पूर्वमेवालोचितः। ननु समाससिद्धये किं लक्षणमिति समासं लक्षयति शब्दशक्तिप्रकाशिकायां समासप्रकरणे–

याद्दशस्य महावाक्यस्यान्तस्त्वादिनिजार्थके।
याद्दशार्थस्य धीहेतुः स समासस्तदर्थकः॥ इति।

यस्य महावाक्यस्य एकाधिकनामलभ्यार्थकशब्दस्य वान्ते यौ त्वतलौ प्रत्ययौ तयोर्योऽर्थो भावः, स चेत् समग्रेण महावाक्येन विशेषितः स्यात्तर्हि तत्र समासोऽवगन्तव्यः। किन्तु यस्मिन् वाक्य उपर्युक्तप्रत्ययस्यार्थो महावाक्यस्यैकदेशेन विशेषितो भवति तत्र समासाभावो बोध्यः। तथाहि– राज्ञः पुरुषः, राजपुरुषश्चेति महावाक्यद्वयम्। तत्रादौ त्वप्रत्यययोगेन राज्ञः पुरुषत्वमिति सिद्ध्यति। अत्र त्वप्रत्ययान्तपदं समग्रस्य वाक्यस्यार्थप्रत्यायकत्वं न भवति। अतस्तत्र समासो नास्तीति विज्ञेयः। किन्तु द्वितीयवाक्ये त्वप्रत्यययोगेन राजपुरुषत्वमिति सिद्ध्यति। अत्र तु त्वप्रत्ययविहितभावः समग्रेण विशेषितो भवति। अतोऽस्त्यत्र समास इति विज्ञेयः। सारस्वतसम्प्रदायस्य नये समासघटकपदानां

विभक्तिलोपे सत्यपि, यत्र लुप्तविभक्तेरर्थो विद्यमानस्तिष्ठति तादृशसार्थकपदानाम् एकपदीभाव एव समासः। तथाह्युच्यते तत्र–

विभक्तिर्लुप्यते यत्र तदर्थस्तु प्रतीयते।
ऐक्यपद्यं पदानाञ्च स समासोऽभिधीयते॥ इति।

समासाधिकारपठितत्वं समासत्वमिति पाणिनीयाः। 'प्राक्कडारात्समासः' इति शास्त्रमेव तत्र प्रमाणपदवीमारोहति। तथाहि– प्राक्कडारात्समास इत्यधिकारपठितसंज्ञात्वं समासत्वमिति फलितं भवति।

## २. समासभेदाः

'मुण्डे मुण्डे मतिर्भिन्ना'। दृष्टिभेदानुसारं समासस्य नैके भेदाः सम्भवन्ति। विषयेऽस्मिन् शाब्दिकशौण्डानाम् अन्येषाञ्चाचार्याणां मतान्यधस्ताद् उपस्थाप्यन्ते–

**प्रथमतः**– विभक्तेर्लुगलुग्भेदेन समासो द्विधा, लुक्समासोऽलुक्समासश्च। लुक्समासो नाम यत्र समासे विभक्तेः लोपः भवति। यथा– दिशयोर्मध्ये अपदिशम् (अव्ययीभावः), दुःखमतीतो दुःखातीतः (तत्पुरुषः), पीतमम्बरं यस्य स पीताम्बरो हरिः (बहुव्रीहिः), हरिश्च हरश्च हरिहरौ (द्वन्द्वः) चेत्यादिकम्।

अलुक्समासे हि पूर्वपदस्थविभक्तेर्लोपो न भवति। तथापि तत्समस्तपदमेव। यथा– पुंसानुजः, मनसादेवी, जनुषान्धः, हस्तिनापुरं (तृतीयातत्पुरुषः); परस्मैपदं, परस्मैभाषा, आत्मनेपदं (चतुर्थीतत्पुरुषः); स्तोकान्मुक्तः, दूरादागतः (पञ्चमीतत्पुरुषः) इत्यादिकम्।

**द्वितीयतः**– केचन 'नित्योऽनित्ये विकल्पश्च समासः कर्तुरिच्छया' इति समर्थाश्रितपदविधेः त्रिधा विभागं कुर्वन्ति। तथाहि तेषां नये - 'क्वचिन्नित्यः क्वचिद्विकल्पः क्वचिन्न स्यात् ' इति।

'क्वचिन्नित्यः' नाम यत्र समासस्य विग्रहवाक्यं न सम्भवति। यथा– कृष्णसर्पः, देवानाम्प्रियः, लोहितशालि इत्यादिषु। 'क्वचिद्वकल्पः' इत्यनेन समासस्य वैकल्पिकत्वं सूच्यते। यथा– हरिश्च हरश्च जयति, हरिहरौ जयतो वा (द्वन्द्वः); चत्वारो भुजा यस्य तस्मै नमः अथवा चतुर्भुजाय नमः (बहुव्रीहिः); नीलमुत्पलमिदं नीलोत्पलमिदं वा (कर्मधारयः) इत्येवं प्रत्येकत्र समासे विकल्पभावो दरीदृश्यते। 'क्वचिन्न' इत्यनेन केषुचित्स्थलेषु समर्थपदानामेकपदीकरणमनीप्सितमिति द्योत्यते।

यथा– रामो जामदग्न्यः, व्यासः पाराशर्य्यः इत्यादिषु।

**तृतीयतः**– वाभटादिप्राचीनवैयाकरणानां मतावलम्बनपूर्वकं जगदीशतर्का-लङ्काराचार्येण पदप्राधान्यभेदेन समासो पञ्चधा विभाजितः। तथाहि शब्दशक्तिप्रकाशिकायामुक्तं–

'पूर्वमध्यान्त्यसर्व्वान्यपदप्राधान्यतः पुनः।
प्राच्यैः पञ्चविधः प्रोक्तः समासो वाभटादिभिः॥' इति।

अतः– पूर्वपदप्रधानः, मध्यपदप्रधानः, अन्त्यपदप्रधानः, सर्वपदप्रधान-स्तथान्यपदप्रधान इति समासः पञ्चविधः। तत्पुरुषादिविभागेन सह एतेषां विभागानां सम्बन्धस्तैर्वाभटादिभिराचार्यैर्नोपकल्पितः। पृथक्तयैव ते विभागा उल्लिखिताः। तेषामुदारहरणानि क्रमादुपस्ताप्यन्ते, पूर्वपदप्रधानसमासो यथा– जायां प्राप्तः प्राप्तजायः, अर्द्धं पिप्पल्या, पूर्वं कायस्य पूर्वकायः (सूत्रतः तत्पुरुषः); कुम्भस्य समीपम् उपकुम्भं (सूत्रतोऽव्ययीभावः); पुरुषः सिंह इव पुरुषसिंहः (सूत्रतः कर्मधारयः) इत्यादिषु। मध्यपदप्रधानसमासस्योदाहरणं तावत् पटस्य नाधिकरणमिति पटानाधिकरणं (पटाधिकरणभिन्नमित्यर्थः), प्रतियोगितानवच्छेदकमित्यादिकम्। अन्त्यपदप्रधानसमासः राज्ञःपुरुषो राजपुरुषः, द्वौ गार्ग्यौ द्विगार्ग्यं, शाकस्य लेशः शाकप्रति, सप्तानां गङ्गानां समाहारः सप्तगङ्गमित्यादिषु दृष्टः। सर्वपदप्रधानसमासस्योदाहरणं तावत्– युधिष्ठिरार्जुनौ (सूत्रत इतरेतरद्वन्द्वः) गोव्याघ्रं (सूत्रतः समाहारद्वन्द्वः) इत्यादिकम्। अन्यपदप्रधानसमासः खले उलुखले यवाः क्षिप्यन्ते यस्मिन्काले तत् खलेयवं, लोहिता गङ्गा यस्मिन्निति लोहितगङ्गं नाम देशः, उष्ट्रमुखमिव मुखं यस्य स उष्ट्रमुख इत्यादिषु दरीदृश्यते।

शब्दतत्त्वानुसारमुपर्युक्तविभागोऽयमनवद्यः। परन्तु वाभटविरचितस्य व्याकरणग्रन्थस्य लुप्तत्वात् सम्प्रदायोऽपि विनष्टः।

**चतुर्थतः**– केषाञ्चन शाब्दिकानां मते कर्मधारायादिभेदेन समासः षड्विधः। यथा–

द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च।
पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः॥ इति।

अनुरूपमेवोक्तं जगदीशतर्कालङ्कारमहाभागेन स्वकीयायां शब्दशक्ति-प्रकाशिकायां– 'स चायं षड्विधः कर्मधारायादिप्रभेदतः' इति।

प्रयोगरत्नमालायामपि षड्विधत्वं समासस्याङ्गीकरोति–

कर्मधारय आद्य स्याद्द्विगुस्तत्पुरुषोऽपरः।
बहुव्रीहिरथ द्वन्द्वोऽव्ययीभावः षडीरिताः॥ इति।

तेषां लक्षणविषयेऽप्युक्तं–

पूर्वेऽव्ययेऽव्ययीभावोऽमादौ तत्पुरुषः स्मृतः।
चकारबहुलो द्वन्द्वः सङ्ख्यापूर्वो द्विगुः स्मृतः॥
यस्य येन बहुव्रीहिः स चासौ कर्मधारयः।
इति किञ्चित्समासानां षण्णां लक्षणमीरीतम्॥ इति।

**पञ्चमतः**– केषाञ्चन नये साङ्गोपाङ्गः समासो हि सप्तविधः। तथाहि श्रूयते लौकिकाभाणकः–

द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुषः कर्मधारय येनाहं स्यां बहुव्रीहिः॥ इति।

समाससप्तवादिनां मध्ये केचन तु नित्यसमासस्य स्थाने उपपदसमासं स्वीकुर्वन्ति। तथाहि शब्दशक्तिप्रकाशिकायामालिखितं–

यश्चोपपदसंज्ञोऽन्यस्तेनासौ सप्तधा मतः। इति।

**षष्ठतः**– केचन शाब्दिका अवान्तरभेदाश्रयपूर्वकं समासस्याष्टाविंशतिप्रकारं स्वीकुर्वन्ति। तथाह्युक्तं वाररुचसंग्रहे–

तत्राष्टधा तत्पुरुषः षड्विधः कर्मधारयः।
षड्विधश्च बहुव्रीहिर्द्विगुराभाषितो द्विधा॥
द्वन्द्वश्चतुर्विधो ज्ञेयोऽव्ययीभावो द्विधा मतः॥ इति।

तथाहि तत्राष्टधा तत्पुरुषो यथा– प्रथमातत्पुरुषः, द्वितीयातत्पुरुषः, तृतीयातत्पुरुषः, चतुर्थीतत्पुरुषः, पञ्चमीतत्पुरुषः, षष्ठीतत्पुरुषः, सप्तमीतत्पुरुषः, नञ्तत्पुरुषश्चेति। षड्विधः कर्मधारयो यथा– सामान्यः, विशेषः, कुत्सितपूर्वपदः, उपमानपूर्वपदः, उपमितपूर्वपदः, वर्णोभयपदश्चेति। षड्विधो बहुव्रीहिर्यथा तद्गुणसंविज्ञानः, अतद्गुणसंविज्ञानः, संख्योत्तरपदः, अन्तरालाभिधेयकः, सरूपोपलक्षितः, सहपूर्वपदश्चेति। द्विगुर्द्विधा– एकवद्भावोऽनेकवद्भावश्चेति। द्वन्द्वश्चतुर्विधो यथा– द्विपदेतरेतरः, बहुपदेतरेतरः, द्विपदसमाहारस्तथा बहुपदसमाहारः। अव्ययीभावो द्विधा– अव्ययपूर्वपदनामपूर्वपदभेदेन।

वस्तुत एतेषामवान्तरभेदानामालोचनं सर्वत्र न स्वीकृतम्। तथापि वारुरुचिमहाभागेन प्रमाणपुरुषेण कृतत्वादेते विभागा आलोच्यन्ते बहुत्र। वस्तुतस्तु समासचतुष्टयवादः समधिकः प्रसिद्धः। तथाहि भट्टोजिदीक्षितपादैः स्वकीयवैयाकरणसिद्धान्तकौमुद्यां समासप्रकरणे यथाक्रमम्– अव्ययीभावप्रकरणं, तत्पुरुषसमासप्रकरणं, बहुव्रीहिसमासप्रकरणं, द्वन्द्वसमासप्रकरणञ्चेति समास-चतुष्टयस्यालोचना विहिता। तत्र प्रसङ्गादेतेऽवान्तरभेदा अपि समुत्थिताः। समासप्रकरणस्यान्तिमचरणे च तैः एकशेषप्रकरणं, सर्वसमासशेषप्रकरणं, सर्वसमासान्तप्रकरणम् , अलुक्समासप्रकरणञ्चेत्यादीनामालोचना विहिता। अधुना समासचतुष्टयस्य वैशिष्ट्यमालोच्यतेऽधस्तात्समासतः–

**२.१.अव्ययीभावसमासः–** 'अनव्ययस्य अव्ययत्वेन भवनम् अस्मिन् एकार्थीभावे इति अव्ययीभावः'। एकाधिकपदेन एकार्थीभावे समस्तपदस्याव्ययत्व-प्राप्तिश्चेत्तस्याव्ययीभावसमासत्वम्। तथाहि 'अव्ययीभावः'(२-१-५) इति सूत्रस्यालोचनावसरे महाभाष्यकारेणोक्तम्– 'अनव्ययमव्ययं भवतीत्यव्ययीभावः' इति। अव्ययीभावस्य लक्षणविषये शब्दशक्तिप्रकाशिकायामुक्तं–

उत्तरार्थान्वितस्वार्थाव्ययपूर्वस्तु यो भवेत्।
समासः सोऽव्ययीभावः स्त्रीपुंलिङ्गविवर्जितः॥ इति।

यस्य समस्तपदस्य पूर्वपदमव्ययं, तदर्थश्चोत्तरपदेनान्वितो भवति, सोऽव्ययीभावसमासः। परन्त्वेतल्लक्षणं 'निर्मक्षिकम् ' इत्यादावुपयुक्तमपि शलाकापरि, द्विमुनि, लोहितगङ्गम् इत्यादिष्वव्याप्तम्।

प्राचीनानां 'पूर्वपदार्थप्रधानोऽव्ययीभावः' इति लक्षणस्वीकारेऽपि– सूपप्रति, संहृतयवमित्यादौ उत्तरपदस्यान्यपदस्य प्राधान्यत्वाद् अव्ययीभावसमासत्वेऽपि उक्तलक्षणस्याव्याप्तिः। तद्दोषनिवारणं प्रयोगरत्नमालायामेवं–

सोऽव्ययीभावो यत्र नानाविभक्तिष्वेकरूपता।
अयं पूर्वोत्तरान्यार्थमुख्योऽव्ययं समस्यते॥ इति।

सूत्रकारेण 'अव्ययीभावः'(२-१-५) इत्यधिकारसूत्रेणसंज्ञाविधानं विधाय 'अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथा-नुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु' (२-१-६) इत्यदिभिः सूत्रैः विशेषविधानान्यालोचितानि। अस्मिन्सूत्रे मध्यार्थस्य ग्रहणं नास्ति। किन्तु मध्यार्थे 'दिशयोर्मध्ये' अपदिशम् इत्यादयः शिष्टप्रयोगाः दृश्यन्ते। तद्दोषनिवारणाय

पाणिनीयैः 'अव्ययम्' इति पदे योगविभागो विहितः। भट्टोजिदीक्षित-पादैस्तथाह्यालिखितं- "'अव्ययमि'ति योगो विभज्यते। अव्ययं समर्थेन सह समस्यते। सोऽव्ययीभावः" इति।

अव्ययपूर्वपदं, नामपूर्वपदञ्चेत्यव्ययीभावस्य विभागद्वयं कैश्चनाचार्यैः व्यवस्थापितम्। अव्ययपूर्वपदं यथा– आपाटालिपुत्रं वृष्टो देवः (आङ्मर्यादाभिविध्योः पा०२-१-१३); अभ्यग्नि प्रत्यग्नि वा शलाभाः पतन्ति (लक्षणेनाभिप्रती आभिमुख्ये पा०२- १-१४) इत्यदिषु।नामपूर्वपदं यथा– शाकप्रति (सुप्प्रतिना मात्रार्थे पा०२-१-१०); तिष्ठद्गु (तिष्ठद्गुप्रभृतीनि च- पा०२-१-१७ ) इत्यदिषु।

**२.२. तत्पुरुषसमासः**– द्वितीयादिविभक्त्यन्तेन पदेन सह सुबन्तपदस्य यः समासः स हि तत्पुरुषसमासः। तथाह्युक्तं चाङ्गुदासमहाभागेन स्वकीये चाङ्गुसूत्रे–

समस्यन्ते द्वितीयाद्या नामापरपदेन यत् ।
स तत्पुरुष इत्युक्तो यत्परं तत्परं बहु॥ इति।

विग्रहवाक्ये यथा द्वितीयाद्यन्तपदं पूर्वम्, अन्यच्च सुबन्तपदं परं तिष्ठति समस्तपदेऽपि तथैव पौर्व्यापर्यविन्यासः प्रायशो दृश्यते। क्वचिद्व्यभिचारोऽपि दृष्टः। तस्माल्लक्षणे 'यत्परं तत्परं बहु' इत्यत्र बह्विति पदमुपयुक्तम्।

कातन्त्रे च तल्लक्षणमुक्तं–

विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु।
समस्यन्ते समासो हि ज्ञेयस्तत्पुरुषः स च॥ इति।

तत्पुरुषस्य लक्षणविषये– 'उत्तरपदप्रधानस्तत्पुरुषः' इति प्राचीनानाम् अभिमतम्। परन्तु पूर्वकाय इत्यादिषु दृश्यते नियमस्यास्य व्यत्ययः। तद्दोषनिवारणाय जगदीशतर्कालंकारेण शब्दशक्तिप्रकाशिकायामुक्तं–

यदीयेन सुबर्थेन युतं यद्बोधनक्षमः।
यः समासस्तस्य तत्र स तत्पुरुष उच्यते॥ इति।

तत्पुरुषस्य विभागविषये दृश्यन्ते विप्रतिपत्तयः। जगदीशाचार्यस्य नये तत्पुरुषः षड्विधः। तथाहि तेन निगदितं–

द्वितीयादिसुबर्थस्य भेदादेव च षड्विधः।
क्रियान्वयि द्वितीयादेरर्थः प्रायोऽत्र योजितः॥ इति।

केचन तु एतैः सह प्रथमातत्पुरुषं नञ्तत्पुरुषञ्च योजयित्वाष्टविधः

तत्पुरुषसमास इति वदन्ति। द्वितीयादेरिव प्रथमाया अपि नामोल्लेखपूर्वकं सूत्रविरचनं संक्षिप्तसारे समासपादे कृतम्– 'अंशिषष्ठ्या पूर्वादेः प्रथमायाः' इति। यस्मिंस्तत्पुरुषसमासे विग्रहस्थप्रथमान्तपदस्य समस्तावस्थायां पूर्वनिपातो दृश्यते स हि प्रथमातत्पुरुषः। यथा कायस्य पूर्वं पूर्वकायः('पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे'- पा०२-२-१); पिप्पल्या अर्द्धम् अर्द्धपिप्पली ('अर्द्धं नपुंसकम् ' -पा०२-२-२) इत्यादिकमत्रोदाहरणम्। केचनाचार्यास्तत्पुरुष एकदशधा इति वदन्ति। ते च विभागाः–१. द्वितीयातत्पुरुषः२. तृतीयातत्पुरुषः३. चतुर्थीतत्पुरुषः ४. पञ्चमीतत्पुरुषः ५. षष्ठीतत्पुरुषः ६. सप्तमीतत्पुरुषः ७.एकदेशितत्पुरुषः ८. नञ्तत्पुरुषः ९. उपपदतत्पुरुषः १०. प्रादितत्पुरुषः ११. गतितत्पुरुषश्चेति।

तत्पुरुषविशेषो हि कर्मधारयः। यस्मिंस्तत्पुरुषसमासे समस्यमानपदद्वयस्य सामाधिकरण्यं दृश्यते स हि कर्मधारयः। अस्ति च पाणिनीयं सूत्रं - 'तत्पुरुषः समानाधिकरणः कर्मधारयः'(१-२-४२) इति। रामश्चासौ ईश्वरश्च रामेश्वरः इत्यत्र रामः ईश्वरश्चैकमेव आधारमाधारीकृत्य विद्येते तस्मात्तस्य कर्मधारयत्वम्। अधिक्रियेते गुणकर्मणी अस्मिन्नित्यधिकरणम्। सामानाधिकरण्यं नाम एकार्थता। सामान्याधिकरण्यं प्रायशः विशेष्यविशेषणभावापन्नयोः पदयोः दृश्यते इति चाङ्गुदासः सूचयति–

विशेषणं विशेष्येणाप्येकार्थं यदि तद्वयम्।<br>
स कर्मधारयस्तस्मिन्प्रायः पूर्वं विशेषणम् ॥ इति।

परन्तु विधेय विशेषणस्य कर्मधारयसमासो न भवति। यथा रामं दशरथं विद्धि इत्यादौ। प्रयोगरत्नमालायां समासविन्यासे तथाहि सूत्रितं - 'न विधेयैः' इति। प्रकारभेदेन कर्मधारयः षड्वा विभक्तः–१.साधारणकर्मधारयः२.रूपककर्मधारयः ३. उपमानकर्मधारयः ४. उपमितकर्मधारयः ५. मध्यपदलोपी शाकपार्थिवादिकर्मधारयो वा ६. मयूरव्यंसकादिकर्मधारयश्चेति।

कर्मधारयविषयो हि द्विगुः। यस्मिंस्तत्पुरुषसमासे समस्यमानसमानाधिकरणपदयोः पूर्वपदं संख्यावाचकं भवति स हि द्विगुसंज्ञको भवति। द्वाभ्यां गोभ्यां क्रीतः इति द्विगुः। संख्यावाचकशब्दस्य पूर्वमुपयोगात्समासस्य तादृशी पूर्वाचार्याणां संज्ञा। अस्ति च पाणिनीयं सूत्रं– 'संख्यापूर्वो द्विगुरि'ति (२-१-५२)। 'तद्धितार्थोत्तरपदसमाहारे च'(२-

१-५१) इत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्विगुः स्यादित्यर्थः। एतेन द्विगुसमासस्य विभागत्रयमप्युपलभ्यते। द्विगुलक्षणञ्च शब्दशक्तिप्रकाशिकायां निगदितं–

सङ्ख्या शब्दयुतं नाम तदलक्ष्यार्थबोधकम्।
अभेदेन च यत्स्वार्थे स द्विगुस्त्रिविधो मतः॥ इति।

एवं तद्धितार्थः, समाहारः, उत्तरपदञ्चेति द्विगुसमासस्य प्रकारत्रयम्। तद्धितार्थे– षण्णां मातृणामपत्यं षाण्मातुरः, द्वाभ्यां गोभ्यां क्रीतः द्विगुः इत्यादीनि; समाहारे पञ्चानां गवां समाहारः पञ्चगवम् इत्यादीनि; उत्तरपदे– पञ्च गावो धनं यस्य पञ्चगवधनः इत्यादीनि चेहोदाहरणानि । केचनाचार्या एकवत्तथा अनेकवद्भावेन द्विगुर्द्विधा इति निर्देशितवन्तः। एकवद्भावे– पञ्च पूलाः समाहृताः पञ्चपूली इत्यादीनि। अनेकवद्भावे यथा– पञ्चकपालः, पञ्चकपालौ, पञ्चकपालाः चेत्यादीनि इहोदाहरणानि।

वस्तुतः 'द्विगुरेकवचनम् ' (२-४-१) इति पाणिनीयसूत्रानुसारं द्विग्वर्थः समाहार एकवद्भवति। किञ्च समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यादित्यनेन 'स नपुंसकम् '(२-४-१७)इति सूत्रेण तस्य नपुंसकत्वप्राप्तिरपि भवति।

२.३. **बहुव्रीहिसमासः**– पदयोः पदानां वा समासे समस्तपदे यदि पदान्तरस्यार्थप्राधान्यं दृश्यते तर्हि तत्र बहुव्रीहिसमासो बोध्यः। अथ प्राचीनैर्निगदितम्–'अन्यपदार्थप्रधानो बहुव्रीहिः' इति। कातन्त्रे च सूत्रितं–

स्यातां यदि पदे द्वे तु यदि वा स्युर्बहून्यपि।
तान्यन्यस्य पदस्यार्थे बहुव्रीहिर्विदित्तथा॥ इति।

चाङ्गुदासेनाप्युक्तं– 'यत्रानेकं परस्यार्थे बहुव्रीहिः स उच्यते' इति। अतिव्याप्तिदोषयुक्तत्वाल्लक्षणमिदं न निर्दुष्टम्। कारणं हि - 'आयतीगवम् ', 'लोहितगङ्गम् ' इत्यादिषु अन्यपदप्रधानरूपबहुव्रीहिलक्षणस्य विद्यमानत्वेऽपि 'तिष्ठद्गुप्रभृतीनि च' (२-१-१७), 'अन्यपदार्थे च संज्ञायाम् ' (२-१-२१)इत्यादिसूत्रबलात् तत्सर्वमव्ययीभावसमासान्तर्गतम्। उक्तदोषपरिहारार्थं पाणिनिना 'शेषो बहुव्रीहिः' (२-२-२३) इत्युक्त्वा अव्यवहितोत्तरमेव 'अनेकमन्यपदार्थे' (२-२-२४) इति सूत्रितम्। शेषशब्दस्यार्थो हि अनुक्तावशिष्टांशः। भाष्यकारेण भाषितं– 'शेष इत्युच्यते, कः शेषो नाम। येषां पदानामनुक्तः समासः स शेषः' इति। हरदत्तेनेतोऽपि स्पष्टतयोक्तं– 'येषां पदानां यस्मिन्नर्थेऽव्ययीभावादिसंज्ञकःसमासो न विहितः स शेष इत्यर्थ' इति। पाणिनिना

सूत्रितस्य– ‘अनेकमन्यपदार्थे’ इति सूत्रस्य वृत्तावाह भट्टोजिदीक्षिताचार्यः सिद्धान्तकौमुद्याम्– ‘अनेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः’ इति। तल्लक्षणञ्चोक्तं शब्दशक्तिप्रकाशिकायां–

बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन बोधकः।
निरूढया लक्षणया स्वांशज्ञापकशब्दवान॥ इति।

बहुव्रीहिसमासस्य भेदविषये दृश्यन्ते विप्रतिपत्तयः। जगदीशाचार्यस्य नये स हि बहुविधः। तथाहि शब्दशक्तिप्रकाशिकायां तेनोक्तं–

स्वान्तर्निविष्टद्वित्रादिनामभिर्विग्रहात्पुनः।
बहुव्रीहिर्बहुविधो द्विपदत्रिपदादिकः॥ इति।

तद्गुणसंविज्ञानमतद्गुणसंविज्ञानञ्चेति प्रकारद्वयं बहुव्रीहेः सूच्यते–

तद्गुणोऽतद्गुणश्चेति बहुव्रीहेर्द्विधा मतः।
प्रथमो लम्बकर्णः स्याद्द्वितीयो दृष्टसागरः॥ इति।

एकक्रियान्वयित्वेन वृत्तिघटकपदार्थविशिष्टान्यपदार्थवाचकत्वं तद्गुण-संविज्ञानबहुव्रीहित्वम्। यथा लम्बकर्णमानय इत्यादिकम्। एकक्रियान्वयित्वेन वृत्तिघटकपदार्थान्यपदार्थवाचकत्वम् अतद्गुणसंविज्ञानबहुव्रीहिसमासत्वम्। यथा दृष्टसागरमानय इत्यादिकम्। अन्ये च केचन समानाधिकरणव्यधिकरणभेदेन बहुव्रीहिसमासद्वैधमुपपादितवन्तः। यस्मिन्बहुव्रीहिसमासे समस्यमानपदानां यदा एक एवाधेयपदार्थः, यत्र च पदानां परस्परं बोध्यबोधकभाव आश्रयाश्रयिभावो वा दृश्यते स हि समानाधिकरणबहुव्रीहिः। यथा पीतमम्बरं यस्य स पीताम्बरः। अत्र पीतत्वमम्बरत्वं चैकस्मिन्नाधारे वर्तत इति समानाधिकरणबहुव्रीहिः। व्यधिकरणबहुव्रीहौ समस्यमानपदानामभिधेयो भिन्न एव। शूलं पाणौ यस्य स शूलपाणिः इत्यादिकमत्रोदारणम्। किञ्चान्यत्र– नञ्बहुव्रीहिः, प्रादिबहुव्रीहिः, दिग्बहुव्रीहिः, संयोगबहुव्रीहिः, शेषबहुव्रीहिः इत्यादयोऽपि भेदा अस्य समासस्योपलभ्यन्ते।

**२.४.द्वन्द्वसमासः–** एकाधिकविशेष्यपदानां मिलनेऽपि यत्र समासे प्रत्येकेषामर्थः प्रधानरूपेण प्रतीयते स हि द्वन्द्वसमासः। प्राचीना ऊचुः– ‘सर्वपदार्थप्रधानो द्वन्द्वः’। कातन्त्रे चोक्तं– ‘द्वन्द्वः समुच्चयो नाम्नोर्बहूनां वापि यो भवेत् ’ इति। पाणिनिना चार्थे द्वन्द्वसमासो विहितः। तथाहि तेन सूत्रितं– ‘चार्थे द्वन्द्वः’(२-२-२९) इति।अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते, स द्वन्द्व इति

तदर्थः।

तस्य भेदविषये शब्दशक्तिप्रकाशिकायां जगदीशतर्कालङ्कारमहाभागैरुक्तं–

द्वौ भेदावस्य शास्त्रोक्तौ समाहारेतरेतरौ।
एकान्यवचनाकाङ्क्षा हानोपादानतश्च तौ॥ इति।

यदा समासे विद्यमानाः सर्वा अपि संज्ञाः स्वकीयं प्रधानत्वं पृथक्पृथग्रूपेणोपस्थापयन्ति, तदेतरेतरयोगद्वन्द्वसमासो भवति। यथा– शिवश्च केशवश्च शिवकेशवौ, रामश्च लक्ष्मणश्च रामलक्ष्मणौ इत्यादिकम्।

द्वन्द्वसमासे यदा समागताः सर्वा अपि संज्ञाः स्वकीयमर्थं बोधयत्यः समाहारस्य बोधं कारयन्ति तदा समाहारद्वन्द्व इति व्यवहारो भवति। यथा– पाणी च पादौ च पाणिपादमित्यादिकम्। अयं समाहारद्वन्द्वसमासः प्रायः शरीरावयवानां परस्परविरोधयुक्तपदार्थानां मध्ये भवति। समस्तपदे नपुंसकलिङ्गमेकवचनञ्च भवति।

किञ्च, 'सह सुपा' (२-१-४) इति पाणिनीयसूत्रस्य व्याख्यानवेलायां योगविभागद्वारा समासस्य षड्विधत्वमन्यथा कैश्चिच्छाब्दिकैरुपपादितम्। तथाह्युच्यते–

सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥ इति।

**सुपां सुपा** इत्यस्यार्थो हि सुबन्तेन सुबन्तस्य समासः, यथा राजपुरुषः इत्यादिषु। राज्ञः पुरुष इति विग्रहे 'षष्ठी' इत्यनेन षष्ठीतत्पुरुषसमासः पाणिनिना विहितः।

**सुपां तिङा** नाम तिङन्तेन सुबन्तस्य समासः, यथा– पर्यभूषत् , अनुव्यचलत् इत्यादिषु।

**सुपां नाम्ना** इत्यनेन नाम्ना सह सुबन्तस्य समासो द्योत्यते। कुम्भकार इत्यादिकमत्रोदाहरणम्। अत्र कार इति नाम्ना प्रातिपदिकेन वा सह 'कुम्भस्य' इति सुबन्तस्य समासः। 'उपपदमतिङ्'(२-२-१९) इति हि तत्र पाणिनीयं सूत्रम्।

**सुपां धातुना** इत्यनेन धातुना सह सुबन्तस्य समासो विहितः। 'कटप्रूः' इत्यादिकमत्रोदाहरणम्। कटे श्मशाने प्रवते विचरति यः स कटप्रूः इति। 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणञ्च'(३-२-१७८ महा०)इति वार्तिकबलाद्गत्यर्थकेन प्रुधातुना सुबन्तस्य कटपदस्य निपातनेन समासः।

**तिङां तिङा** इत्यस्यार्थो हि तिङन्तेन तिङन्तस्य समासः। यथा पिबत खादत इति यत्र क्रियायां सा पिबतखादता। खादमोदता इत्यादिष्वपि तादृशोऽर्थो

बोद्धव्यः। तिङन्तेन तिङन्तस्य समासविधायकं तादृशं पाणिनीयं सूत्रं न विद्यते। ‘आख्यातमाख्यातेन क्रियासातत्ये... ’इत्यादिकं गणसूत्रं लभ्यते।

अन्तिमतः समासभेद उक्तः– **तिङा सुबन्तेन** इति। सुबन्तेन सह तिङन्तस्य समास इति भावः। तद्यथा– कृन्त विचक्षणेति यस्यां क्रियायां सा कृन्तविचक्षणा; जहि जोडमित्यभीक्ष्णमाह यः स जहिजोड इत्यादिकम्।

पूर्वं सुपां तिङा इत्यनेन यः समासभेदः प्रोक्तः स हि तिङन्तोत्तरपदविषयकः, अन्ते तिङां सुबन्तेनेत्यत्र सुबन्तोत्तरपदविषयको बोध्यः।न चेत्, समासस्य षड्विधत्वं न सम्भवेत्। तथाहि लघुशब्देन्दुशेखरे नागेशाचार्येणोक्तं– ‘अत्र सुपां तिङा इत्यनेनैव तिङां सुबन्तेनेत्यस्य सङ्ग्रहात् पञ्चविधत्वमेव युक्तम्, उभयत्रापि सुप्तिङ्घटितत्वस्याविशिष्टत्वादिति चिन्त्यम्। यद्वाद्येन सुबन्तपूर्वपदकस्य ग्रहणमन्त्येन तिङन्तपूर्वपदस्येति भेदः’ इति।

## ३. उपसंहारः

समासविषये शास्त्रेषु एतादृशी चर्चा तस्य गुरुत्वमेव द्योतयति। अत्र प्रसङ्गतो वक्तुं शक्यते वैदिकस्वरप्रक्रियायां समासस्य गुरुत्वाधिक्यं वर्तते। स्वरज्ञानं विना वेदमन्त्राध्यनमनर्थाय एव कल्प्यते। उच्यते च–

> ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं स्वराद्यपि
> अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते। इति।

समासेन सह स्वरस्य सम्बन्धवशादेव यत्र पूर्वपदप्रकृतिस्वरत्वं तत्र बहुव्रीहिः, यत्र च समासान्तोदात्तत्वं तत्र तत्पुरुष इति ज्ञायते। तेन यथायथं वेदार्थस्य ज्ञानं भवति। सन्देहश्च दूरं गच्छति।

समासेन सह लक्षणाया अपि सम्बन्धो भाषापरिच्छेदकारेण प्रदर्शितः। तथाहि– बहुव्रीहिसमासे चित्रगुपदादौ एकदेशान्वयः स्वीक्रियते चेत्तदा गोपदस्य गोमति लक्षणा, गवि चित्रभेदान्वयः। तत्पुरुषे तु पूर्वपदे लक्षणा। द्वन्द्वे धवखदिरौ छिन्दीत्यादौ धवः खदिरश्च विभक्त्यर्थद्वित्वप्रकारेण बुध्यते, तत्र न लक्षणा। एवमुपर्युक्तेषु दृश्यते यत् समासभेदेन लक्षणाया भेदोऽपि दृश्यते।

अपि च ‘ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वञ्च समासप्रयोजनम्’ इति शाब्दिकानां मतिः। एवं कृते विचारे संस्कृतवाङ्मये समासस्य गुरुत्वम् अनस्वीकार्यम् इति शिवम्।

✦✦✦

# न्यायनये अपवर्गस्वरूपम्

हाराधनगराइः*

धर्मार्थकाममोक्षेषु अशेषशास्त्रकृन्नयसम्मतेषु चतुर्षु पुरुषार्थेषु तुरीयः चरमः परमो वा पुरुषार्थः मोक्षोऽपवर्गो वा। तत्स्वरूपवर्णनवेलायां तल्लाभोपायकथनकाले च दार्शनिकाः परस्परं वैरायन्ते। परन्तु तत्रापि आदरपूर्वकं परमतानि निशम्य विचारेण सयुक्तिकं खण्डयन्ति ये ते हि नैयायिकाः। प्रकृतनिबन्धे न्यायनयानुसारम् अपवर्गस्वरूपं विचार्यते।

अपपूर्वकात् "वृजी वर्जने" इति वर्जनार्थकवृज्धातोः भावार्थकघञ्प्रत्यये अपवर्गशब्दो निष्पद्यते, जीवस्य संसारबन्धनस्य वर्जनमिति तदर्थः- संसारमूलकसर्वदुःखानाम् आत्यन्तिकनिवृत्तिरेव तस्यार्थः। अत एव मुक्तेः अपरं नाम अपवर्गः। स च "मोक्षः" "अमृतम्" इत्यपि कथ्यते। उक्तञ्च श्रीमद्भगवद्गीतायां भगवता अच्युतेन, "जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते"[1] इति।

अशेषदुःखानाम् आत्यन्तिकनिवृत्तौ एव प्रकृतमुक्तिः। तदेव सर्वसम्मतम् अपवर्गस्य सामान्यलक्षणमिति वक्तुं शक्यते। एवमेव भगवान् गौतमः न्यायशास्त्रस्य प्रथमाध्यायस्य प्रथमाह्निकस्य द्वाविंशतसूत्रेण ब्रूते, "तदत्यन्तविमोक्षोऽपवर्गः"[2] इति। दुःखस्वरूपाज्ञाते अपवर्गस्वरूपज्ञानम् असम्भवि इत्यतः अस्मात्सूत्रात्पूर्वमेव दुःखस्वरूपं प्रकाशयति, "बाधनालक्षणं दुःखम्"[3]। उक्तञ्च भाष्यकारेण वात्स्यायनेन "तेन दुःखेन जन्मना अत्यन्तं विमुक्तिरपवर्गः"[4] इति। न्यायवार्तिके उच्यते, "तेन शरीरादिना दुःखान्तेनात्यन्तिको वियोगः"[5] इति। वाचस्पतिमहोदयानां नये, तदित्यनेन गौणमुख्यभेदभिन्नं दुःखं परामृशति भाष्यकारः। अपि च, मुख्यमेव तद्दुःखमिति

---

*शोधच्छात्रः।

[1]श्रीमद्भगवद्गीतायां १४.२०

[2]न्यायसूत्रे १.१.२२

[3]तत्रैव १.१.२१

[4]न्यायसूत्रभाष्यम् १.१.२२

[5]न्यायवार्तिकम् १.१.२२

भ्रमो मा भूदित्यत आह “जन्मना” इति। एतेन जायमानाः सर्वे शरीरादयः दुःखशब्देन उच्यन्ते इति ज्ञातं भवति। वृत्तिकारस्तु तस्य दुःखस्य अत्यन्तविमोक्षः स्वसमानाधिकरणदुःखासमानकालीनो ध्वंस इत्यर्थं चकार। कथम् अपवर्गस्य लाभो भवतीति भाष्यकारेण उच्यते, उपात्तस्य जन्मनो हानम्, अन्यस्य च जन्मनः अनुपादानेन एतादृशी अपर्यन्ता नाम अवधिशून्या आत्मनो शरीरादिसर्वदुःखशून्या कैवल्यावस्था एव अपवर्ग इति अपवर्गज्ञाः कथयन्ति। तथाहि उच्यते भाष्यकृता, “कथम्, उपात्तस्य जन्मनो हानम् अन्यस्य च अनुपादानम्। एतामवस्थामपर्यन्ताम् अपवर्गं वेदयन्तेऽपवर्गविदः। तदभयम् अजरम् अमृत्युपदं ब्रह्म क्षेमप्राप्तिरिति”[६]। अभयमित्यस्य व्याख्या वाचस्पतिमहोदयनये निर्वाणकाले संसारभीतिर्न तिष्ठति, अतः तदभयम्। उक्तञ्च अभयमिति पुनःसंसाराभावमाह, “अभयं च ब्रह्म” इति असकृदभयश्रुतेः। येषां नये ब्रह्म एव जगदाकारेण परिणतं तानुद्दिश्य उच्यते, अजरम् इति। तत्र ब्रह्मणः सर्वात्मना परिणाम उत एकदेशेन, सर्वात्मना परिणामे ब्रह्मणः अन्यथात्वात्तस्यैव विनाशप्रसङ्गः। एकदेशपरिणामे तु सावयवत्वेन घटादिवद् अनित्यत्वप्रसङ्गः स्यादिति सम्यगेवोक्तम्, अजरमिति। ये च कथयन्ति प्रदीप इव चित्तस्य चिरनिर्वाणमेव मुक्तिः तान् प्रति उच्यते अमृत्युपदमिति। उक्तञ्च वाचस्पतिमिश्रेण, “वैनाशिकाः प्राहुः प्रदीपस्येव निर्वाणं मोक्षः, तस्य चेतस इति, तान् प्रत्याह अमृत्युपदमिति”[७] इति। ब्रह्म अमृत्युपदं तदेव मुक्तिरपि अमृत्युपदम्। नैतत् प्रदीपनिर्वाणतुल्यम्। कारणं जीवात्मनो निर्वाणमुक्तावपि तस्य मृत्युः, विनाशो वा नास्ति। भाष्यकारस्य एतत्तात्पर्यं यत् मुक्तात्मा ब्रह्मैव न भवति, परन्तु तेन सह परमसादृश्यं सायुज्यं वा लभते। “ब्रह्म क्षेमप्राप्तिरिति” चोच्यते एतादृशी अवस्था। मुण्डकोनिषदि आम्नायते “निरञ्जनः परमं साम्यमुपैति”[८] इति। भगवद्गीतायामपि गीतम्, “इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः”[९] इति। उभयत्रैव “साम्यसाधर्म्याभ्याम् ” अयमेव भावः प्रकाशितः।

भाष्यकारेण महर्षेः गौतमस्य चरमप्रमेयापवर्गस्वरूपं व्याख्यायता मतान्तरेण उच्यते, आत्यन्तिकी नित्यसुखाभिव्यक्तिः मुक्तिरिति। सर्वव्यापिजीवात्मनि

---

[६]न्यायसूत्रभाष्यम् १.१.२२

[७]न्यायवार्तिकतात्पर्यटीकायां १.१.२२

[८]मुण्डकोपनिषदि१.३.१

[९]भगवद्गीतायां १४.२

नित्यमहत्परिणाम इव यन्नित्यसुखं विद्यते, संसारकाले तन्न अभिव्यज्यते, किन्तु मुक्तिदशायां तस्य अभिव्यक्तिर्घटते। मुक्तात्मा तेन अभिव्यक्तेन सुखेन अत्यन्तसुखी भवति। अतस्तदा प्रभृति नित्यसुखस्य उपभोगं कुरुते इति कस्यचित्सम्प्रदायस्य राद्धान्तः। उक्तञ्च भाष्यकारेण, "नित्यं सुखमात्मनो महत्त्ववन्मोक्षे व्यज्यते, तेनाभिव्यक्तेनात्यन्तं विमुक्तः सुखी भवतीति केचिन्मन्यन्ते"[१०] इति।

भाष्यकारोऽनन्तरं विचारेण पूर्वोक्तमतस्य अनुपपत्तिं बोधयितुमादौ वक्ति, "नित्यपदार्थस्य अभिव्यक्तिर्नाम संवेदनमनुभवो वा। अतः मुक्तात्मनः तन्नित्यसुखानुभावस्य उत्पादकारणं किमिति वक्तव्यम्। यदुच्यते तत्सुखमिव सोऽनुभवोऽपि नित्यः अर्थात्तस्य किमपि कारणं नास्ति। एवं संसारिणः सर्वे आत्मानोऽपि सर्वदा तस्य नित्यसुखस्यानुभवविशिष्टा भवन्तीति इति स्वीकरणीयं भवति। तदा च सांसारिकसुखदुःखभोगेन साकं नित्यसुखभोगमपि कुर्वन्ति। सुखस्य नित्यत्वात् तदनुभवोऽपि अवश्यं भवेत्। परन्तु संसारी आत्मा कदापि नित्यसुखं नानुभवति। दुःखभोगकाले सुखभोगोऽपि न कर्तुं शक्यते। अतः नित्यसुखानुभवः अनित्य इति वक्तव्यः। अनित्यश्चेत् कारणमपि वक्तव्यम्। आत्ममनःसंयोगः तत्कारणमित्युच्यते चेत्तस्य सहकारिकारणं, तदा धर्मोत्पादककारणं वक्तव्यम्। तदानीं मुमुक्षोः योगसमाधिजो धर्मः तस्य सहकारिकारणमित्युच्यमाने नित्यसुखानुभवश्चिरस्थायी न भवति। कारणं योगसमाधिजस्य धर्मस्य क्षये नित्यसुखानुभवस्यापि निवृत्तिः स्यादेव। तन्नित्यसुखं कदापि नानुभूतमपि तदात्मनि वर्तते इति वक्तुं नैव युज्यते। कारणं हि, विद्यमानं नित्यसुखं नानुभूयते, अविद्यमानं नित्यसुखं नानुभूयत इत्युभयोः पक्षयोः कस्मिन्नपि पक्षे विशेषानुमानं नास्ति। योगसमाधिजस्य धर्मस्य कदापि क्षयो न भवतीत्यपि वक्तुं न शक्यते, तस्योत्पत्तिवशात्। उत्पत्तिधर्मकं भावपदार्थमात्रकमेव विनाशि। अतस्तद्धर्मस्य विनाशित्वमेवानुमानसिद्धं भवति। नित्यसुखानुभवकारणं नित्यञ्चेत्संसारदशायामप्यात्मनि नित्यसुखानुभवो भवेत्। परन्तु न भवति प्रतिबन्धकभावादित्युच्यते चेत्तस्य किं कारणमित्यपि वक्तव्यम्। शरीरादिसम्बन्धित्वमेव नित्यसुखानुभवस्य प्रतिबन्धकम्। परन्त्वेतदपि न युज्यते कारणं शरीराद्युपभोगार्थम्। अत एव ये पदार्थाः सुखभोगस्य सहायकानि साधनानि वा त एव सुखभोगस्य प्रतिबन्धका इति वक्तुं न शक्यते। पुनश्च,

---

[१०] न्यायसूत्रभाष्ये (१.१.२२)

शरीरादिशून्यस्य केवलात्मनो भोगाः कश्चिद्वर्तत एतद्विषयेऽप्यनुमानप्रमाणं नास्ति। अत एव भाष्यकारो भणति, "तेषां प्रमाणाभावाद् अनुपस्थितः। न प्रत्यक्षं, नानुमानं नागमो वा विद्यते, नित्यं सुखमात्मनो महत्त्ववन्मोक्षेऽभिव्यज्यते इति"[११] इति। श्रीशङ्करमिश्रेण उपस्कारटीकायामेवं भणितं, "ननु नित्यसुखाभिव्यक्तिरेव मुक्तिर्न तु दुःखाभाव इति चेन्न। नित्यसुखे प्रमाणाभावात्, भावे वाऽनित्यं तदभिव्यक्तमुक्तिसंसारिणोरविशेषापातात् अभिव्यक्तेरुत्पाद्यत्वेन तन्निवृत्तौ पुनः संसारापत्तेश्च"[१२] इति।

उदयनाचार्येण अपवर्गस्य लक्षणमेवं विहितं, "निःश्रेयसं पुनर्दुःखनिवृत्तिरात्यन्तिकी"[१३] इति। ""अत्र आत्यन्तिकत्वं दुःखनिवृत्तेः विशेषणम्, न तु दुःखस्य। अधुनैतज्ज्ञातव्यं दुःखनिवृत्तेरात्यन्तिकत्वं नाम किम्? आत्यन्तिकनिवृत्तिरित्यनेनात्यन्ताभाव एव बोध्यते। तादृशार्थस्वीकारे अपवर्गो नित्यो भवेत्, यस्य चोत्पत्तिर्विनाशो वा नास्ति। एवमपवर्गस्य नित्यत्वे स्वीकृते शास्त्रकारोक्तसाधनसङ्ग्रहो निष्प्रयोजनको भवेत्। अतः वयं दुःखस्य आत्यन्तिकनिवृत्तिं दुःखात्यन्ताभाव इति वक्तुं न शक्नुमः।

तर्ह्यधुना दुःखनिवृत्तिपदस्य ध्वंसरूपार्थग्रहणं सङ्गतं न वेति विचारयामः। तेन दुःखस्य ध्वंसो नाम विनाशः। दुःखस्य विनाशे एव निवृत्तिर्भवति। ध्वंसाभावः जन्यपदार्थः, अतस्तस्योत्पत्तिसत्त्वात् साधनसङ्ग्रहस्य आवश्यकता भवेत्। आत्यन्तिकत्वरूपं विशेषणं परित्यज्य केवलं दुःखविनाश एव मुक्तिरित्युच्यमाने संसारदशायामपि दुःखविशेषस्य ध्वंसोऽवश्यं तिष्ठेत्, मुक्त्यर्थं साधनसंग्रहापेक्षापि न स्यात्। यतो हि दुःखध्वंसविशेषमुत्पन्नं सत् तन्निजोत्पत्तेः तृतीयक्षणे विनष्टं भवेदेव। एवं नानाविधदोषान् विभाव्य आत्यन्तिकी दुःखनिवृत्तिरेवापवर्ग इत्युच्यते। अस्माभिरात्यन्तिकत्वस्यैवं निर्वचनं वक्तव्यं येन संसारदशायां मुक्तित्वापत्तिः न स्यात्समञ्च मुक्त्यर्थं साधनसंग्रहस्यापि अपेक्षा स्यात्।

आत्यन्तिकत्वं नाम दुःखासमानकालीनत्वमिति वक्तुं शक्यते न वेति विचारयामः। संसारदशायां या दुःखनिवृत्तिः सा केनचिद्दुःखेनावश्यं समानकालीनं भवति। कारणं संसारकालीनदुःखविशेषस्य नाशादनन्तरमेव दुःखान्तरं

[११]न्यायसूत्रभाष्यम् १.१.२२

[१२]उपस्कारटीकायां १.१.४

[१३]किरणावल्याम्

समुपस्थितं भवति। एवं संसारकालीनदुःखनिवृत्तिः दुःखसमानकालीनत्वात् दुःखासमानकालीनत्वं न भवति। तेन च संसारदशायां मोक्षापत्तिः न स्यात्, साधनासंग्रहापेक्षापि न स्यात्। परन्तु एतादृशम् आत्यन्तिकत्वनिर्वचनं न समीचीनम्। दुःखासमानकालीनदुःखध्वंसो मुक्तिरित्युच्यमाने सृष्टिकालादारभ्य अद्यावधि न कोऽपि पुरुषः मुक्तः भवति। कारणमेतावत्कालपर्यन्तं यावन्तः दुःखध्वंसा उत्पन्नाः तेष्वेकोऽपि दुःखासमानकालीनो न भवति। अद्यापि संसारस्य विद्यमानत्वात् दुःखमपि निश्चयं वर्तते। अतः व्यक्तिविशेषस्य प्रत्येकदुःखध्वंस एव अपरस्य कस्यचिज्जनस्य दुःखेन सहितं समानकालीनमेव। अतः दुःखासमानकालीनो दुःखध्वंसो मुक्तिरिति केवलं चरमजीवस्य चरमदुःखध्वंस एवेति। एतच्च महाप्रलये सम्भवति। अत एवैतादृशविलम्बितफललाभे न कोऽपि प्रक्षावान् प्रयत्नपरो भवेत्।

यद्यपि स्वपरसाधारणसकलेन दुःखेन साकमसमानकालीनत्वं दुःखध्वंसस्य आत्यन्तिकत्वं न भवति, परन्तु स्वसमानाधिकरणदुःखस्य असमानकालीनत्वम् आत्यन्तिकत्वमिति कथने बाधास्ति न वेति द्रष्टव्यम्। अत्र स्वपदेन दुःखनाश एव ग्रहणीयः, तं दुःखनाशं बुद्धिस्थं कृत्वा उक्तविशेषं तत्रास्ति न वेति विचारयामः। अधुना एतद्द्रष्टव्यं दुःखनाशेन सममेकात्मनि आश्रितदुःखैः सह अस्मदभिप्रेतदुःखनाशः समकालीनो न वेति विचारणीयम्। समकालीनो भवति चेत्तद्दुःखनाशो मुक्तिपदवाच्यो न भवेत्, असमानकालीनश्चेन्मुक्तिपदवाच्य एव भवेत्। अधुना द्रष्टव्यं मुक्तिलक्षणं सङ्गतं न वा। साप्रतं यस्य मुक्तिरभूत् तस्य चरमदुःखनाशः यस्मिन्नात्मनि भवति तत्रैवात्मनि तस्य पुरुषस्य यावन्तः संसारकालीनदुःखा आश्रिताः, ते स्वसमानाधिकरणदुःखा भवेयुः, पुरुषान्तरस्य च दुःखा उक्तदुःखनाशव्यक्तेः समानाधिकरणं न भवति। अधुनैतदपि दृश्यते यत् मुक्तपुरुषस्य चरमदुःखनाशः तस्य संसारकालीनदुःखानां प्रत्येकमसमानकालीनम्। अत एव प्रकृतः दुःखनाशः आत्यन्तिकः, अत एव मुक्तिरेव सा। संसारकालीनदुःखनाशे लक्षणमिदं नातिव्याप्तम्। एवञ्चेदं निर्वचनं क्रियते तर्हि संसारकाले मुक्तः असम्भावनापि न भवेत्। कारणं व्यक्तिविशेषस्य चरमदुःखध्वंस अन्यदीयदुःखसमानकालीनमपि स्वकीयदुःखसमानकालीनत्वात् व्यक्तिविशेषः सृष्टिकाले मुक्तरूपेण परिगण्यते।

परन्तु आत्यन्तिकत्वस्य एतादृशं निर्वचनमपि समीचीनमिति वक्तुं न शक्यते। कारणम् एतादृशे निर्वचने स्वीकृते सांसारिकजीवस्य सुषुप्तकालीनदुःखध्वसोऽपि

आत्यन्तिकः स्यात्। तत्र सुषुप्तेः पूर्वकालीनदुःखा यदि स्वसमानाधिकरणदुःखत्वेन गृह्यन्ते तर्हि तद्दुःखस्य समानकालीनत्वान्त्यन्ताभावः असमानकालीनत्वं वा सुषुप्तिकालीनदुःखध्वंसे स्वाभाविकरूपेण तिष्ठति। यदि च सुषुप्तेः परवर्तिजागरणकालीनदुःखाः स्वसमानाधिकरणदुःखत्वेन गृह्यन्ते तर्हि तादृशदुःखस्य समानकालीनत्वस्य अत्यन्ताभावस्तत्र सुषुप्तिकालीनदुःखध्वंसे स्यादेव। परवर्तिजागरणकालीनस्वसमानाधिरणदुःखानां जागरणकालावच्छेदे समानकालीनत्वं समानकालीनत्वं तत्रास्ति, परन्तु सुषुप्तिकालावच्छेदे तेषां समानकालीनस्य अत्यन्ताभावः तस्मिन् दुःखध्वंसऽवश्यं स्यात्। कारणं सुषुप्तात्मनि सुषुप्तिकालावच्छेदेन दुःखाभावात् सुषुप्तिकालीनदुःखध्वंसे उक्तकालावच्छेदे दुःखसमानकालीनत्वस्य अत्यन्ताभाव स्यादेव। अत एव आत्यन्तिकत्वस्य इदं निर्वचनमपि न समर्थनयोग्यम्।

केचन कथयन्ति दुःखनिवृत्तिरात्यन्तिकी इत्यत्र निवृत्तिपदेन ध्वंस एवोक्तः न तु अत्यन्ताभावः। केचन कथयन्ति न ध्वंसः, किन्तु अत्यन्ताभावः। परन्तु तत्तन्मतं समर्थनयोग्यं न। दुःखनिवृत्तिरात्यन्तिकी इत्यत्र रुचिदत्तेन उच्यते "अत्यन्ताभावः मुक्तिर्न, किन्तु दुःखस्य आत्यन्तिकध्वंस एव मुक्तिः"[१४] इति। स्वसमानाधिकरणदुःखप्रागभावस्य असमानाकालीनत्वमेव दुःखध्वंसस्य आत्यन्तिकत्वम्। एवम् उच्यमाने संसारदशायां मुक्त्यापत्तिः चरमदुःखध्वंसरूपमुक्तौ वा लक्षणम् अव्याप्तं न भवति। कारणं संसारकालीनदुःखविशेषस्य ध्वंसः, दुःखान्तरस्य च प्रागभावः समानकालीनमेव भवति। संसारदशायाम् आत्मनि दुःखविशेषस्य प्रागभावोऽवश्यं तिष्ठेत्। अतः संसारावस्थायां दुःखध्वंसः न आत्यन्तिकः, किन्तु मुक्तात्मनः चरमदुःखध्वंसः आत्यन्तिक एव। तदानीमात्मनि दुःखप्रागभावो न वर्तते। अत एव स्वसमानाधिकरणदुःखप्रागभावस्य असमानकालीनविशिष्टदुःखध्वंस एव मुक्तिः। अपरमपि आत्यन्तिकलक्षणं रुचिदत्तेन उक्तम्-"तथा च समानाधिकरणदुःखप्रागभावासमानकालो दुःखध्वंस इत्येकम्। समानकालीनदुःखप्रागभाव असमाधिकरणो दुःखध्वंस इत्यपरम् "[१५] इति।

प्रकाशकारमतेऽपि आत्यन्तिकदुःखध्वंस एव मुक्तिः। तन्नये आत्यन्तिकत्वं

[१४] विवृतिटीकायाम्

[१५] विवृतिटीकायाम्

नाम- “तस्मात् समानकालीनसमानाधिकरणप्रागभावासमानदेशत्वमेव दुःखध्वंसस्य आत्यन्तिकत्वम्”[१६]इति। दुःखप्रागभावस्य विशेषणद्वयं प्रदत्तम्- स्वसमानकालीनत्वं स्वसमानाधिकरणत्वञ्च। एतद्द्वययुक्तः य प्रागभावः, तस्य असमानदेशत्वमेव प्रकाशकारनये दुःखध्वंस्य आत्यन्तिकत्वम्। अत्र स्वपदेन चरम चरमदुःखध्वंसो न ग्राह्यः, कारणं तस्य असमानदेशस्थः, समानकालीनो वा दुःखप्रागभावो जगति अप्रसिद्धम्। तर्हि स्पपदेन बद्धात्मनि अवस्थितः संसारकालीनदुःखादिध्वंसः ग्रहणीयः। कारणं संसारदशायाम् आगामिदुःखप्रागभावः संसारकालीनदुःखध्वंसेन साकं समानकालीनं समानाधिकरणं चोभयं भवति। अतः तद्भिन्नत्वं चरमध्वंसे वर्तते इति लक्षणसमन्वयः। उक्तञ्च विवृत्तिकारेण- “तथा च स्वसमानकालीनस्वसमानाधिकरणदुःखप्रागभावसमानदेशो दुःखध्वंसोऽस्मदादीनां प्रसिद्धस्तद्भिन्नदुःखध्वंसो मोक्ष इति पर्यवस्यति, तेन नाप्रसिद्धिः”[१७] इति। उदयनाचार्येण उच्यते निवृत्तेः मुक्तिस्वरूपतायां मतपार्थक्यं वर्तत इति सत्यं, परन्तु विषयेऽस्मिन् वादिषु प्रकृततया कोऽपि विवाद एव नास्ति। मुक्तिस्वरूपविषये मतानैक्यमस्ति सत्यं परन्तु मुक्तौ दुःखस्य विनाशो भवतीति सर्वसम्मतम् एव। उक्तञ्च- अत्र च वादिनामविवाद एव। न ह्यपवृक्तस्य दुःखं प्रत्यापद्यत इति कश्चिदभ्युपैति।

आत्यन्तिकत्वस्य लक्षणमुपस्कारकृता श्रीशङ्करमिश्रेण एवमुक्तम्- “दुःखनिवृत्तेश्चात्यन्तिकत्वं समानाधिकरणदुःखप्रागभावासमानकालीनत्वम्”[१८], युगपदुत्पन्नसमानाधिकरणसर्वात्मविशेषध्वंससमानाधिकरण-आत्मवृत्तयः ये दुःखप्रागभावाः, तेषाम् असमानकालीनत्वं, तदधिकरणकालवृत्तित्वं तदनवच्छेदककालविशेषावच्छिन्नवृत्तिकत्वं वा। ये च प्रागभावं नाङ्गीकुर्वन्ति तेषां कृते आत्यन्तिकत्वस्य अपरथा व्याख्यानं प्रस्तुतं युगपद् इत्यादिना। वस्तुतस्तु उपस्कारकृतां कृतित्वं वर्तते मुक्तेः लक्षणकरणवेलायाम्। उक्तञ्च तेन, “अशेषविशेषगुणध्वंसावधिकदुःखप्रागभावो वा मुक्तिः”[१९] इत्युच्यते चेच्चैत्राद्यात्मनि अतिव्याप्तिः स्यात्, संसारदशायां तत्र केषाञ्चन दुःखप्रागभावानां सत्त्वात्।

---

[१६]प्रकाशटीकायाम्

[१७]विवृतिटीकायाम्

[१८]विवृतिटीकायाम्

[१९]उपस्कारटीकायाम् (१.१.४)

तेन सर्वेषामेव मुक्तत्वापत्तिः स्यात्। अत एव लक्षणे अशेषेत्यादिविशेषदलं योजितम्। अशेषो नाम अविद्यमानो शेषः अवशिष्टः यस्य स, निखिलम् इति तदर्थः, विशेषगुणाः आत्मनो ये विशेषगुणाः सुखदुःखादयः, तेषां ध्वंसः, स अवधिर्यस्य स अशेषविशेषगुणध्वंसावधिकः, स च दुःखप्रागभावः। अशेषेति पदानुपादाने संसारकाले कतिपयेषां दुःखानां निवृत्तौ मुक्तित्वापत्तिः स्यात्। अतस्तद्वारणाय अशेषेति पदं कीर्तितम्। विशेषेति पदं न दीयते चेत् लक्षणम् असम्भवदोषदुष्टं स्यात्। यतोऽशेषगुणध्वंसावधिकत्वम् आत्मनः न सम्भवति, आत्मनो विभुत्वात् सर्वमूर्तद्रव्यसंयोगः वर्तते एव। अतो मुक्तिदशायामपि गुणो वर्तते एवेति इष्टापत्तिः। अत्र च शङ्करमिश्रेण दुःखनिवृत्तिरित्यस्य दुःखप्रागभाव एव स्वीकृतश्चतुर्षु अभावेषु। परन्त्वत्र प्रश्नो भवति प्रागभावस्य अनादित्वेनासाध्यत्वात् घटवच्चरमपुरुषार्थस्य च साध्यत्वात्कथमत्र सङ्गतिः? एतदेवाभिप्रेत्य शङ्करमिश्रेणास्योत्तरं प्रदत्तम्- "न चासाध्यत्वान्नायं पुरुषार्थः, कारणविघटनमुखेन प्रागभावस्यापि साध्यत्वात्"[२०] इति। अत्रोपस्कारकर्त्रा प्रतिपाद्यते घटवत्प्रागभावोऽपि साध्यः। कारणविघटनमुखेन इत्यस्य प्रतियोगिनः कारणाभावसम्पादनद्वारकतया इत्यर्थः। परन्तु प्रागभावमात्रस्य असाध्यत्वं सान्ताभावत्वं चेति वैशिष्टद्वयं दृश्यते। अत्र च साध्यत्वे सति सान्ताभावत्वं प्रागभावत्वम् इति प्रतिपाद्यते इति प्रागभावलक्षणेन सह विरोधदर्शनादिदं प्रागभावलक्षणं भवितुं नार्हतीति चेच्छङ्करमिश्रः प्रागभावस्यान्यमसाधारणधर्मं दर्शयति- "प्रतियोगिजनकाभावत्वेन तथात्वात्"[२१] इति। अत्र प्रसङ्गत उल्लेख्यं यत् प्रतियोगिजनकीभूतोऽभावस्तु प्रागभाव एव। अत्यन्ताभावान्योन्यभावौ कदापि न प्रतियोगिनं जनयतः। ध्वंसाभावे च प्रतियोगिनः घटस्य ध्वंसे घटाभावश्चिरं वर्तते, तस्य पुनरुत्पत्तिः कदापि न स्यात्। अत्र प्रकृतस्थले असाध्यत्वे सति सान्ताभावत्वमिति लक्षणं न गच्छति चेदपि प्रतियोगिजनकत्वे सति अभावत्वमिति लक्षणं तु गच्छत्येव। परन्तु तथात्वे घटप्रागभावो यथा घटम् उत्पादयति तद्वदेव दुःखप्रागभावोऽपि दुःखमुत्पादयेत्। एवं यत्रास्माकं कांक्षितमासीत् समग्रदुःखानां नाशः, तत्र दृश्यते मुक्तिदशायामपि दुःखसत्त्वप्रसक्तिरित्यनिष्टमेव। अतः प्रतियोगिजनकाभावत्वम् इति लक्षणम् अशेषविशेषगुणध्वंसावधिकदुःखप्रागभावे

[२०]उपस्कारटीकायाम् (१.१.४)
[२१]उपस्कारटीकायाम् (१.१.४)

अव्याप्तमिति न शङ्कनीयं यतोऽत्र जनकत्वं हि स्वरूपयोग्यतामात्रम्, न तु फलोपाधायकम्। अतः मुक्तिदशायामन्येषां दुःखोत्पत्तिहेतूनामभावात् दुःखं नैव तिष्ठति। यावन्तोऽधर्माश्चैत्रेण पुरुषेणाचरितं, तेषा फलयोगाद् अनन्तरमदृष्टं न तिष्ठति। अत एव मुक्तिदशायाम् अदृष्टरूपसहकारिकारणविरहात् केवलं दुःखप्रागभावः दुःखजननेऽसमर्थो भवति येन च मुक्तिदशायां दुःखं न तिष्ठति। एवं मुक्तिदशायां यद्दुःखप्रागभावो वर्तते सोऽनुत्पत्स्यमादुःखप्रतियोगिकः, यश्च पण्डप्रागभाव इत्युच्यते।

ननु प्रागभावस्य अनादित्वेन प्राप्तत्वात् तत्र कथं लोकस्य प्रवृत्तिः? अपि च, "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायादपवर्गः"[२२] इत्यनेन उच्यते मिथ्याज्ञानस्य ध्वंसात्क्रमेण दुःखध्वंसः, दुःखध्वंसश्च कारणध्वंसेन भवति, तेन च हेतूच्छेदे पुरुषव्यापारो दृश्यते। अतः दुःखध्वंस एव मुक्तिः न तु तत्प्रागभाव इति चेदुच्यते हेतूच्छेदे पुरुषव्यापारादिति प्रागभावपरिपालने एव तात्पर्यम्। कुतो न ध्वंसे तात्पर्यमिति चेदुच्यते धान्यबीजस्य नाशे अङ्कुरस्याप्यनुत्पत्तिरिति अङ्कुरस्य प्रागभावमेव द्रढयति, अनुत्पद्यमानस्य ध्वंसः कथं स्यादितिवत् गौतमद्वितीयसूत्रे दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः इत्यत्र कारणाभावात् कार्याभावाभिधानं दुःखप्रागभावरूपामेव मुक्तिमेव द्रढयति। न हि दोषपाये प्रवृत्त्यपायः, प्रवृत्त्यपाये जन्मापायः, जन्मापाये दुःखापायः इत्यपायो ध्वंसः, किन्त्वनुत्पत्तिरेव प्रागभावः। न च प्रतियोग्यप्रसद्धिः शङ्कनीया- सामान्यतो दुःखत्वेनैव प्रतियोगिप्रसिद्धेः, प्रायश्चित्तवत्तत्रापि प्रत्यवायध्वंसद्वारा दुःखानुत्पत्तेरेवापेक्षितत्वाल्लोकेऽपि अहिकण्टकादिनिवृत्तेर्दुःखानुत्पत्तिफलकत्वदर्शनात्। एतदपि विदितचरं यत् दुःखनिवृत्त्यर्थमेव प्रेक्षावतां प्रवृत्तिः।

न्यायकन्दलीकारः श्रीधरभट्टोऽपवर्गं महोदयशब्देन व्यवहरति। तेन "अहितनिवृत्तिरात्यन्तिकी महोदयः"[२३] इत्युक्तम्। समञ्च बौद्धसाङ्ख्यादीनां मतान्यपि खण्डितानि।

---

[२२]न्यायसूत्रम् (१.१.२)

[२३]न्यायकन्दल्यां मङ्गलाचरणव्याख्याप्रसङ्गे

केचन बौद्धा कथयन्ति “सवासनमुच्छेदो ज्ञानोपरम”[२४] इति। ते श्रुतिप्रमाणम् अस्वीकुर्वाणा अपि श्रुतिप्रामाण्यवादिन उद्दिश्य श्रुतिमुद्धरति “न प्रेत्य संज्ञास्तीति”[२५] इति। परन्तु न्यायकन्दलीकारेण मतमिदं खण्डितम्। उक्तञ्च तेन “तदयुक्तम् , सर्वतः प्रियतमस्यात्मनः समुच्छेदाय प्रेक्षावत्प्रवृत्त्यनुपपत्तेः, बन्धविच्छेदपर्यायस्य मुक्तिशब्दस्य अतदर्थत्वाच्च”[२६] इति।

“निखिलवासनोच्छेदे विगतविषयाकारोपप्लविशुद्धज्ञानोदयो महोदय”[२७] इत्यपरे बौद्धाः कथयन्ति। परन्त्वेतदपि न युज्यते कारणभावे तदनुपपत्तेः, भावनाप्रचयो हि तस्य कारणम्। परन्तु बौद्धानां क्षणिकत्ववादस्वीकारात् भावनाप्रचयोऽतिशयं किमपि उत्पादयितमशक्तः, येन वासना दोषश्च निवृत्तः स्यात्। उक्तञ्च कन्दलीकारेण- “स च स्थिरैकाश्रयाभावाद्विशेषानाधायकः प्रतिक्षणम् अपूर्ववदुपजायमानो निरन्वयविनाशी लङ्घनाभ्यासवदनासादितप्रकर्षो न स्फुटाभज्ञानजननाय प्रभवतीत्यनुपपत्तिरेव तस्य। समलचित्तक्षणानां स्वाभाविक्याः सदृशारम्भणशक्तेरसदृशारम्भं प्रत्यशक्तेश्चाकस्मादनुच्छेदात् , किञ्च पूर्वे क्षणाः स्वरसनिर्वाणाः, अयमपूर्वो जातः, सन्तानश्चैको न विद्यते बन्धमोक्षौ च एकाधिकरणौ विषयभेदेन वर्तेते, य एवं प्रवर्तते प्राप्य च निवृत्तो भवति”।[२८]

चार्वाकाणां नये “अर्थकामौ पुरुषार्थौ” इति धर्ममोक्षयोः पुरुषार्थत्वमेव न सङ्गच्छते। ते देहस्यैवात्मत्वं समर्थयन्ति। ते दैहिकसुखमेव चरमपुरुषार्थत्वेन मन्यन्ते। परन्तु कथमस्य परत्वमिति चेत् तन्नित्यमित्यपि वक्तुं न शक्यते। नित्यश्चेत् तस्य कारणं नास्ति, तत्प्राप्तये च न कश्चिदपि यत्नपरो भवति, कारणं तदनादिकालत एव वर्तते। यत्पूर्वतो वर्तते तत्प्राप्त्यर्थं यत्नेन प्रयोजनं नास्ति। प्राप्तस्य प्राप्तये उन्माद एव यत्नपरो भवेत्। किञ्च, अनित्यमिति वचनमेव अनर्थकम्। अपि च, अनित्यानि वस्तूनि बहूनि वर्तन्ते परन्तु कथं तदपेक्षया अस्य परमत्वमिति वचनम् अस्पष्टमेवेति न ग्रहीतुं शक्यते चार्वाकाणां मतम्।

केचन बौद्धाः कथयन्ति निरुपप्लवा चित्तसन्ततिर्मुक्तिरिति। ननु किं नाम निरुपप्लवत्वमिति चेदुच्यते दुःखादिरूपस्योपप्लवस्य विगमो निरुपप्लवत्वमिति।

---

[२४] न्यायकन्दल्यां मङ्गलाचरणव्याख्याप्रसङ्गे

[२५] बृहदारण्यकोपनिषद् (४.५.१३)

[२६] न्यायकन्दल्यां मङ्गलाचरणव्याख्याप्रसङ्गे

[२७] न्यायकन्दल्यां मङ्गलाचरणव्याख्याप्रसङ्गे

[२८] न्यायकन्दल्यां मङ्गलाचरणव्याख्याप्रसङ्गे

परन्तु तन्मात्रस्यैव पुरुषार्थत्वेन चित्तसन्ततेरनुवृत्तौ प्रमाणाभावः, तदनुवृत्तेरपि शरीरादिसाध्यत्वेन संसारानुवृत्तेरावश्यकत्वादिति सिद्धं दुःखनिवृत्तिरेव उक्तरूपं निःश्रेयसमिति।

साङ्ख्याः कथयन्ति प्रकृतिपुरुषविवेकदर्शनादुपरताया प्रकृतौ पुरुषस्य स्वरूपेणावस्थानम् मोक्ष इति। परन्तु एतदपि न समीचीनम्। साङ्ख्याः कथयन्ति प्रवृत्तिस्वभावा हि प्रकृतिः। अतः प्रवृत्तिस्वभावयुक्तप्रकृतेरौदासीन्यं कथं भवेत्? अत्रोच्यते प्रकृतिप्रवृत्तिर्हि पुरुषप्रवृत्तिनिमित्ता। विवेकख्यातौ उत्पन्ने प्रकृतिः कृतकार्यैतिसा निवृत्तिस्वभावा भवति। उच्यते च तस्योत्तरम्- “अस्य अचेतनाया विमृश्यकारित्वाभावात्। यथेयं कृतेऽपि शब्दाद्युपलम्भे पुनस्तदर्थं प्रवर्तते, तथा विवेकख्यातौ कृतायामपि पुनस्तदर्थं प्रवर्तयिष्यते स्वभावस्यानपायित्वात् ”[२९] इति।

वेदान्तिनः कथयन्ति ब्रह्मात्मनि जीवात्मलयो मुक्तिर्न तु दुःखाभावः। परन्तु तन्नये लयो यद्येकीभावस्तदा बाधो जायते– न हि द्वयं कदापि एकं भवति। यदि लिङ्गशरीरागमो लयः, लिङ्गञ्च एकादशेन्द्रियाणि तेषां च विगमो लय इति चेत्तदपि न सम्भवति। कारणमेतावता दुःखसामग्रीविरहस्यैव उक्तत्वात्। तथा च दुःखाभाव एवापवर्ग इति पर्यवसानात्। एतेनैतदपि मतं निरस्तं भवति यत्- अविद्यानिवृत्तौ केवलात्मस्थितिः मुक्तिः, आत्मा च विज्ञानसुखात्मक इत्येकदण्डिमतम् अपास्तम्। तत्रात्मनो ज्ञानत्वे सुखत्वे च प्रमाणाभावात्। न च नित्यं विज्ञानमानन्दं ब्रह्म इति श्रुतिर्मानं तस्याज्ञानवत्त्वानन्दवत्त्वप्रतिपादकत्वात्। किञ्च, अहं जाने अहं सुखीति प्रतीतिर्भवति न तु अहं ज्ञानम् अहं सुखमिति प्रतीतिर्दृश्यते। किञ्च इदानीमपि सत्त्वात् ब्रह्मणो मुक्तसंसारिणो अविशेषापत्तिः। पुनश्च, तत्र अविद्यानिवृत्तिः प्रयोजनं भवितुं नार्हति, यतो ह्ययं न पुरुषार्थः। अपि च, ब्रह्म हि नित्यम् , नित्यत्वेन तस्य असाध्यत्वात् तत्साक्षात्कारत्वेन असाध्यत्वात् एवमानन्दस्यापि तदात्मकत्वेन असाध्यमेवति तदर्थं प्रवृत्तिरेव न भवेत्।

एवमस्माभिः सिंहावलोकनेन ज्ञातुं शक्यते नैयायिकाः चार्वाकबौद्धसांख्यमीमांसवैदान्तिकानां मतानि समादरपूर्वकं खण्डयन्ति, सुष्ठु प्रतिष्ठापयन्ति। परन्तु जैनमतखण्डने नैयायिकैः प्रयत्नः नैव कृतः। वस्तुतस्तु जैनमतेन साकं न्यायमतस्य अविरोधात् तत्खण्डनप्रसङ्ग एव नायाति। तत्र चार्वाकेण मोक्ष एव पुरुषार्थत्वेन न स्वीक्रियते परन्तु जैनानां

---

[२९]न्यायकन्दल्यां मङ्गलाचरणव्याख्याप्रसङ्गे

नये एते एव पदार्थाः- जीवाजीवास्रवबन्धनिर्जरसंवरमोक्षाः इति। मोक्षोपायश्च तन्नये सम्यग्ज्ञानदर्शनचरित्ररूप एवम्प्रकारेण जैनमतं नैयायिकखण्डनाविषयं भवति। "मुण्डे मुण्डे मतिर्भिन्ना" इति न्यायात् ज्ञायते सर्वेषां भिन्नभिन्नमतमपि समर्थनयोग्यम्। अत्र बहुभिर्बहुधा मोक्षस्वरूपम् उक्तम्। यत्र च मतानैक्यमपि बहुविधं वर्तते। परन्तु सर्वैरेतत् स्वीक्रियते यत् मोक्षकाले दुःखं नैव वर्तते। एवं बहुविधवैभिन्न्यसत्त्वेऽपि दुःखनाशार्थमेव सर्वैः यत्न आधीयते इत्यलं विस्तरेण इति शम्।

✦✦✦

# परिशीलितग्रन्थसूची


1. *Nyāyadarśanam*, Taranatha Nyaya-Tarkatirtha & Amarendramohan Tarkatirtha, Munshiram Manoharlal Publishers Pvt. Ltd., ISBN 81-215-0103-2, 2003.
2. वैशेषिकसूत्रोपस्कारः (प्रथमः अध्यायः), सम्पादकः- सेखसाविरआलिः, प्रकाशकः- संस्कृतवुकडिपो- २८/१, विधानसरणी, कोलकाता-७००००६, ISBN: 978-93-81795-31-6, २०१३।
3. न्यायदर्शनम् (प्रथमः खण्डः) सम्पादकः- महामहोपाध्याय-फणिभूषणतर्कवागीशः, प्रकाशकः- पश्चिमवङ्गराज्यपुस्तकपर्षत् , आर्य म्यान्सन् , ६ए राजा सुबोध मल्लिक स्कोयार, कलकाता- ७०००० ९,२०११।
4. तर्कसंग्रहः सम्पादकः- श्रीनारायणचन्द्रगोस्वामी, प्रकाशकः- संस्कृत-पुस्तकभाण्डार- ३८, विधानसरणी, कोलकाता-७०००० ६।
5. किरणावली, उदयनाचार्यः, सम्पादकः- महामहोपाध्यायफणिभूषण-तर्कवागीशः, प्रकाशकः- पश्चिमवङ्गराज्यपुस्तकपर्षत् , आर्य म्यान्सन् , ६ए राजा सुबोध मल्लिक स्कोयार, कलकाता- ७०००० ९।
6. प्रशस्तपादभाष्यम् (प्रथमो भागः), अनुवादादिकारकः- दण्डिस्वामी दामोदराश्रमः, प्रकाशकः- संस्कृतपुस्तकभाण्डार- ३८, विधानसरणी, कोलकाता-७०००० ६, २०१०।

# न्यायनये कारणस्वरूपविवेकः

ईश्वर आखुलिः*

## ०.भूमिका

निष्कारणं भुवनसर्जनकारणञ्च ह्यकारणं सकललोकदयार्द्रचित्तम्।
न्यायप्रवर्तनविधौ भुवि कारणं तं कंशान्तकारणमहं शरणं प्रपद्ये॥

परिदृश्यमानस्य जगतो विश्लेषणार्थं कार्यकारणभावस्य प्रसङ्गः समायातो भारतीयदर्शने। कुतोऽस्य विचित्ररचनात्मकस्य जगतः समुत्पत्तिः? कोऽयं जीवः? इत्येवं प्रश्नततिः दर्शनभित्तिः। तथाह्याम्नातं नासदीयसूक्ते–

'को अद्धा वेद क इह प्र वोचत् कुत आजाता कुत इयं विसृष्टिः।
अर्वाग् देवा अस्य विसर्जनेनाथा को वेद यत आ बभूव॥'[१] इति।

व्याचिख्यासितविषयमिममाश्रित्यैव दर्शननद्याः विविधधाराः प्रवाहिताः। वस्तुतस्तु सर्वाण्येव दर्शनानि कार्यकारणसम्बन्धानुसन्धानपरम्परया एव चरमराद्धान्ताध्वनि प्रवर्तमानानि दरीदृश्यन्ते। अतः प्रत्येकं दर्शनप्रस्थाने हेतुहेतुमद्भावो व्याख्यातः। तत्र केचिद् भारतीयदार्शनिकाः दृश्यमानं जगत् सम्यग् विश्लिष्य न किमपि कारणं सुनिश्चिततयान्वेष्टुमिच्छन्ति। एते पाञ्चभौतिकान् विषयान् स्वभावसिद्धानिति विचिन्तयन्तः स्वभाववादिन इति संज्ञां लभन्ते। कार्यकारणभावविषये च चतुर्धा विप्रतिपत्तिः दृश्यते। तत्र "असतः सज्जायते"इति सौगताः संगिरन्ते। वेदान्तिनः "सतो विवर्तः कार्यजातं न वस्तु सत्" इति, सांख्याः पुनः "सतः सज्जायते" इति। नैयायिकादयस्तु "सतोऽसज्जायते" इति। तत्र सौगतानाम् "असतः सज्जायते" इति न प्रामाणिकः पक्षः, असतो निरुपाख्यस्य शशविषाणवत् कारणत्वानुपपत्तेः। अद्वैतमते च जगत्प्रपञ्चोऽयं मिथ्याभूतः। किन्तु बाधकाभावात् प्रपञ्चप्रत्ययस्य भ्रमता न युक्ता। सांख्यास्तु सत्कार्यवादिनः। ते कार्यकारणयोः तादात्म्यं स्वीकुर्वन्ति। असत्कार्यवादिनां नैयायिकानां नये तु कार्यकारणयोः अभिन्नत्वे स्वीकृते कारणत्वहानिर्ध्रुवा, कारणस्य कार्यनियतपूर्ववृत्तित्वनियमात्। किञ्च कार्यकारणयोरभिन्नत्वनियमेन तन्तुपटयोरभिन्नत्वे अङ्गीकृते पटोत्पत्त्यर्थं

---

*शोधच्छात्रः।

[१]नासदीयसूक्तम्- ६

कारणव्यापारभङ्गप्रसङ्गः। तेन च सिद्धं कारणं सदपि कार्यमसत्। तच्च कारणं किं स्वरूपकमिति न्यायाचार्याणां मतप्रतिपादनपुरःसरं कारणस्वरूपमधस्ताद्विचार्यते निबन्धेऽस्मिन्।

तत्र तर्कसङ्ग्रहकारेणान्नम्भट्टेन कारणलक्षणं लक्षयता उच्यते– "कार्यनियतपूर्ववृत्ति कारणम्" इति। कार्यं प्रति नियतत्वे सति पूर्ववृत्तित्वमिति तदर्थः। यथा पटकार्यं प्रति तन्त्वादीनां नियतपूर्ववृत्तित्वात् कारणत्वम्। नन्वेवमपि यथा पटं प्रति तन्तवः कारणं तथैव तन्तुरूपमपि स्यात् पटं प्रति नियतपूर्ववृत्तित्वात् इति चेन्न कारणलक्षणस्यानन्यथासिद्धत्वघटितत्वस्वीकारात्। अत एव दीपिकाटीकाकृता उच्यते– "अनन्यथासिद्धत्वे सति इति विशेषणात्" इति। अतः "अनन्यथासिद्धत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वम्"[२] इति कारणलक्षणम्। समर्थितञ्चैतद् भाषापरिच्छेदकृता विश्वनाथन्यायपञ्चाननेन। अतः समीरितं तेन–

"अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।
कारणत्वं भवेत्तस्य ............ ॥"[३] इति॥

अर्थात् अन्यथासिद्धिशून्यत्वे सति नियतत्वे सति पूर्ववृत्तित्वं कारणत्वमित्यर्थः। तर्कभाषाकारेण केशवमिश्रेणाप्यनुरूपं लक्षणं लक्षयता उच्यते– "यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत्कारणम्" इति। अर्थात् यद्धि अन्यथासिद्धिशून्यं कार्यात् नियतपूर्ववृत्ति च तत्कारणमिति तदर्थः।

## १. कारणलक्षणविचारः

तत्र पूर्वं वृत्तिः पूर्ववृत्तिः। पूर्वशब्दस्य सापेक्षत्वात् कस्मात् पूर्वमिति चेदुच्यते कार्योत्पत्तेः पूर्वम्। अत्र पूर्वत्वञ्चाव्यवहितपूर्वत्वमित्येव ग्राह्यं, न तु पूर्वकालसामान्यत्वम्, अन्यथा अद्यतनीयपटकार्यं प्रति ह्यस्तनीयपटकार्यस्य कारणानां कारणत्वमापद्येत, तेषामन्यथासिद्धत्वे सति नियतपूर्ववृत्तित्वात्। अर्थात् कार्योत्पत्त्यव्यवहितपूर्वक्षणवृत्तित्वं पूर्ववृत्तित्वमित्यर्थः स्वीकार्यः। तेन ह्यस्तनीयपटकार्यस्यकारणानामव्यवहित-पूर्वक्षणवृत्तित्वाभावादद्यतनीयपटकार्यं प्रति न कारणत्वम्। वृत्तिश्च अधिकरणसापेक्षा। अतः कुत्र वृत्तिरिति

---

[२]दीपिकाटीकायाम्

[३]भाषापरिच्छेदः कारिका- १६

चेदुच्यते यस्मिन्नधिकरणे कार्यमुत्पद्यते तदधिकरणवृत्तिः। अर्थात् कार्योत्पत्त्यव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्तित्वं पूर्ववृत्तित्वम्।

नियतत्वं नियमयुक्तत्वम्। नियमशब्दार्थो हि व्याप्तिः। व्याप्तिश्च व्याप्यव्यापकसम्बन्धः। व्याप्त्याश्रयः व्याप्यः, व्याप्तिनिरूपकः व्यापकः। तत्र व्याप्तिनिरूपकत्वात् नियतत्वं नाम व्यापकत्वम्। तच्च कार्याधिकरणवृत्त्यन्ताभावाप्रतियोगित्वम्। यथा पटकार्याधिकरणं तन्तुः, तद्वृत्तिः अत्यन्ताभावः वृक्षाभावः, तस्य प्रतियोगी वृक्षः, अप्रतियोगी तन्तुः, तद्वत्वं तन्तुत्वम्। तच्च नियतत्वम्। अत्र अप्रतियोगित्वं नाम प्रतियोगितानवच्छेदधर्मवत्वम्। तेनात्र प्रतियोगितावच्छेदकधर्मः वृक्षत्वम् , अनवच्छेदको धर्मः तन्तुत्वं, तद्वत्वं हि तन्तुः। तदेव नियतपूर्ववृत्तित्वात् पटं प्रति कारणम्। तेन अन्यथासिद्धिशून्यत्वे सति कार्योत्पत्त्यव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं कारणत्वमिति समायाति।

अनियतरासभादौ अतिव्याप्तिवारणाय नियतेति पदम्। यत्किञ्चित् घटं प्रति मृदाद्यानयनद्वारा रासभस्य कारणतासम्भवेऽपि घटत्वावच्छिन्नं प्रति कारणत्वं नास्ति, यतो यादृशघटादिकार्ये या मृत्तिका रासभेन नानीता तादृशघटवन्निष्ठात्यन्ताभावप्रतियोगित्वस्य रासभे सत्त्वात् रासभो न नियतपूर्ववृत्तिः।

ननु घटत्वावच्छिन्नं प्रति रासभस्य कारणत्वाभावेऽपि यादृशघटादिकार्ये रासभेन मृत्तिका आनीता तादृशघटकार्यं प्रति रासभस्य कारणत्वं कुतो नास्ति ? अत्रोच्यते तादृशघटकार्यं प्रति रासभस्य अन्यथासिद्धत्वान्न कारणत्वम्।

नियतत्वमेव कारणत्वमित्युक्तौ कार्ये स्वस्मिन् स्वनियतत्वसत्त्वेन अतिव्याप्तिः, तद्वारणाय पूर्ववृत्तीति। तथा च स्वव्यापकत्वस्य स्वस्मिन् सत्त्वेऽपि स्वपूर्वकालवृत्तित्वस्य तत्र विरहान्नातिव्याप्तिः।

अतोऽन्यथासिद्धिशून्यत्वे सति कार्योत्पत्त्यव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरण-वृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं कारणत्वमिति फलितार्थः।

नन्वेवमप्यव्याप्तिर्दृश्यते। तथाहि 'क'नामकपटकार्याव्यवहितप्राक्क्षणे यदि 'ख'नामकपटकार्यस्य सामग्री स्थानान्तरे उपस्थिता तर्हि 'ख'नामकपटकार्यस्य

तन्त्वादीनां कारणानां 'क'नामकपटकार्यं प्रति कारणत्वमापद्येत इति चेदन्न कार्याधिकरणस्य कार्यतावच्छेदकसम्बन्धेनैव विवक्षितत्वात्। तत्र कार्यं येन सम्बन्धेन तदधिकरणे तिष्ठति स सम्बन्धः कार्याधिकरणसम्बन्धः। अत्र पटकार्यं तदधिकरणे तन्त्वादौ समवायसम्बन्धेन तिष्ठति। अतोऽत्र कार्यतावच्छेदकसम्बन्धः समवायः। यद्यपि कार्यतावच्छेदकसमवायसम्बन्धेन 'ख'नामकपटकार्यस्य कारणभूतानां तन्तूनां 'क'नामकपटकार्यस्याधिकरणत्वं नास्ति तथापि कालिकसम्बन्धेन 'क'नामकपटकार्यस्याधिकरणं हि 'ख'नामकपटकार्यस्य कारणभूतः तन्तुः। तेन च 'क'नामकपटकार्योत्पत्त्यव्यवहितप्राक्क्षणे कालिकसम्बन्धेन 'क'नामकपटकार्याधिकरणे 'ख'नामकपटकार्यस्य कारणभूतस्य तन्तोः 'क'नामकपटकार्यस्य समवायिकारणत्वमापद्येत। अतः कार्याधिकरणं येन केनापि सम्बन्धेन न विवक्षितमपि तु कार्यतावच्छेदकसम्बन्धेनैव विवक्षितम्। अत्र च कार्यतावच्छेदकसमवायसम्बन्धेन 'क'नामकपटकार्यस्य समवायिकारणं तन्तुरेव तस्याधिकरणं स्यात्, न तु 'ख'नामकपटकार्यस्य समवायिकारणं तन्तुः। अतो नाव्याप्तिः। एवञ्चात्रान्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यतावच्छेदकसम्बन्धावच्छिन्न-कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं कारणत्वमिति फलितम्।

ननु तथाप्यव्याप्तमिदं लक्षणम्। तथाहि 'क'नामकपटकार्योत्पत्त्य-व्यवहितपूर्वक्षणे कार्यता-वच्छेदकसमवायसम्बन्धेन 'क'नामकपटकार्याधिकरणे तन्तौ 'ख'नामकपटकार्यस्य कारणभूतस्य तन्तोः कालिकसम्बन्धेन विद्यमानत्वात् 'क'नामकपटकार्यं प्रति 'ख'नामकपटकार्यस्य कारणभूतस्य तन्तोः कारणत्वापत्तिः। अतः कार्याधिकरणवृत्तित्वं हि कारणतावच्छेदकसम्बन्धेन बोध्यम्। तत्र कार्याधिकरणे कारणं येन सम्बन्धेन विद्यमानं सत् कार्यमुत्पादयति सः सम्बन्धः कारणतावच्छेदकसम्बन्धः। कारणभेदेन कारणतावच्छेदकसम्बन्धोऽपि भिद्यते। यथा पटकार्याधिकरणे तन्तौ तन्तुः तादात्म्यसम्बन्धेन विद्यते। अतः पटकार्यं प्रति यदि तन्तोः कारणत्वं स्वीक्रियते तर्हि तत्र कारणतावच्छेदकसम्बन्धो हि तादात्म्यम्। एवं यदि तन्तुसंयोगस्य कारणत्वमुच्यते तर्हि तत्र कारणतावच्छेदकसम्बन्धः समवायः, पटकार्याधिकरणे तन्तौ समवायसम्बन्धेन तन्तुसंयोगस्य

विद्यमानत्वात्। तुरीवेमादीनां यदि कारणत्वमुच्यते तर्हि पटकार्याधिकरणे तन्तौ स्वप्रयोज्यविजातीयतन्तुसंयोगसम्बन्धेन तेषां विद्यमानत्वात् तत्र कारणतावच्छेदकसम्बन्धः स्वप्रयोज्यविजातीयतन्तुसंयोगः। प्रस्तुते पटकार्यं प्रति तन्तोः कारणत्वे स्वीकृते 'क'नामकपटकार्याधिकरणे तन्तौ कारणतावच्छेदकतादात्म्यसम्बन्धेन 'क'नामकपटकार्यस्य कारणं तन्तुरेव विद्यते, न तु 'ख'नामकपटकार्यस्य कारणं तन्तुः। अतो येन केनापि सम्बन्धेन न कार्याधिकरणवृत्तित्वमपि तु कारणतावच्छेदकसम्बन्धेनैव। तेन नाव्याप्तिः। एवञ्चान्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यतावच्छेदकसम्बन्धावच्छिन्न-कार्याधिकरणवृत्तिकारणतावच्छेदकसम्बन्धावच्छिन्नात्यन्ताभावप्रतियोगितानव-च्छेदकधर्मवत्त्वं कारणत्वमिति फलितार्थः।

ननु कारणलक्षणस्यानन्यथासिद्धत्वघटितत्वात् किन्नामानन्यथासिद्धत्वमिति चेदुच्यते अनन्यथासिद्धत्वं ह्यन्यथासिद्धिविरहः। अन्यथा अन्यप्रकारेण सिद्धोऽन्यथासिद्धः। न अन्यथासिद्धोऽनन्यथासिद्धः। अन्यथासिद्धेर्भेदं प्रदर्शयता भाषापरिच्छेदकृतोच्यते –

"येन सह पूर्वभावः कारणमादाय वा यस्य।
अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम्॥[४]
जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते।
अतिरिक्तमथापि यद्भवेन्नियतावश्यपूर्वभाविनः॥[५]
एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम्।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम्॥[६]
तृतीयन्तु भवेद्व्योम कुलालजनकोऽपरः।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ॥"[७] इति॥

यद्यपि गङ्गेशोपाध्यायादिभिरन्यथासिद्धेः त्रैविध्यमेव प्रतिपादितं तथापि तत्र न विप्रतिपत्तिः। तैर्हि द्वितीयचतुर्थयोः प्रथमतृतीययोरन्तर्भावो विहितः। तेषां नये साहित्यमेकज्ञानविषयत्वमिति बोध्यम्। भाषापरिच्छेदकृता

---

[४]कारिका - १९

[५]कारिका - २०

[६]कारिका - २१

[७]कारिका - २२

तु शिष्यबुद्धिवैशद्यार्थमन्यथासिद्धेः पञ्चविधत्वं प्रतिपादितम्। तेषां स्वरूपमधस्तादुपस्थाप्यते।

## १.१. अन्यथासिद्धिः

### १.१.१. प्रथमान्यथासिद्धः

प्रथमान्यथासिद्धं प्रदर्शयन्त आहुर्विश्वनाथमहाभागाः 'येन सह पूर्वभाव' इति। यत्कार्यं प्रति कारणस्य पूर्ववर्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः। अर्थाद् यद्धर्मावच्छिन्नं कार्यं प्रति कारणस्य पूर्ववर्तिता यद्रूपावच्छेदेन गृह्यते तद्धर्मावच्छिन्नं कार्यं प्रति तद्रूपमन्यथासिद्धम्। तथाहि घटकार्यं प्रति दण्डः कारणम्। अत्र कारणता घटत्वधर्मावच्छिन्ना। दण्डत्वस्यापि दण्डवद् घटकार्यं प्रति पूर्ववृत्तित्वमस्ति, परन्तु तस्य कारणत्वं नास्ति। अत्र घटत्वधर्मावच्छिन्नं घटकार्यं प्रति दण्डरूपकारणस्य पूर्ववर्तिता दण्डत्वरूपावच्छेदेन गृह्यते। अतो घटत्वधर्मावच्छिन्नं घटकार्यं प्रति दण्डत्वमन्यथासिद्धम्। उक्तञ्च भाषापरिच्छेदकृता – 'दण्डत्वादिकमादिमम् ' इति। अत्रादिपदेन तन्त्वादीनामपि अन्यथासिद्धत्वं ज्ञेयम्।

### १.१.२. द्वितीयान्यथासिद्धः

द्वितीयान्यथासिद्धमाह– 'कारणमादाय वा यस्य' इत्यनेन। यस्य स्वातन्त्र्येण पूर्ववर्तित्वं नास्ति किन्तु स्वकारणं गृहीत्वैव पूर्ववर्तित्वं स द्वितीयान्यथासिद्ध इत्यर्थः। अर्थाद् यस्य स्वकारणनैरपेक्ष्येणान्वयव्यतिरेकौ न स्तः, किन्तु स्वकारणमादायैवान्वयव्यतिरेकौ गृह्येते, तदन्यथासिद्धम्। तत्र स्वाधिकरणे कार्यसत्त्वमन्वयः, स्वाभावाधिकरणे कार्याभावो व्यतिरेकः। तथाहि घटं प्रति दण्डः कारणं, तस्य नियतपूर्ववृत्तित्वात्। परन्तु घटकार्यं प्रति दण्डगतरूपस्यापि नियतपूर्ववृत्तित्वेऽपि न कारणत्वं, दण्डगतरूपस्य नियतपूर्वभावित्वज्ञानस्य दण्डाधीनत्वात्। अर्थाद् दण्डरूपं हि स्वाश्रयभूतदण्डेन नियतपूर्वभावित्वमाप्नोति। तेन च दण्डरूपसत्त्वे घटसत्त्वं, दण्डरूपाभावे घटाभाव इत्येवमन्वयव्यतिरेकौ दण्डकारणनिरपेक्षेण न सम्भाव्येते। किन्तु दण्डकारणमादायैव तस्यान्वयव्यतिरेकौ गृह्येते। अतो घटं प्रति दण्डरूपमन्यथासिद्धम्। एवं पटं प्रति तन्तुरूपमपि। उक्तञ्च मिश्रपादैस्तर्कभाषायाम्- 'तन्तुरूपस्य तु नियतः पूर्वभावोऽस्त्येव किन्त्वन्यथासिद्धः पटरूपजननोपक्षीणत्वात् , पटं प्रत्यपि कारणत्वे कल्पनागौरवप्रसङ्गात् ' इति।

इदमत्रावधेयं यदितरान्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकशालित्वमित्युक्तौ प्रथमद्वितीयान्यथासिद्ध्योः सङ्ग्रहेऽपि भेदेनान्यासिद्धिद्वयप्रदर्शनं शिष्यबुद्धिवैशद्यार्थम्।

## १.१.३. तृतीयान्यथासिद्धः

'अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम्' इत्यनेन तृतीयमन्यथासिद्धमाह। अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथा-सिद्धत्वमित्यर्थः। अर्थात् प्रकृतकार्यातिरिक्तकार्यनिरूपितनियतपूर्ववृत्तित्वघटितधर्मावच्छिन्नप्रकृतकार्यनिरू-पितनियतपूर्ववृत्तिताश्रयत्वं प्रकृतकार्यनिरूपितान्यथासिद्धत्वमिति फलितार्थः। यथा घटादिकं प्रत्याकाशस्यान्यथासिद्धत्वम्। तथाहि आकाशत्वज्ञानं विनाकाशं घटपूर्ववर्तीति ज्ञानासम्भवादाकाशत्वज्ञानमादावावश्यकम्। तत्राकाशत्वं हि शब्दसमवायिकारणत्वं, तस्य शब्दपूर्ववर्तित्वघटितत्वात्। एवं शब्दं प्रत्याकाशस्य पूर्ववर्तित्वे ज्ञाते एवाकाशस्य घटकार्यं प्रति पूर्ववृत्तित्वं गृह्यते, तेनाकाशस्य घटकार्यं प्रत्यन्यथासिद्धत्वम्।

न चाकाशस्य विभुत्वेन सर्वमूर्तद्रव्यसंयोगित्वादाकाशसंयोगादिकं प्रत्याकाशस्य अन्यथासिद्धत्वप्रसङ्गः, द्रव्यत्वेनैवात्र विवक्षितत्वात्। आकाशत्वेन तदन्यथासिद्धमपि द्रव्यत्वेन न तदन्यथासिद्धं, शब्दपूर्ववर्तित्वमज्ञात्वापि संयोगपूर्ववर्तित्वग्रहात्।

ननु न केवलं शब्दसमवायिकारणत्वमाकाशत्वं, किन्तु शब्दाश्रयत्वमपि। तथा चाकाशस्यान्यं प्रति पूर्ववृत्तितयाऽगृह्यमाणत्वान्नान्यथासिद्धत्वमिति चेदुच्यते तत्राकाशस्य वक्ष्यमाणपञ्चममेव घटादिनिरूपितान्यथासिद्धत्वम्।

नन्वेवमप्याकाशस्य शब्दं प्रत्यपि समवायिकारणत्वं न स्यात्, अवच्छेदकाभावात्। न चाकाशत्वस्यावच्छेदकत्वं, तस्य शब्दसमवायिकारण-त्वेनावच्छेद्यत्वाद्, अवच्छेद्यस्यावच्छेदकत्वायोगात्। न च निरवच्छिन्न-कारणता सम्भवति, अन्यथा कार्याणां नियतकारणनियम्यत्वानुपपत्तिः। अतः किमवच्छेदकमिति चेदुच्यते न्यायसिद्धान्तमुक्तावलीकारेण- 'कवत्त्वादिकम्' इति। अर्थात् कवर्णवत्त्वादिकमत्रावच्छेदकम्।

नन्वेवमपि विनिगमनाविरहात् बहूनां वर्णानां कारणतावच्छेदकत्वस्वीकारे गौरवं स्यात्, कारणतावच्छेदकधर्मविशिष्टस्यैव कार्योत्पत्तिहेतुत्वेन ककारादिवर्णा-

सत्त्वदशायामवच्छेदका-भावाच्छब्दान्तरानुत्पत्तिश्च स्यात् , अतः कल्पान्तरमाह - 'विशेषपदार्थो वा' इति। तथा च ककारादिवर्णाभावकाले शब्दान्तरोत्पत्तये कारणतावच्छेदकरूपेणाकाशे विशेषस्वीकारः कर्तव्यः।

## १.१.४. चतुर्थान्यथासिद्धः

चतुर्थमन्यथासिद्धमाह 'जनकं प्रति पूर्ववर्तितामपरिज्ञाय न यस्य गृह्यते' इति। अर्थाद् यत्कार्यजनकं प्रति पूर्ववर्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्। कार्यजनकं प्रति गृहीतपूर्ववृत्तिर्यस्तत्कार्यं प्रति पूर्ववर्तितया ज्ञायते कारणकारणं तच्चतुर्थमन्यथासिद्धमिति फलितार्थः। यथा कुलालपितुः घटं प्रति। तस्य हि कुलालपितृत्वेन पूर्ववर्तित्वात् कार्यजनकं कुलालं प्रति कारणत्वं, कुलालस्य च घटं प्रति पूर्ववर्तित्वात् कारणत्वम्। अतः कुलालपितुरपि परम्परया घटकार्यं प्रति पूर्ववर्तित्वं गृह्यते। तेन कारणकारणस्य कुलालपितुर्घटकार्यं प्रत्यन्यथासिद्धत्वम्।

ननु कारणकारणस्यान्यथासिद्धत्वे स्वर्गं प्रति यागस्यान्यथासिद्धत्वमापद्येत, तस्य स्वजन्यस्वर्गजनकापूर्वं प्रति कारणत्वादिति चेन्न 'दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत' इति श्रुत्या स्वर्गं प्रति यागस्य पूर्ववर्तित्वे प्रथममवगते पश्चादपूर्वं प्रति पूर्ववर्तित्वग्रहात्। तथा चोक्तमीश्वरानुमानमणौ मणिकृता- 'यत्र जन्यस्य पूर्वभावेऽवगते जनकस्य पूर्वभावोऽवगम्यते, तत्र जन्येन जनकस्यान्यथासिद्धिः। यत्र च जनकस्य तथात्वेऽवगते जन्यस्य पूर्वभावावगमस्तत्र तद्द्वारा तस्य जनकत्वमेव'[८] इति। तथा च श्रूयमाणस्वर्गसाधनत्वनिर्वाहाय कल्पितस्यापूर्वस्य न स्वर्गसाधनत्वविरोधः। अत एव व्यापारेण व्यापारिणो नान्यथासिद्धत्वमिति नियमः।

## १.१.५. पञ्चमान्यथासिद्धः

'अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः' इत्यादिना पञ्चमं तथान्तिमम् अन्यथासिद्धमाह। अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तद्भिन्नम् अन्यथासिद्धमिति तदर्थः। लघुनियतपूर्ववर्तित्वरूपमवश्यक्लृप्तत्वमिह बोध्यम्। अर्थात् कार्योत्पत्तौ लघुनियतपूर्ववृत्तित्वस्यैव कारणत्वं, तद्भिन्नानां

[८] तत्त्वचिन्तामणौ

चान्यथासिद्धत्वम्। यथा यद्घटव्यक्तिं प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति तद्घटजातीयं प्रति लघुनियतपूर्ववर्तिभिर्दण्डादिभिरेव घटोत्पत्तिसम्भवे रासभोऽन्यथासिद्धः, रासभस्य कारणत्वस्वीकारे गौरवात्। एवं पाकजस्थले गन्धोत्पत्तिसमये गन्धं प्रति रूपप्रागभावस्यान्यथासिद्धत्वम्। गन्धोत्पत्तिसमये गन्धप्रागभाव इव रूपप्रागभावस्यापिनियतपूर्ववृत्तित्वेऽपि गन्धं प्रति रूपप्रागभावस्य कारणत्वं नास्ति, गन्धाभावापेक्षया रूपप्रागभावस्य प्रतियोगिज्ञानस्य गौरवेणोपस्थितेः।

लघुत्वं च शरीरकृतमुपस्थितिकृतं सम्बन्धकृतञ्च। तत्र घटादिप्रत्यक्षं प्रत्यनेकद्रव्यसमवेतत्वापेक्षया महत्त्वस्य कारणतायां शरीरकृतं लाघवम्। यद्यपि महत्त्वानेकद्रव्यत्वयोस्तुल्याधिकरणवृत्तित्वेन तुल्यमवश्यक्लृप्तत्वं, तथापि महत्त्वापेक्षयानेकद्रव्यत्वस्य शरीरकृतगुरुतया लघुभूतं महत्त्वमेव नियतपूर्ववृत्तित्वेन अवश्यक्लृप्तम्। न च महत्त्वस्यान्यथासिद्धत्वेऽनेकद्रव्यत्वस्य चावश्यक्लृप्तत्वे किं विनिगमकमिति वाच्यं, महत्त्वजातेः कारणतावच्छेदकत्त्वे लाघवात्। गन्धं प्रति रूपप्रागभावापेक्षया गन्धप्रागभावस्य कारणत्वे चोपस्थितिकृतं लाघवम्, अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वाद् गन्धरूपकार्योपस्थित्यनन्तरं गन्धप्रागभावस्यैव शीघ्रमुपस्थितेः रूपज्ञानसापेक्षत्वात्। घटं प्रति दण्डत्वदण्डरूपाद्यपेक्षया दण्डादेः कारणत्वे दण्डघटितपरम्परासम्बन्धानपेक्षत्वेन सम्बन्धकृतं लाघवम्। तथा च लघुनियतपूर्ववर्तिभिन्नत्वमन्यथासिद्धत्वमित्यन्यथासिद्धेः सामान्यलक्षणम्।

न चानियतरासभादेः पञ्चमान्यथासिद्धत्वात्तेनैव वारणे नियतपदं व्यर्थमिति वाच्यम्, अवश्यक्लृप्तत्वस्यैकस्याभावेन यत्र प्रामाणिकानां न कारणत्वव्यवहारस्तत्तद्भेदस्य निवेशनीयतया नियतपदेनैव रासभादेर्वारणे तद्भेदस्याप्रवेशादित्यभिप्रायात्।

एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकस्तेनैव परेषां चरितार्थत्वात्। तथा हि दण्डादिभिरवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भवे दण्डत्वादिकमन्यथासिद्धम्। न च वैपरीत्ये किं विनिगमकमिति वाच्यं, दण्डत्वस्य कारणत्वे दण्डघटितपरम्परायाः सम्बन्धकल्पने गौरवात्। एवमन्येषामप्यनेनैव चरितार्थत्वं सम्भवति।

एवञ्चान्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यता-वच्छेदकसम्बन्धावच्छिन्नकार्याधिकरणवृत्तिकारणतावच्छेदकसम्बन्धावच्छिन्ना-

त्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं कारणत्वमिति निर्दुष्टं लक्षणम्।

## १.२. पूर्वपक्षिणां मतखण्डनम्

पूर्वपक्षिणो मीमांसकास्तु 'कार्यानुकृतान्वयव्यतिरेकि कारणम्' इत्याहुः। कार्येणानुकृतौ कार्यानुविहितौ इत्यर्थः। कार्यानुकृतौ अन्वयव्यतिरेकौ यस्य तत् कार्यानुकृतान्वयव्यतिरेकि इति। तेन कार्येण यदन्वयव्यतिरेकिविशिष्टं तत्कारणमिति लक्षणार्थः। अर्थात् मीमांसकाः अन्वयव्यतिरेकाभ्यां समेषां पदार्थानां कारणत्वं स्वीकुर्वन्ति। तत्सत्त्वे तत्सत्त्वेत्यन्वयः। तदभावे तदभाव इति च व्यतिरेकः। यथा वह्निसत्त्वे दाहः, वह्न्यभावे दाहाभावश्चेत्यन्वव्यतिरेकाभ्यां दाहवह्न्योः कार्यकारणभाव उपपद्यते। तत्र च दाहात्मककार्येण वह्नेरन्वयव्यतिरेकवत्त्वात् कारणत्वं संगच्छते। एवं घटाद्यात्मककार्येण कपालादेरन्वयव्यतिरेकवत्त्वात् कारणत्वं संगतम्।

मीमांसकमतं विरुन्धानाः केशवमिश्रपादा आहुः– 'तदयुक्तम्। नित्यविभूनां व्योमादीनां कालतो देशतश्च व्यतिरेकासम्भवेनाकारणत्वप्रसङ्गात्' इति। नैयायिकानां नये नान्वयव्यतिरेकाभ्यां समेषां पदार्थानां कारणत्वं निर्णेयम्। तथाहि कालदिगात्मादीनां नित्यपदार्थानां कुत्रापि कदापि च व्यतिरेकविरहान्न तत्र कारणलक्षणसंगतिः। अपि च विभुपदार्थानां मूर्तपदार्थसंयोगस्य दैशिकाभावविरहाद् व्यतिरेकाभावेन न तत्र कारणलक्षणसंगतिः। तेन कालसत्त्वे घटसत्त्वेत्यन्वये सत्यपि कालाभावे घटाभाव इति व्यतिरेकाभावान्न कालादीनां कारणत्वम्।

नन्वस्तु व्यतिरेकाभावात् कालादीनामकारणत्वप्रसङ्गः, तेन का हानिः? अत्रोच्यते आकाशं शब्दसमवायिकारणं तथा सर्वमूर्तद्रव्यसंयोगित्वात् तेषां कारणम्। एवं दिशः कालस्यापि सर्वमूर्तद्रव्यसंयोगित्वात् संयोगं प्रत्यसाधारणकारणत्वं, कार्यमात्रं प्रति च साधारणकारणत्वं प्रसिद्धम्। एवमात्मनोऽपि ज्ञानं प्रति कारणत्वं प्रसिद्धम्। तथाहि कालादीनां कारणत्वं प्रतिपादयता उदयनाचार्येणोच्यते–

'पूर्वभावो हि हेतुत्वं मीयते येन केनचित्।
व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा न हि॥'[१] इति॥

अतः कालादीनां यद्यकारणत्वप्रसङ्गस्तर्हि प्रसिद्धिकारणत्वभङ्ग आपद्येत। तेन

[१]किरणावल्ल्याम्

’कार्यानुकृतान्वयव्यतिरेकि कारणम् ’ इति लक्षणं व्योमादिषु नित्यद्रव्येष्वव्याप्तम्।

केषाञ्चिन्नये ‘कार्यव्यतिरेकप्रयोजकव्यतिरेकप्रयोगित्वं कारणत्वमि’ति कारणलक्षणम्। अर्थात् कारणाभावात्कार्याभावो भवति। यस्याभावः कार्याभावप्रयोजकस्तत्कारणमित्यर्थः। परन्तु नैयायिकनये तदयुक्तम् , कारणीभूताकाशादिनित्यविभुद्रव्याणामभावाभावादव्याप्तिदोषदुष्टत्वात्।

## २. कार्यलक्षणम्

ननु कारणलक्षणघटितकार्यपदस्य कोऽर्थ इति चेदुच्यतेऽन्नम्भट्टेन– ‘कार्यं प्रागभावप्रतियोगि’ इति। अर्थात् प्रागभावप्रतियोगित्वं कार्यस्य लक्षणम्। उत्पत्तेः पूर्वम् ‘इह घटो भविष्यति’ इति या प्रतीतिर्जायते तत्प्रतीतिविषयो योऽभावः सः प्रागभावः, तत्प्रतियोगि घटादिकार्यम्। जन्यस्यैव प्रागभावो विद्यते न तु नित्यस्य। अतः कार्यमेव प्रागभावप्रतियोगीत्यर्थः।

## ३. कारणभेदनिरूपणम्

कार्यकारणभावविषये कारणलक्षणनिरूपणापेक्षया यत्र वैमत्यं स्पष्टं तत् किल कारणविभागविषये। तत्र समवायिकारणमसमवायिकारणं निमित्तकारणमित्येकतः सत्त्वेऽपि निमित्तकारणमभ्युपगम्योपादान-कारणाङ्गीकारेणापरः पक्षोऽपि भारतीयदर्शनेषु प्रसिद्धः। तत्र वेदान्तिनः सांख्यिनश्चोपादानकारणं निमित्तकारणञ्चेति कारणस्य द्वैविध्यमङ्गीकुर्वन्ति। एवम्बिधस्य धाराद्वैविध्यस्य बीजं समवायसम्बन्धः किल, यस्याङ्गीकारात् समवाय्यसमवायिनोरुद्गमः। इदमत्र स्मर्तव्यं यन्न्यायवैशेषिकदर्शनेषु समवायसम्बन्धस्याभ्युपगमात् तत्र समवाय्यसमवायिनोः प्रसरः, दर्शनान्तरेषु च समवायसम्बन्धस्यापाकरणान्न तयोः प्रसङ्गः। अतः न्यायवैशेषिकनये समवाय्यसमवायिनिमित्तभेदात् कारणं त्रिविधम्।

अत्रेदं ज्ञातव्यं यत् कारणस्यैवं विभागत्रयं न सम्भवति। विभागो नाम सामान्यतधर्मावच्छिन्नानां साक्षाद्व्याप्यपरस्परधर्मविशिष्टानां धर्मिणां प्रतिपादनम्। यथा वैशेषिकनये द्रव्यं हि नवविधम्। विभाजकधर्मेण विभागो भवति। पृथिवीत्वजलत्वादिधर्माः द्रव्यस्य विभाजकाः। द्रव्यं हि विभाज्यं, विभाज्यतावच्छेदकधर्मश्च द्रव्यत्वम्। नवानामेव द्रव्याणां द्रव्यत्वाद् द्रव्यत्वं हि सामान्यधर्मः। विभाजकधर्मश्च

विभाज्यतावच्छेदकसामान्यधर्मसाक्षाद्व्याप्यपरस्परविरुद्धधर्मविशिष्टश्च भवति। पृथिवीत्वजलत्वादिधर्माणां विभाज्यतावच्छेदकसाक्षाद्व्याप्यपरस्परविरुद्धधर्मविशिष्ट-त्वाद् द्रव्यस्य विभाजकत्वम्। घटत्वादिधर्माः द्रव्यत्वव्याप्या अपि द्रव्यत्वसाक्षाद्व्याप्याः न, घटत्वस्य पृथिवीत्वव्यापकत्वात्। पृथिवीत्व-जलत्वादिधर्माणां तु एकाधिकरणवृत्तित्वाभावात् तेषां परस्परविरुद्धधर्मवत्त्वं तु स्पष्टमेव। प्रकृते हि विभाज्यं कारणं, विभाज्यतावच्छेदकधर्मश्च कारणत्वम्। विभाजकधर्माः समवायिकारणत्वम् असमवायिकारणत्वं निमित्तकारणत्वञ्चेति। एते हि कारणस्य विभाज्यतावच्छेदकधर्मस्य वा साक्षाद्व्याप्यधर्माः। परन्तु एते न परस्परविरुद्धाः, एकाधिकरणे वर्तमानत्वात्। एक एव पदार्थो युगपत् कस्यापि समवायिकारणं कस्यचिदसमवायिकारणं कस्यचिच्च निमित्तकारणं भवितुमर्हति। यथा तन्तवः पटं प्रति समवायिकारणम्। तन्तुभिर्यदि कस्यचिद्वस्तुनः बन्धनं भवत्युत तन्तवो यदि प्रत्यक्षेण न ज्ञायन्ते तर्हि बन्धनं प्रति अथवा ज्ञानं प्रति तन्तूनां निमित्तकारणत्वं संगच्छते। एवं तन्तुष्वेव समवायिकारणत्वं निमित्तकारणत्वञ्च संगच्छेते। पुनश्च तन्तुसंयोगः पटं प्रत्यसमवायिकारणं, तन्तुसंयोगस्य ध्वस्ते सति ध्वंसं प्रति तन्तुसंयोगः निमित्तकारणम्। एवमेकस्मिन्नेव तन्तुसंयोगे असमवायिकारणत्वव्यपदेशः, निमित्तकारणत्वव्यपदेशश्च। अतः कारणत्वसाक्षाद्व्याप्या अपि परस्परविरुद्धधर्मवत्त्वात् समवायिकारणत्वा-समवायिकारणत्वनिमित्तकारणत्वरूपधर्माः न विभाजकाः।

ननु प्रत्येककार्यस्य कारणविभागा एते, न तु कारणसामान्यस्य। अर्थात् कस्यापि कार्यस्य कस्मिन्नपि कारणे समवायिकारणत्वादिधर्मेष्वेक एव तिष्ठति, तेषां परस्परविरुद्धधर्मवत्त्वात्। यथा पटं प्रति तन्तूनां समवायिकारणत्वमेव, न त्वसमवायिकारणत्वं, नापि निमित्तकारणत्वम्। एवं तन्तुसंयोगेऽसमवायिकारणत्वं, तुरीवेमादौ च निमित्तकारणत्वमेव तिष्ठति। एवं परस्परविरुद्धत्वात् पटकार्यं प्रति कारणानां त्रैविध्यं संगतमेव। अतः समवायिकारणत्वादिधर्माणां तत्तत्कारणत्वसाक्षाद्व्याप्यत्वात् परस्परविरुद्धत्वाच्च कारणविभाग उपपन्न एव। अत्रोच्यते यत् प्रत्येककार्यस्य कारणानां विभागे स्वीकृतेऽपि समवायिकारणत्वादिधर्माणामेकाधिकरणवृत्तित्वात् परस्परविरुद्धधर्मवत्त्वाभावात् कारणत्वस्य विभाजकत्वं न संगच्छते। यथा न्यायवैशेषिकनये कालो हि कार्यमात्रं प्रति निमित्तकारणम्, अपि च कालस्य विभुत्वात् सर्वमूर्तद्रव्यसंयोगित्वेन समवायिकारणत्वमपि संगच्छते।

संयोगनामककार्यं प्रत्येव कालस्य समवायिकारणत्वं निमित्तकारत्वञ्च संगच्छेते। तेन चोभयोः परस्परविरुद्धाभावान्न विभाजकत्वम्। अतः कारणं त्रिविधमिति विभागो न सम्भवति। वस्तुतस्त्वत्र कारणतायाः एव विभागः प्रदर्शितो नैयायिकैः, न तु कारणसामान्यस्य। अतः विभाज्यतावच्छेदकधर्मोऽत्र कारणतात्वं, न तु कारणत्वम्। तेन विभाज्यतावच्छेदककारणतात्वसाक्षाद्व्याप्याः परस्परविरुद्धधर्मविशिष्टाः समवायिकारणतात्वादिधर्माः। अत एते विभाजकाः। कारणतात्रैविध्यात् कारणस्यापि त्रैविध्यव्यपदेशः।

## ३.१. समवायिकारणम्

समवायसम्बन्धमङ्गीकुर्वतां न्यायवैशेषिकानां नये कारणत्रयमध्ये प्रथमं कारणं समवायिकारणम्। समीरितं तर्कसङ्ग्रहकृतान्नम्भट्टेन– 'यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्' इति। समर्थितमेतद् विश्वनाथमहोदयेन– 'यत्समवेतं कार्यं भवति ज्ञेयन्तु समवायिजनकं तत्'[१०] इति। यदित्यव्यं यस्मिन्नर्थे। तथा च यस्मिन् समवेतं सद् अर्थात् समवायसम्बन्धेन सम्बन्धं सत्कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः। यस्मिन् समवायसम्बन्धेन कार्यमुत्पद्यते तत्कार्याधिकरणम्। कार्याधिकरणे नियतपूर्ववृत्ति यद्भवति तत्कारणम्। अतो यस्मिन् समवायसम्बन्धेन कार्यमुत्पद्यते तत्र नियतपूर्ववृत्ति यद्भवति तत्समवायिकारणम्। कार्याधिकरणवृत्तिश्च कारणतावच्छेदकसम्बन्धेन ग्राह्या इति तु पूर्वमेवोक्तम्। कारणतावच्छेदकसम्बन्धश्च भिन्नो भिन्नो भवितुमर्हति। तथा च स्वकारणतावच्छेदकयद्धर्मविशिष्टे यद्धर्मविशिष्टं कार्यं समवायसम्बन्धेनोत्पद्यते तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नं समवायिकारणमित्यर्थः। यथा तन्तवः पटस्य समवायिकारणम्। पटः कार्यमवयवी। तन्तवोऽवयवाः। अवयवावयविनोः सम्बन्धः समवायः। अतः पटस्तन्तुषु समवायेन वर्तते। तन्तुषु च तन्तवस्तादात्म्येन वर्तन्ते। अतस्तन्तुनिष्ठा कारणता तादात्म्यसम्बन्धावच्छिन्ना, पटनिष्ठा कार्यता समवायसम्बन्धावच्छिन्ना। पटत्वावच्छिन्नं कार्यं पटः पटकारणतावच्छेदकतन्तुत्वावच्छिन्ने तन्तुषु समवायसम्बन्धेनोत्पद्यन्त इति पटत्वावच्छिन्नं प्रति तन्तुत्वावच्छिन्नं समवायिकारणम्। समीरितञ्च न्यायबोधिनीटीकाकृता– 'समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्य-

[१०] भाषापरिच्छेदः कारिका - १८

सम्बन्धावच्छिन्नकारणत्वं समवायिकारणत्वम्' इति। समवायसम्बन्धेन घटाधिकरणे कपालादौ कपालादेस्तादात्म्यसम्बन्धेनैव सत्त्वात् समवाय-सम्बन्धावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकपाल-त्वावच्छिन्नकारणतायाः कपालादौ सत्त्वाल्लक्षणसमन्वयः। किं बहुना समवायेन जन्यभावत्वावच्छिन्नं प्रति तादत्म्यसम्बन्धेन द्रव्यस्यैव कारणत्वाज्जन्यभावेषु द्रव्यगुणकर्मसु त्रिषु द्रव्यमेव समवायिकारणं भवति, जन्यद्रव्ये तु तत्तद्रव्यावयवाः समवायिकारणस्वरूपाः भवन्तीति न्यायसिद्धान्तः। अतो गुणादावपि द्रव्यमेव समवायिकारणम्। यथा पटस्तन्तुरूपं प्रति समवायिकारणम्। उक्तञ्चान्नम्भट्टेन– 'पटश्च स्वगतरूपादेः' इति। पटरूपं हि गुणः, पटश्च गुणी। गुणगुणिनोः सम्बन्धः समवायः। अतः पटरूपं समवायेन पटे वर्तते, पटश्च पटे तादात्म्येन वर्तते। पटरूपत्वावच्छिन्नं कार्यं पटत्वावच्छिन्ने उत्पद्यतेऽतः पटत्वावच्छिन्नं पटरूपत्वावच्छिन्नं प्रति समवायिकारणमित्यर्थः। अर्थात् समवायसम्बन्धेन पटरूपाधिकरणे पटे पटस्य तादात्म्यसम्बन्धेनैव सत्त्वात् समवायसम्बन्धावच्छिन्नपटरूपत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धा-वच्छिन्नपटत्वावच्छिन्नकारणतायाः पटे सत्त्वाल्लक्षणसमन्वयः।

ननु पटादयो यदैव जायन्ते तदैव तद्गतरूपादयोऽपि, अतस्तयोः कार्यकारणभाव एव नास्ति समकालीनत्वेन पौर्वापर्याभावादिति चेदुच्यते न गुणगुणिनोः समकालीनं जन्म, द्रव्यं निर्गुणमेव प्रथमुत्पद्यते पश्चाच्च तत्र गुणाः उत्पद्यन्ते। समकालोत्पत्तौ तु द्रव्यगुणयोः भेद एव न स्यात्, कारणभेदनियतत्वात् कार्यभेदस्य। अतः प्रथमे क्षणे निर्गुण एव घट उत्पद्यते। गुणेभ्यः पूर्वभावित्वाद् द्रव्यं हि गुणानां समवायिकारणम्।

न च प्रथमे क्षणे गुणाश्रत्वाभावाद् द्रव्यत्वापत्तिरिति वाच्यम्, गुणाश्रययोग्यत्वं द्रव्यत्वमिति द्रव्यलक्षणात्। योग्यता च गुणानाम् अत्यन्ताभावाभावः। अर्थात् प्रतियोगिव्यधिकरणगुणाभावाभावो हि गुणाश्रययोग्यता। तेन यद्यपि उत्पत्तिक्षणे जन्यद्रव्ये गुणाभावो विद्यते तथापि द्वितीये क्षणे गुणाभावस्य प्रतियोगिनः गुणस्योदयात् गुणाभावः प्रतियोगिव्यधिकरणो न भवति। तेन प्रतियोगिव्यधिकरणगुणाभावाभावत्वस्य जन्यद्रव्ये विद्यमानत्वात् गुणाश्रयत्वं द्रव्यत्वमिति द्रव्यलक्षणं प्रथमे क्षणे जन्यद्रव्ये समन्वितम्। अतो नाव्याप्तिः।

## ३.२. असमवायिकारणम्

न समवायिकारणमसमवायिकारणमिति नञ्तत्पुरुषसमासः। नन्वत्र नञः कोऽर्थः? तथाहि नञः षडर्थाः हि प्रसिद्धाः। उक्तञ्च–

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥ इति॥

न चात्र नञोऽभावरूपार्थो विवक्षितः। तेन हि निमित्तकारणे तुरीवेमादावतिव्याप्तिः स्यात्, तस्य समवायिकारणभिन्नत्वात्। अतोऽत्र नञः सादृश्यरूपार्थ एव विवक्षितः। अर्थादसमवायिकारणं हि समवायिकारणसदृशम्। यथा समवायिकारणनाशाद् द्रव्यनाश एवमसमवायिकारणनाशेऽपि द्रव्यनाशो दृश्यत इति तयोः सादृश्यम्।

तत्रासमवायिकारणलक्षणं लक्षयतान्नम्भट्टेनोच्यते– 'कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्' इति। लक्षणमिदं द्वेधा विभक्तुं शक्यते– 'कार्येण सहैकस्मिन्नर्थे समवेतं सत् यत् कारणं तदसमवायिकारणम्' इति, 'करणेन सहैकस्मिन्नर्थे समवेतं सत् यत्कारणं तदसमवायिकारणम्' इति च।

तत्र कार्येण सह एकस्मिन्नर्थे एकाधिकरणे समवायसम्बन्धेन वर्तमानं सत् यत्कारणं तदसमवायिकारणमिति प्रथमलक्षणार्थः। तत्र दृष्टान्तमाह तर्कसङ्ग्रहकारः- 'यथा तन्तुसंयोगः पटस्य' इति। तथाहि पटः समवायेन तन्तुषु वर्तते, तन्तुषु च समवायेन तन्तुनां संयोगोऽपि वर्ततेऽतः कार्येण पटेन सहैकस्मिन्नर्थेऽभिन्नेऽधिकरणे तन्त्वात्मके समवायसम्बन्धेन वर्तमानत्वे सति यत्कारणं तन्तुसंयोगः स पटं प्रत्यसमवायिकारणम्।

कारणेन सहाभिन्नाधिकरणे समवायसम्बन्धत्वे सति यत्कारणं तदसमवायिकारणमिति द्वितीयलक्षणार्थः। अत्र कारणेनेत्यस्य स्वकार्यसमवायिकारणेनेत्यर्थः। दृष्टान्तमाह- 'तन्तुरूपं पटगतरूपस्य च' इति। स्वं तन्तुरूपं, स्वकार्यं पटरूपं, स्वकारणं पटः समवायेन तन्तुषु वर्तते, तत्र तन्तुषु समवायेन तन्तूनां रूपं वर्तते। तथा च स्वकार्यसमवायिकारणे एकस्मिन्नर्थे तन्त्वात्मके कार्ये समवेतत्वे सति कारणत्वात् तन्तुरूपं पटरूपस्यासमवायिकारणम्।

इदमत्रावधेयं यत् साक्षात्सम्बन्धपरम्परासम्बन्धभेदेनैवात्रासमवायिकारणस्य द्वैविध्यम्। अत्र च साक्षात्सम्बन्धः समवायः। यथा तन्तुसंयोगस्तन्तुषु

साक्षात्सम्बन्धेनैव वर्तमानं सत् पटं प्रत्यसमवायिकारणम्। परम्परासम्बन्धश्च स्वसमवायिसम्बन्धः। यथा तन्तुरूपस्य समवायिकारणं तन्तुः, तन्तुषु च समवायसम्बन्धेन पटो वर्तते। अतः पटरूपसमवायिकारणे पटे स्वसमवायिसमवायसम्बन्धेन तन्तुरूपस्य वर्तमानत्वात् तन्तुरूपं पटरूपं प्रत्यसमवायिकारणम्।

आत्मविशेषगुणेऽतिव्याप्तिवारणाय 'कारणेन सह' इत्युक्तम्, आत्मनो नित्यस्य कारणस्याप्रसिद्धेः। इच्छां प्रति ज्ञानं निमित्तकारणं भवति, इच्छात्मकेन कार्येण सहैकाधिकरणे आत्मनि समवायेन वर्तमानस्य निमित्तकारणात्मकज्ञानस्येच्छां प्रत्यसमवायिकारणत्वापत्तिः, तद्वारणाय तदुपादानम्।

कार्येण द्व्यणुकादिना सहैकस्मिन् परमाणौ समवेतस्य विशेषस्यापि कारणत्वापत्तिः। तद्वारणाय् कारणमिति। तथा च विशेषाणां कुत्रापि कारणत्वमेव नास्तीति नातिव्याप्तिः।

अतः समवायसम्बन्धावच्छिन्नकार्यतानिरूपिता या समवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्ना कारणता तदाश्रयत्वम् असमवायिकारणत्वम् इत्यसमवायिकारणस्य सामान्यलक्षणम्।

तत्र द्रव्यासमवायिकारणीभूतावयवसंयोगादौ तु समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिता समवायसम्बन्धावच्छिन्ना कपालद्वयसंयोगनिष्ठा कारणता कपालद्वयसंयोगे वर्तते। अवयविगुणभूतघटपटरूपादौ त्ववयवगुणभूतकपालतन्तुरूपादेः स्वपदग्राह्यकपालतन्तुरूपादिसमवायिकपालतन्त्वादिसमवेतत्वसम्बन्धेनैव कारणत्वात्, तत्सम्बन्धावच्छिन्नकारणताश्रयत्वम् अवयवगुणभूतकपालतन्तुरूपादौ वर्तते, अवयवगुणकपालतन्तुरूपादेः स्वशब्दग्राह्यकपालरूपतन्तुरूपसमवायिकपालतन्तुसमवेतत्वसम्बन्धेन घटपटादौ सत्त्वात्। किञ्च, कारणसामान्यलक्षणान्तर्गतो यः कार्याधिकरणवृत्तिरत्यन्ताभावः स समवायसम्बन्धावच्छिन्नो भवति चेत् तत् प्रतियोगितानवच्छेदकधर्मवत्त्वरूपेण असमवायिकारणस्य लाभः स्यादिति असमवायिकारणलक्षणे कारणसमान्यलक्षणं सङ्गतम्।

भाषापरिच्छेदकृता तु असमवायिकरणलक्षणं लक्षयता उच्यते– 'तत्रासन्नं जनकं द्वितीयम्' इति। अर्थात् समवायिकारणसम्बन्धत्वम् असमवायिकारणत्वम् इत्यर्थः। समर्थितमेतत् तर्कभाषाकारेण केशवमिश्र-

महोदयेन– 'यत्समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यं तदसमवायिकारणम्' इति।

ननु असमवायिकारणस्य एवं लक्षणत्वे तुरीसंयोगे पटसमवायिकरणलक्षणस्यातिव्याप्तिः स्यात्, पटस्य समवायिकारणेषु तन्तुषु समवायेन वर्तमानस्य तुरीसंयोगस्य पटजनकत्वात्। तेन समवायिकारणलक्षणे तुरीसंयोगभेदो निवेशनीयः, इति चेन्न, लाघवात् पटाद्यसमवायिकारणविशेषलक्षणे एव तादृग्भेदनिवेशस्य उचितत्वात्। ननु तथापि ज्ञानादिनिमित्तकारणस्य इच्छादेः ज्ञानाद्यसमवायिकारणत्वापत्तिः स्यात्, ज्ञानसमवायिकारणे आत्मनि इच्छादेरपि समवायेन वर्तमानत्वात् ज्ञानादिजनकत्वाच्च, इति चेद् आत्मविशेषगुणभिन्नत्वे सति इति पदम् असमवायिकारणलक्षणे निवेशनीयम्।

नन्वस्तु ज्ञानादीनामिच्छादिकं प्रत्यसमवायिकारणत्वमिति चेदुच्यते व्योमशिवाचार्येण– 'धर्मादधर्मदुःखयोरनुत्पादादधर्माच्च धर्मसुखयोः अनुत्पत्तेरात्ममनःसंयोगस्यैव निखिलात्मविशेषगुणोत्पत्तौ सामर्थ्याभ्युपगमात्, ज्ञानादीनां पुनस्तथात्वकल्पने गौरवात्'[११] इति।

अतः समवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धेन समवायिकारणे प्रत्यासन्नत्वे सत्यात्मविशेषगुणान्यत्वे सति कारणत्वमसमवायिकारणत्वमिति सामान्यलक्षणं पर्यवसितम्।

## ३.३. निमित्तकारणम्

न्यायवैशेषिकदार्शनिकानां नये कारणत्रयमध्ये तृतीयं कारणं किल निमित्तकारणम्। समीरितं तर्कसङ्ग्रहकृदन्नम्भट्टेन– –'तदुभयभिन्नं कारणं निमित्तकारणम्' इति। समर्थितमेतद् विश्वनाथमहोदयेन– 'आभ्यां परं तृतीयं स्यात्' इति। अत्र 'तदुभय' इति 'आभ्याम्' इति पदद्वयं समवाय्यसमवायिकारणद्वयोपलक्षकम्। तेन समवाय्यसमवायिकारणभिन्नं कारणं निमित्तकारणमित्यायातम्। तथा चोक्तं तर्कदीपिकायाम्- 'समवाय्यसमवायिभिन्नं कारणं निमित्तकारणमित्यर्थः' इति। मुक्तावलीटीकायामपि भाषितमेवम्– 'आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः' इति।

---

[११]व्योमवतीटीकायाम्

ननु समवायिकारणासमवायिकारणभिन्नत्वमात्रोक्तौ प्रतियोगिनोः भिन्नं भिन्नं कार्यं प्रति भेदसत्त्वात् निखिलकार्यजातस्यातिदुर्विज्ञेयतया तत्प्रतियोगिरूपेण समवाय्यसमवायिकारणद्वस्याविज्ञानात् न तद्भिन्नत्वेन लक्षणं वाच्यमिति चेदुच्यते समवायिकारणत्वासमवायिकारणत्वाभ्यामित्यर्थः 'तदुभय', 'आभ्याम् ' इति पदद्वयेन बोध्यः। भावप्रधानेन निर्देशे सर्वेषां समवायिकारणानां तथासमवायिकारणानां निर्देशो भवेत्। आशयमिमं विशदीकुर्वता मुक्तावल्याः टीकाकृतोक्तम्– 'समवायिकारणत्वासमवायिकारणत्वभिन्नकारणत्वमेव निमित्तकारणत्वम् ' इति। एतेन समवायिकारणत्वासमवायिकारणत्वाभ्यां भिन्नं कारणत्वं निमित्तकारणत्वमिति समायातम्। समवायिकारणत्वं समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वम्। असमवायिकारणत्वञ्च समवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवायस्वसमवायि-समवेतत्वान्यतरसम्बन्धावच्छिन्नकारणत्वम्। एवं घटकार्यं प्रति दण्डादेः समवायिकारणत्वासमवायिकारणत्वसत्त्वात् निमित्तकारणत्वम्।

ननु तथा सति पटस्य निमित्तकारणे तुरीतन्तुसंयोगे निमित्तकारणलक्षणस्याव्याप्तिः, तुरीतन्तुसंयोगस्य तुरीपटसंयोगं प्रति असमवायिकारणत्वेन असमवायिकारणभिन्नत्वाभावात्। तत्समाधानं रामरुद्रीटीकायां टीकितम् –'तत्कार्यसमवायिकारणासमवायिकारणभिन्नत्वे सति तत्कार्यकारणत्वमित्येव निमित्तकारणलक्षणस्य तात्पर्यम् ' इति।

तुरीतन्तुसंयोगस्य तुरीपटसंयोगासमवायिकारणत्वेऽपि पटं प्रति समवायिकारणत्वासमवायिकाणत्वाभावात् निमित्तकारणत्वाक्षतिः। किन्तु ध्वंसाभावं प्रति निमित्तकारणभूते प्रतियोगिनि निमित्तकारणलक्षणस्याव्याप्तिः, ध्वंसाभावस्य समवाय्यसमवायिकारणयोरभावात्। तेन तदुभयभिन्नत्वघटितं निमित्तकारणलक्षणं ध्वंसाभावजनके न संगच्छते। अत एव कारणसामान्यलक्षणे यः कार्यसमानाधिकरणात्यन्ताभावः सः निमित्तकारणविशेषस्य कारणतावच्छेदकसम्बन्धेनैव गृह्यते चेत् तदेव तस्य निमित्तकारणविशेषस्य लक्षणं स्यात्।

निमित्तकारणभेदात् कारणतावच्छेदकसम्बन्धोऽपि भिन्नो भिन्नो भवति। तदुदाहरणं यथा घटं प्रति दण्डः स्वजन्यभ्रमिजन्यभ्रमिमत्वसम्बन्धेन निमित्तकारणम्। अतः कार्यतावच्छेदकसम्बन्धेन घटाधिकरणे कारणतावच्छेदकस्वजन्यभ्रमिजन्यभ्रमिमत्वसम्बन्धेन योऽभावः तस्याप्रतियोगी दण्डः। तेन दण्डे निमित्तकारणलक्षणसमन्वयः स्यात्। एवं तुरीवेमादिकं पटस्य

निमित्तकारणम्।

ननु भावकार्यं प्रति समवायिकारणत्वासमवायिकारणत्वयोः संगततया तद्भिन्नत्वेनोपदेशे संगतेऽपि मुद्गरादिना घटध्वंसरूपकार्यस्याभावरूपतया तत्र च समवायसम्बन्धस्यासत्त्वात् समवायिकारणत्वासमवायिकारणत्वयोरप्रसिद्ध्या प्रतियोगिनोरलीकत्वेन न तदुभयभिन्नत्वं वाच्यमित्यतो निमित्तकारणलक्षणस्य मुद्गरादावव्याप्तिरिति चेदुच्यते, सत्यम्। अभावकार्ये तादृशोभयकारणत्वस्याप्रसिद्धेस्तादृशनिमित्तकारणलक्षणेऽव्याप्तिर्दुर्वारा।

लक्षणस्याव्याप्त्यतिव्याप्त्यसम्भवदूषणत्रयरहितत्वेन तर्कसङ्ग्रहकृता तथा भाषापरिच्छेदकृता प्रतिपादितस्य निमित्तकारणलक्षणस्याव्याप्तिदोषयुक्तत्वात् निमित्तकारणलक्षणमन्यथा कृतम्। तथा च समवायिकारणत्वासमवायिकारणत्वान्यतरसम्बन्धेन कार्याभाववत्कारणत्वं निमित्तकारणत्वमित्यभिप्रेतं लक्षणमत्र वक्तव्यम्। एतेन दण्डादीनां भावकार्यरूपं घटादिकं प्रति यथा निमित्तकारणत्वं संगतं भवति, तथैव घटादिध्वंसं प्रति मुद्गरादीनां निमित्तकारणता न व्याहन्यते। तथाहि घटकार्यस्य समवायिकारणतायाः कपालद्वये असमवायिकारणतायाः कपालद्वयसंयोगे सत्त्वाद् एतदन्यतरसम्बन्धेन कारणताया अभावो घटकारणीभूतदण्डादौ वर्तत इत्येवं तादृशसम्बन्धेन कार्याभाववत्कारणत्वस्य दण्डादौ वर्तमानत्वेन निमित्तकारणलक्षणं संगच्छते।

पुनर्मुद्गरादिना घटादिध्वंसस्य समवायिकारणतायास्तथासमवायिकारणताया अत्राप्रसिद्धत्वादन्यत्र प्रसिद्धेन तादृशान्यतरसम्बन्धेन घटध्वंसरूपकार्याभावस्य व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावतया सर्वत्र सत्त्वेऽपि मुद्गरादावपि सत्त्वेन तत्र च ध्वंसकारणत्वस्य सत्त्वाल्लक्षणसमन्वयः। एवं निमित्तकारणलक्षणस्य किं भावकार्ये किमभावकार्ये सर्वत्रैव सङ्गमेन पूर्ववदव्याप्तिदोषप्रसक्तेर्विरहात् सर्वथा निर्दुष्टमेतत्।

ननु समवायिकारणत्वासमवायिकारणत्वान्यतरसम्बन्धेन कार्याभाववद् इत्येवं लक्षणे ध्वंसादिकार्यं प्रति तादृशकारणतान्यतरसम्बन्धेन कार्याभाववत्त्वस्य मुद्गरादौ सत्त्वात् किं कारणपदेनेति चेदुच्यते तादृशान्यतरसम्बन्धेन कार्याभाववत्त्वस्य सर्वत्रैव विद्यमानत्वात् निमित्तकारणातिरिक्तस्थलेऽपि लक्षणस्य प्रसक्तेरतिव्याप्तिवारणाय कारणपदं देयम्। अतः समवायिकारणत्वासमवायिकारणत्वान्यतरसम्बन्धेन कार्यभाववत्

कारणत्वं निमित्तकारणत्वमिति फलितम्।

ननु निमित्तकारणलक्षणनिरूपणविषये या व्यवस्था कृता, सा समवायसम्बन्धम् अङ्गीकुर्वतां कोटौ युज्यते, न पुनस्तत्सम्बन्धमनङ्गीकुर्वतामिति पक्षपातदोषदुष्टेति मन्यते। नैतत् शङ्क्यम्, अनया व्यवस्थया उपादान-कारणव्यतिरिक्ततया निमित्तकारणमात्रमङ्गीकुर्वतां विधौ निमित्तकारणलक्षणोन्नयनं सम्भवति। तथा चोपादानकारणत्वसम्बन्धेन कार्याभाववत्कारणत्वमिति समवायसम्बन्धमनङ्गीकुर्वतां पक्षे निमित्तकारणत्वस्य निर्दुष्टं लक्षणम्। इहापि तादृशाव्याप्तिभिया उपादानकारणत्वभिन्नं कारणत्वं निमित्तकारणत्वमिति न वक्तव्यम्। एवं निमित्तकारणलक्षणसरणिरुभयत्रैकरूपैवेति पक्षपातदोषोऽनुपपन्न एव।

तच्च निमित्तकारणं साधारणासाधरणभेदेन द्विविधम्। तत्र कार्यसामान्यं प्रति साधारणनिमित्तकारणानि चाष्टविधानि– ईश्वरः, तज्ज्ञानेच्छाकृतयः, दिक्कालावदृष्टं प्रागभवश्चेति तर्कामृतकाराः। प्रतिबन्धकसंसर्गाभावस्तु नवमं साधारणं निमित्तकारणमिति प्राचीननैयायिकाः। प्रतिबन्धकात्यन्ताभाव एव साधारणं निमित्तकारणमिति मणिकृतः। असाधारणनिमित्तकारणानि तु कार्यभेदेन अनेकविधानि।

इदमत्रावधेयं यत् कारणं तावद् द्विविधं फलोपहितं स्वरूपयोग्यञ्च। यत्कारणाव्यवहितोत्तरक्षणे कार्योत्पत्तिस्तत् फलोपहितं कारणम्। कारणतावच्छेदकधर्मवत्त्वं हि स्वरूपयोग्यत्वम्। अत एव घटं प्रत्यरण्यस्थदण्डानां स्वरूपयोग्यकारणत्वेन व्यवहारः। पातञ्जलयोगसूत्रे व्यासभाष्ये तु कारणस्य नव भेदाः स्वीकृताः भाष्यकारेण। तदुक्तम्–

उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्तयः।
वियोगान्यत्वधृतयः कारणं नवधा स्मृतम्॥ इति॥

## ४. उपसंहारः

एवं विचार्य वक्तुं शक्यते यद् यद्यपि जगतो विश्लेषणार्थं कारणविषये सर्वेषु दर्शनशास्त्रेषु समृद्धालोचना सुस्पष्टा तथापि समवायसम्बन्धमङ्गीकुर्वतां न्यायवैशेषिकाणामभिसम्मतं यत् कारणलक्षणं तदेव निर्दुष्टम्। अर्थात् मुण्डे मुण्डे मतेर्भिन्नत्वाद् यद्यपि कार्यकारणप्रवाहविषयेऽपि सर्वेषां मतिर्भिद्यते तथापि नैयायिकमतिरेवाग्रगण्या। यद्वा भवतु कारणविषये शास्त्रेषु चर्चाधिक्यात् तस्य

गुरुत्वमेव द्योत्यते। जगतः उत्पत्तिविश्लेषणायैव कार्यकारणप्रवाहस्यावतारणा।

किञ्च न्यायसम्मतषोडशपदार्थेषु आदिमपदार्थज्ञानमपि कारणज्ञानाधीनम्। तत्रादिमपदार्थो हि प्रमाणम्। प्रमाणञ्च प्रमाकरणम्। भाष्यकारेणोच्यते– 'प्रमीयतेऽनेनेति करणार्थाभिधोनो हि प्रमाणशब्दः' इति। व्यापारविशिष्टं कारणञ्च करणं भवति, व्यापारवत्कारणं करणमिति तल्लक्षणात्। असति विशिष्टज्ञाने सामान्यज्ञानाभावात् कारणज्ञानाभावे करणज्ञानाभावप्रसङ्गः। प्रमाणज्ञानञ्च करणज्ञानसापेक्षम्। तेन प्रमाणज्ञानस्य कारणज्ञानाधीनत्वात् कारणज्ञानं गुरुत्वावहमित्यलं विस्तरेणेति शम्।

✦✦✦

# अप्रमोपजीव्या अलङ्काराः

विप्लवचक्रवर्ती*

मोक्षो हि परमपुरुषार्थो मानवजीवनस्य। स मोक्षः कथं भवतीति विषयेऽस्ति मतपार्थक्यम्? तथा हि सांख्ययोगमते प्रकृतिपुरुषविषयक-मिथ्याज्ञाननाशान्मुक्तिर्भवति, वेदान्तमते आत्मविषयकाज्ञाननाशेन तथा आत्मसाक्षात्कारेण मुक्तिर्भवति। न्यायवैशेषिकमते पदार्थविषयकमिथ्याज्ञान-नाशान्मुक्तिः भवति। किन्तु अत्र नास्ति कस्यापि संशयः यद् अयथार्थज्ञाननाशद्वारा मोक्षलाभो भवति। तदेवायथार्थज्ञानमप्रमेति कथ्यते। इदमयथार्थज्ञानं मोक्षासहायकत्वाद् विगीतमपरतः मोक्षसहायकं यथार्थज्ञानं समाश्रितं दर्शनेषु। किन्तु सैवाप्रमा आलङ्कारिकैः समाश्रिता क्वचित्।

ननु किं नाम अप्रमा इति चेदुच्यते अतद्वति तत्प्रकारं ज्ञानमप्रमा इति। सा अप्रमा चतुर्विधा इति न्यायवैशेषिकाणां मतम्। तदुक्तं प्रशस्तपादभाष्ये– ‘तत्राविद्या चतुर्विधा संशयविपर्ययानध्यवसायस्वप्नलक्षणा'[१]। क्वचित् संशयविपर्ययादयः अप्रमाभूतविषया आश्रिता आलङ्कारिकैः, क्वचिद्वा तेषां मतं पर्यालोच्य अप्रमाभूतविषयाः स्पष्टीभवन्ति। यद्वा भवतु नाम, कथं ते विषया आश्रिता आलङ्कारिकैः इति तत्त्वमत्रालोच्यते।

आदौ संशयमाश्रित्य विचारो विधीयते। संशयो हि अयथार्थज्ञानम्। एकस्मिन्नेव धर्मिणि विरोधि नानाप्रकारकं ज्ञानं संशय इति व्योमवतीकृतः मतम्। ननु कथं संशयः अयथार्थज्ञानमिति चेद् गौतमोक्तसंशयलक्षणस्थितस्य विमर्शपदस्य व्याख्यानसमये– ‘तदेतेनासमानजतीयेभ्यः प्रमाणादिभ्यः समानजतीयेभ्यश्च विपर्ययादिभ्यः संशयो निवर्तितो भवति’ इति न्यायवर्तिके प्रमाणादिभ्यः यथार्थज्ञानकरणेभ्यः संशयस्य भेदस्वीकारात्तथा विपर्ययादिभ्यः अयथार्थज्ञानैः तस्य साम्यख्यापनाज्ज्ञायते संशयोऽपि अयथार्थज्ञानमेव।

अयथार्थज्ञानभेदविशेषः संशय एवालङ्कारिकैः बहुधा स्वीकृतः समालम्बनत्वेन। संशयम् आश्रित्यालङ्कारिकैः सन्देहालङ्कारस्य स्वरूपं प्रकटितम्। तथा हि संशयलक्षणं साहित्यदर्पणे– ‘सन्देहः प्रकृतेऽन्यस्य

---

*अध्यापकः, संस्कृतविभागे, कालनामहाविद्यालयस्य, वर्धमानस्थस्य, पश्चिमवङ्गेषु

[१]प्रशस्तपादभाष्यस्य गुणप्रकरणे

संशयः प्रतिभोत्थितः'[२] इति। उपमेये उपमानस्य कविप्रतिभजन्यः संशय एव सन्देहालङ्कारः। ससन्देह इति तस्य नामान्तरमिति काव्यप्रकाशवचनाज्ज्ञायते। तदुक्तं काव्यप्रकाशे मम्मटेन– 'ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः'[३] इति। मम्मटमते हि भेदस्योक्तौ निश्चयान्तश्चेति द्वेधा ससन्देह इति। तत्र पुनः भेदस्य अनुक्तौ यः संशयः स हि शुद्धः संशयो भवतीति काव्यप्रकाशकृतः मतम्। तथा हि भेदक्तौ सन्देहोदाहरणं यथा–

अयं मार्तण्डः किम्? स खलु तुरगैः सप्तभिरितः
कृशानुः किम्? सर्वाः प्रसारितो दिशो नैष नियतम्।
कृतान्तः किं साक्षात्? महिषवाहनोऽसाविति चिरं
समालोक्याजौ त्वां विदति विकल्पान् प्रतिभटाः॥ इति।

अत्रोदाहरणे नृपे मार्तण्डस्य, यमस्य, अग्नेश्च संशयो भवति। स च संशयः कविप्रतिभाजनित इति सन्देहालङ्कारलक्षणसमन्बयः भवति। एवं भेदानुक्तौ सन्देहो यथा–

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन् मनोहरमिदं रूपं पुराणो मुनिः॥ इति।

विक्रमोर्वशीये उर्वशीमुद्दिश्य पुरुरवस उक्तिरियम्। अस्या उर्वश्याः सृष्टेर्विधाने ब्रह्मा कान्तिदायकः चन्दोऽभूत् नु, अथवा ब्रह्मा अस्याः सर्गविधौ शृङ्गैकरसः स्वयं मदनोऽभुत् नु, अथवा ब्रह्मा अस्याः सर्गविधौ मधुमासोऽभूद् नु, यतो हि सततवेदाभ्यासोपहतप्रतिभो वनितादिविषयदर्शनालोलुपः पुराणो मुनिः ब्रह्मा स्वरूपस्थः सन् मनोहरमिदमुर्वश्या रूपं निर्मातुं कथं शक्नुयात्? अत्र ब्रह्मण उपमानभूतात् चन्द्रादीनां भेदो न प्रतिपादितमिति भेदानुक्तौ ससन्देहालङ्कारोऽत्र बोध्यः। एवमप्रमाभूतं संशयमाश्रित्य सन्देहालङ्कारस्वरूपं प्रकटीकृतवन्तः आलङ्कारिकाः। एवमेव उत्प्रेक्षालङ्कारोऽपि संशयसाध्यो भवति। तथा हि उत्प्रेक्षालङ्कारे उपमेये उपमानस्य संशयो भवति। तल्लक्षणं हि साहित्यदर्पणे–

[२] साहित्यदर्पणस्य दशमोल्लासः
[३] काव्यप्रकाशस्य दशमोल्लासः

'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना'[४] इति। अर्थात् प्रकृतस्य उपमेयस्य परात्मना उपमानरूपेण सम्भावना उत्प्रेक्षा। तदुहारणं यथा–

ऊरुः कुरुङ्गकसदृशः चञ्चलचेलाञ्चलो भाति।
सपताकः कनकमयो विजयस्तम्भः स्मरस्येव॥ इति।

इयं हि अनवृतनार्यूरुदर्शनेन जातकामस्योक्तिः। तरुण्यूरौ कामदेवस्य विजयस्तम्भस्य संशयो भवति। अत्रेदमपि वक्तव्यं यद् उत्प्रेक्षायाः घटकीभुता सम्भावना तु न साक्षात्संशयः, अपि तु संशयसदृश एवेति।

विपर्ययो भ्रमो वायथार्थज्ञानतया विवेचितः दर्शनेषु। ननु विपर्ययो भ्रमो वा कथमप्रमेति चेदुच्यते 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायत्मकं प्रत्यक्षम्'[५] इति प्रत्यक्षलक्षणे अव्यभिचारिपदोपादानेन तस्य प्रत्यक्षप्रमातः बहिष्कृतिदर्शनादप्रमात्वं सिद्ध्यति। स विपर्ययो भ्रमो वा बहुत्रैवालङ्कारिकैराश्रितः। तथा हि भ्रमो नाम तदभाववति तत्प्रकारकं ज्ञानम्। एतदेव तत्त्वमाश्रित्य भ्रान्तिमान् अलङ्कारो भवति। तल्लक्षणं हि साहित्यदर्पणे– 'साम्यादतस्मिंस्तबुद्धिर्भ्रान्तिमान् प्रतिभोत्थितः' इति। अर्थात् उपमेयधर्मविशेषाभावति उपमानजातीयपदार्थे उपमेयजातीयपदार्थस्यारोपः भ्रान्तिमान् अलङ्कारः। तदुदाहरणं यथा–

मुग्धा दुग्धधिया गवां विदधते कुम्भानधोवल्लवाः
कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि।
कर्कन्धूफलमुच्चिनोति शवरी मुक्ताफलकाङ्क्षया
सान्द्रा चन्द्रमसो न कस्य कुरुते चित्तभ्रमं चन्द्रिका ॥ इति।

अत्र चन्द्रिकायां दुग्धस्य कुवलये कैरवस्य वदरीफले च मुक्ताफलस्य भ्रमो भवति। अत्रेदमपि वक्तव्यं यद् आहार्यज्ञानलक्षणमपीह समस्यते। आहार्यज्ञानं नाम विपरीतनिश्चयकालिकारोपः। तच्च नियतानियतभेदाभ्यां द्विविधम्। इदञ्चाहार्यज्ञानं दार्शनिकैः विपरीतमूलकत्वादप्रमेति कथितम्। आलङ्कारिकैः तदेवाश्रितम्। एवमप्रमाया अर्थात् अतद्वति तत्प्रकारकस्य ज्ञानस्य साहाय्यमन्यत्रापि स्वीकृतमालङ्कारिकैः। उदाहरणरूपेण तद्गुणालङ्कारस्य प्रसङ्गो विशेषेण उल्लेखनीयः। तद्गुणालङ्कारे पदार्थः स्वगुणं परित्यज्य गुणान्तरमाश्रयति।

---

[४] साहित्यदर्पणस्य दशमोल्लासः
[५] न्यायसूत्रम्– ०१.०१.०४

वस्तुतः तद्गुणालङ्कारे पदार्थे यो गुणो नास्ति तस्यैव प्रतीतिर्भवति इत्यतः तदभाववति तत्प्रकारकज्ञानसमारोपाद् अप्रमा एवालङ्कारिकैराश्रिता। तथा हि तद्गुणालङ्कारलक्षणं साहित्यदर्पणे– "तद्गुणः स्वगुणत्यागादत्युत्कृष्टगुणग्रहः" इति। रुद्रटेन तस्य लक्षणमेवं कृतम्–

असमानगुणं यस्मिन्नतिबहुलगुणेन वस्तुना वस्तु।
संसृष्टं तद्गुणतां धत्तेऽन्यस्तद्गुणः स इति॥ इति।

तद्गुणालङ्कारस्योदाहरणं यथा–

जगाद वदनच्छद्मपद्मपर्यन्तपातिनः।
नयन्मधुलिहः श्वैत्यमुदग्रदशनांशुभिः ॥ इति।

शिशुपालवधमहाकाव्यादुदाहृतोऽयं श्लोकः। बलभद्रस्य शुभ्रदन्तपङ्क्तिद्युतितः कृष्णवर्णा द्विरेफाः श्वेतवर्णविशिष्टा अभवन् इति प्रतीयते। अत्र श्वेतत्वाभाववति द्विरेफे श्वेतत्वप्रकारकज्ञानसम्भवादेव अत्राप्रमाज्ञानमालङ्कारिकैराश्रितमिति निश्चप्रचमेव वक्तुं शक्यते। एवमेव उपमेयोपमायामपि विपर्ययज्ञानमाश्रित्य विचारे प्रवर्तिता आलङ्कारिकाः। उपमेयोपमायाम् उपमानोपमेययोः विपर्यासो भवति। तल्लक्षणं साहित्यदर्पणे– "विपर्यास उपमेयोपमा तयोः" इति। तदुहारणं हि–

कमलेव मतिर्मतिरिव कमला
तनुरिव विभा विभेव तनुः।
धरणीव धृतिर्धृतिरिव धरणी
सततं विभाति वत यस्य॥ इति।

अत्र लक्ष्मीबुद्ध्योः धृतिधरण्योस्तथा तनुकान्त्योः विपर्यासः स्वीकृतः।

अध्यारोपो हि अयथार्थज्ञानम्। तथा हि अधिष्ठाने रज्ज्वां सर्पस्याध्यारोप एव रज्ज्वां सर्पभ्रमं जनयति। एवमेव अज्ञानाध्यस्ते जगति चैतन्यप्रतीतिर्भवति इति वैदान्तिकाः। स चाध्यारोपः अयथार्थज्ञानमिति जीवस्य स्वस्वरूपोपलब्धिसम्भवे सति तस्यायथार्थत्वप्रतीतिसम्भवात्। वस्तुतः वेदान्तिनां नये ब्रह्मैव केवलं सत्यमन्यत्सर्वमसत्यं, ब्रह्मणि अध्यस्तत्वात्। तदुक्तं भवच्छङ्कराचार्यैः–

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ॥ इति।

अत एवाध्यस्तविषयस्याप्रमात्वमुररीकृतं वेदान्तिभिः। स आरोपोऽध्यारोपः वाश्रित आलङ्कारिकैः। उदाहरणरूपेण रूपकालङ्कार उपस्थाप्यते। तथा हि विषये उपमानेन सार्धमभिन्नतया प्रतिपाद्य मानस्यापि यस्योपदेशस्य प्रकृतितो

गोपनाभावादनपह्नवस्तादृशे उपमेये सति अभिन्नतया कथितस्य उपमानस्यारोपः रूपकालङ्कार इति कथ्यते। तल्लक्षणं दर्पणे– "रूपकं रूपितारोपाद्विषये निरपह्नवे"[६] इति। तदुहारणं यथा–

आहवे जगदुदण्डः राजमण्डलराहवे।
श्रीनृसिंहमहीपाल स्वस्त्यस्तु तव बाहवे॥ इति।

अत्र राजसमूहे चन्द्रविम्बत्वारोपं विना वर्णनीयराजबाहौ राहुत्वारोपो भवति। अत एवारोपात्मकायथार्थज्ञानमेव रूपके शरणमालङ्कारिकाणाम्। एवमेव परिणामालङ्कारे आरोपणीये उपमाने आरोपविषयभेदेन उपमानतादात्म्येन उपमेयस्यारोपो भवति। तथा हि तल्लक्षणं दर्पणे–

विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि।
परिणामो भवेत्तुल्यातुल्यधिकारिणे द्विधा॥ इति।

तदुदाहरणं हि–

स्मितेनोपायनं दूरादागतस्य कृतं मम।
स्तनोपपीडमाश्लेषः कृतः द्यूतः पणस्तया॥ इति।

अस्मिन् साहित्यदर्पणप्रदर्शिते उदाहरणे उपमेये स्मिते उपमानस्याभेदारोपात् तथा द्वितीये चरणेऽपि उपमेयभूते आलिङ्गने उपमानभूतस्य पणस्य अभेदारोपात्परिणामालङ्कारस्य लक्षणसमन्वयः स्यात्।

स्मृतिरपि अयथार्थज्ञानमिति न्यायमतम्। स्मृतिभिन्नज्ञानम् अनुभवः तथा यथार्थानुभवः प्रमेति स्वीकारात् स्मृतेः प्रमात्वनिरासो भवति। अथवा अनपेक्षं यथार्थज्ञानमेव प्रमा इत्येव प्रमालक्षणम्। तेन स्मृतेः पूर्वानुभवसापेक्षत्वात् पुर्वानुभवस्य यथार्थत्वे स्मृतेः याथार्थ्यं पूर्वानुभवस्यायथार्थत्वे स्मृतेरयाथार्थ्यं सिद्धमिति तस्या अप्रमात्वं सुवचम्। अतो न्यायकुसुमाञ्जलेः टीकाकृतः हरिदासभट्टाचार्यस्य भणितिः उल्लेखनीया– "स्मृतेः जनकानुभवसमानविषयकतया तत्प्रामाण्याधीनप्रमाण्यकतया सापेक्षत्वात् तत्र न प्रमाणत्वव्यवहारः" इति। जयन्तभट्टेनापि अनर्थजत्वेन स्मृतेः अप्रमाणत्वं समुद्घोषितम्। तदुक्तं–

न स्मृतेरप्रमात्वं गृहीताग्राहिताकृतम्।
अपि त्वनर्थजन्यत्वं तदप्रामाण्यकारणम्॥[७] इति।

यद्वा भवतु नाम स्मृतेरप्रामाण्यविषये मतैक्यं दधाना नयैयायिकाः तत्त्वज्ञाने

---

[६]साहित्यदर्पणस्य दशमोल्लासः

[७]न्यायमञ्जर्य्याः प्रथमाह्निकस्य प्रमाणपरिच्छेदः

तस्या अप्रयोजकत्वमपि स्वीकृतवन्तः। परन्तु सैव स्मृतिरादृता आलङ्कारिकैः स्मरणालङ्कारे। तथा हि स्मरणालङ्कारलक्षणम् आह मम्मटः– ‘यथार्थनुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः स्मरणम् ’[८] इति। रुद्रटेन तल्लक्षणं कृतम्–

वस्तुविशेषं दृष्ट्वा प्रतिपत्ता स्मरति यत्र तत्सदृशम्।
कालान्तरानुभूतं वस्त्वन्तरमित्यदः स्मरणम्॥ इति।

अर्थात् कालान्तरस्थितं वस्तुविशेषं यदा स्मरति प्रतिपत्ता तदा स्मरणालङ्कारो भवति। तदुदाहरणं यथा–

अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जलम्।
स्मरामि वदनं तस्याश्चारुचञ्चललोचनम्॥ इति।

खेलत्खञ्जनमञ्जलम् अरविन्दं निशम्य नायिकाया वदनं स्मर्यते नायकेन। एवं स्मरणालङ्कारस्य लक्षणसमन्वयः भवति।

स्मृतिरपि अयथार्थज्ञानमिति न्यायमतम्। स्मृतिभिन्नज्ञानम् अनुभवः तथा यथार्थानुभवः प्रमेति स्वीकारात् स्मृतेः प्रमात्वनिरासो भवति। अथवा अनपेक्षं यथार्थज्ञानमेव प्रमा इत्येव प्रमालक्षणम्। तेन स्मृतेः पूर्वानुभवसापेक्षत्वात् पुर्वानुभवस्य यथार्थत्वे स्मृतेः याथार्थ्यं पूर्वानुभवस्यायथार्थत्वे स्मृतेरयाथार्थ्यं सिद्धमिति तस्या अप्रमात्वं सुवचम्। अतो न्यायकुसुमाञ्जलेः टीकाकृतः हरिदासभट्टाचार्यस्य भणितिः उल्लेखनीया– “स्मृतेः जनकानुभवसमानविषयकतया तत्प्रामाण्याधीनप्रमाण्यकतया सापेक्षत्वात् तत्र न प्रमाणत्वव्यवहारः” इति। जयन्तभट्टेनापि अनर्थजत्वेन स्मृतेः अप्रमाणत्वं समुद्घोषितम्। तदुक्तं–

न स्मृतेरप्रमात्वं गृहीताग्राहिताकृतम्।
अपि त्वनर्थजन्यत्वं तदप्रामाण्यकारणम्॥[९] इति।

यद्वा भवतु नाम स्मृतेरप्रामाण्यविषये मतैक्यं दधाना नयैयायिकाः तत्त्वज्ञाने तस्या अप्रयोजकत्वमपि स्वीकृतवन्तः। परन्तु सैव स्मृतिरादृता आलङ्कारिकैः स्मरणालङ्कारे। तथा हि स्मरणालङ्कारलक्षणम् आह मम्मटः– ‘यथार्थनुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः स्मरणम् ’[१०] इति। रुद्रटेन तल्लक्षणं कृतम्–

वस्तुविशेषं दृष्ट्वा प्रतिपत्ता स्मरति यत्र तत्सदृशम्।
कालान्तरानुभूतं वस्त्वन्तरमित्यदः स्मरणम्॥ इति।

---

[८]काव्यप्रकाशस्य दशमपरिच्छेदः

[९]न्यायमञ्जर्य्याः प्रथमाह्निकस्य प्रमाणपरिच्छेदः

[१०]काव्यप्रकाशस्य दशमपरिच्छेदः

अर्थात् कालान्तरस्थितं वस्तुविशेषं यदा स्मरति प्रतिपत्ता तदा स्मरणालङ्कारो भवति। तदुदाहरणं यथा–

अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जलम्।
स्मरामि वदनं तस्याश्चारुचञ्चललोचनम्॥ इति।

खेलत्खञ्जनमञ्जलम् अरविन्दं निशाम्य नायिकाया वदनं स्मर्यते नायकेन। एवं स्मरणालङ्कारस्य लक्षणसमन्वयः भवति।

✦ ✦ ✦

# जगन्नाथोत्तरकालिकं संस्कृतालङ्कारशास्त्रम्

शुभ्रजित्सेनः*

०.भूमिका– कस्या अपि भाषाया व्युत्पत्तिविवर्धनाय यथा व्याकरणशास्त्रं नितरामपेक्षते तथैवालङ्कारशास्त्रमपि साहित्ये नैपुण्याय। अलङ्कारज्ञानदरिद्रो जनो शब्दशास्त्रादिकं जानन्नपि– 'चिन्तारत्नमिव च्युतोऽसि करतो धिङ्मन्दभाग्यस्य मे' इति रीत्या मन्दभाग्य एवावतिष्ठते। शास्त्रमिदं वैदिकलौकिकग्रन्थानां पूर्णत्वज्ञानार्जनायात्यावश्यकं वर्तते। नैतद्विनाऽर्थावगतिः स्पष्टत्वेन। इदञ्च, तितउरिव कार्यं साधयति। तितउना यथा वस्तु निर्मलीक्रियते, तृणकणादिकं दूरीक्रियते तथैवालङ्कारशास्त्रं साधयित्वालङ्कारिकोऽपशब्दानपसार्य स्वकवाक्यं व्यङ्ग्यार्थबोधकं सुशब्दललितञ्च विधत्ते, सम्यगर्थमभिव्यनक्ति च। सुशब्दप्रयोगेन यथार्थार्थावगमनेन च शब्दार्थयोर्मध्ये ऐक्यभावनोपजायते। ऐक्यभावनायाश्चास्याः फलमिदं मधुरमुत्पद्यते यत्, सोऽलङ्कारशास्त्रविशेषज्ञः सुधीरमनुभवतीदं यत्तस्य वस्तुभिः सर्वैः सार्धमैक्यमेव न, किञ्च वस्तु भिन्नभिन्नपदार्थस्तद्द्वयमपि वस्तुतः एकमेवाविलक्षणम्। यत्स तदेव वस्तु, यद्वस्तु तदेव स इत्येतेनैक्यानुभवेन भवति स ब्रह्मज्ञः। ब्रह्मास्वादसहोदरस्य परमपदलाभस्य साधनभूतं तावदलङ्कारशास्त्रम्। यस्मिन्नवगते काव्यनिर्माणे स्वरूप-दोष-गुणालङ्कारादीनामवधारणे च शक्तिरुन्मिषति, तदलङ्कारशास्त्रम्। शास्त्रमिदं स्वजनिसमयादेव नितरां गतं लोकप्रियताम्। तस्मादेतत्काव्यालङ्कार-काव्यशास्त्र-क्रियाकल्प-साहित्यविद्याऽ-लङ्कारशास्त्र-साहित्यशास्त्राद्यभिधानैः ससम्मानं समाहूतमभूत्। राजशेखरेण तदीयायां काव्यमीमांसायां 'उपकारकत्वादलङ्कारः सप्तममङ्गमिति यायावरीय, ऋते च तत्स्वरूपपरिज्ञानादेवार्थानवगतिः। पञ्चमी साहित्यविद्येति यायावरीयः', 'शब्दार्थयोर्यथावत्सहभावेन विद्या साहित्यविद्येति' समीरितम्। 'सा च विद्या चतसृणामपि विद्यानां निष्यन्दः'। विक्रमाङ्कदेवचरिते विह्लणेन–

> साहित्यपाथोनिधिमन्थरोत्थं कर्णामृतं रक्षत हे कवीन्द्राः।
> यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति॥ इति

प्रोक्तश्लोकानुसारं साहित्यशब्दो व्यञ्जयति काव्यार्थत्वम्। कविकर्मणः

---

*अतिथि-अध्यापकः, संस्कृतविभागे, रामकृष्णमिशन्-विद्यामन्दिरस्य बेलुरमठस्थस्य, कलिकातायां, पश्चिमवङ्गेषु

शासकत्वात् साहित्यशास्त्रमिति कथ्यते। अपि च, समस्तविद्यास्थानैकायतनं तावत्काव्याख्यविद्यास्थानम्। कविवरेण सीतानाथेनोक्तं 'कविते विश्ववन्दिते' इति कविताग्रन्थे-

संस्कृतेर्मानवीयाया लग्ने पुण्यतमे पुरा।
कवेर्मानसजन्मासि कविते विश्ववन्दिते॥
क्षणे विशेषे कविमानसोत्थतीव्रानुभूतेर्लभसे स्वसत्ताम्।
स्थितिस्तथाप्यस्ति चिरन्तनी ते सगौरवा विश्वजनीनमानसे॥
जन्मतः शुद्धसंस्कारास्तारुण्यपरिमण्डिता।
आकर्षन्ती च चेतांसि राजसे त्वं सचेतसाम्॥
वयसातिप्रवीणापि नवीना कविते चिरम्।
अम्लानरूपसम्पन्ना लावण्यगरिमोज्ज्वला॥
विश्वविश्रुतचारित्रा रहस्यपुलकाञ्चिता।
रञ्जयन्ती मनो नित्यं पाठकानां विराजसे॥ इति।

कवयिता कारयितृप्रतिभया काव्यानि कौति। परं भावकैर्भावयितृप्रतिभाबलाद् दुर्विज्ञेयं सरहस्यं कवितास्वरूपं समीक्ष्यते। अतः कविभिर्भावकैर्निरन्तरञ्च पोषिता संशोधिता च वाग्वाणी पाश्चात्त्यसाहित्यशास्त्रैर्नितरां परिचयवशादेव विवर्धिता। कवितानां दोषगुणादीनां प्रतिपादकमपीदं शास्त्रं यमकोपमादीनामलङ्काराणां विषयकतया काव्यव्यवहारप्रयोजकतया शास्त्रे चात्र प्रधानत्वेन तत्प्रतिपादकत्वाद् एवाऽलङ्कारशास्त्रम् इति व्यपदिश्यते। अलङ्काराणां काव्यव्यवहारप्रयोजकत्वञ्च 'काव्यवृत्तेस्तदाश्रयात्' इति आनन्दवर्धनोक्तिः पञ्चमोल्लासे मम्मटाचार्यैरवाभ्युपगतम्। किञ्चालङ्कारशास्त्रमित्युक्ते ये खलु अलङ्कारनिबन्धकर्तारः भरतः, भामहः, दण्डी, वामनः, भट्टोद्भटः, रुद्रटः, भट्टनायकः, मुकुलः, प्रतीहारेन्दुराज, आनन्दवर्धनः, महिमभट्टः, कुन्तकः, अभिनवगुप्तः, शौद्धोदनिः, वाग्भटः, रुय्यकः, भोजराजः, मम्मटः, हेमचन्द्रः, केशवमिश्रः, पीयूषवर्षः, विद्यानाथः, विश्वनाथः, गोविन्दठक्कुरः, अप्पय्यदीक्षित इत्येते जगन्नाथान्ताः सप्तविंशतिः प्राञ्चो बभूवुस्तैर्धन्यमानमर्थं वाच्योपकारकतयालङ्कारपक्षनिक्षिप्तं मन्यमानैरलङ्काराः काव्ये प्रधानमिति राद्धान्तितम्। काव्यस्यात्मा क इत्यस्मिन् विषये विप्रतिपत्तिर्विद्यते विदुषाम्। साहित्यशास्त्रप्रस्थानप्रवर्तकेष्वाचार्येषु केचन रसं, परेऽलङ्कारम्, अपरे गुणम्, इतरे ध्वनिमन्ये वक्रोक्तिं भिन्नाश्चौचित्यमेव प्रतिपादयन्ति। तथाहि

समुद्रबन्धनेनालङ्कारसर्वस्वटीकाकर्त्रोक्तम्– "इह विशिष्टौ शब्दार्थौ काव्यम्। तयोश्च वैशिष्ट्यं धर्ममुखेन व्यापारमुखेन व्यङ्ग्यमुखेन वेति त्रयः स्फुटा विचारधाराः। आद्येऽप्यलङ्कारतो गुणतो वेति द्वैविध्यम्। द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्त्वेन वेति द्वैविध्यम्। इति पञ्चसु पक्षेष्वाद्य उद्भटादिभिरङ्गीकृतः, द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन, पञ्चम आनन्दवर्धनेन" इति। अद्यतनसमीक्षणसरणिमवलम्बमाना आचार्यास्तत्तद्विच्छित्तिविशेषान् ध्वनिसिद्धान्त एवान्तर्भाव्य तस्यैव प्रामुख्यं सङ्गिरन्ते। ध्वनिसिद्धान्तमिमं केन्द्रीभूय काव्यशास्त्रं त्रिधा विभक्तम्–

1. पूर्वध्वनिकालः
2. ध्वनिकालः
3. उत्तरध्वनिकालः

भरत-भामह-दण्डि-वामन-उद्भट-रुद्रटादयश्चाचार्याः पूर्वध्वनिकाले विलसन्तः काव्यतत्त्वं परिशीलयन्ति स्थापयन्ति च स्वराद्धान्तान्। ध्वनियुगे केवलम् आनन्दवर्धनाचार्यो विलसन्नासीत्। उत्तरध्वनिकाले मम्मट-विश्वनाथ-राजशेखर-जयदेव-क्षेमेन्द्र-शारदातनय-भानुदत्त-जगन्नाथाः जनिं लब्ध्वा काव्य-शास्त्राणि विचारयन्ति स्म। पण्डितराजो जगन्नाथो ह्यन्तिमो मूर्धन्यालङ्का-रिकोऽलङ्कारशास्त्रप्रपञ्चे। तस्मात्परं काव्यशास्त्रसन्तानप्रवाहः श्लथश्चोपेक्षितो जातः। एतदपि वक्तुं शक्यं यज्जगन्नाथात् परवर्तिकाले कोऽप्यालङ्कारिको नागतो, यः स्वकमौलिकसिद्धान्तान् प्रतिष्ठाप्य भरत-भामह-वामनानन्दवर्धनादिसङ्काशो भवितुमर्हति। नोत मम्मट-विश्वनाथ-जगन्नाथाद्याचार्यश्रेण्याम् अन्तर्भावयितुं शक्यते कोऽपि साम्प्रतिककाव्यतात्त्विकोऽस्माभिः। किन्तु न हि काव्यशास्त्र-विरचनप्रवृत्तिर्न्यूना पूर्वापेक्षया। पण्डितराजोत्तरवर्तियुगे नैके काव्यशास्त्रज्ञा जनिं लेभिरे, येऽपेक्षाकृताल्पप्रसिद्धाप्रसिद्धकोट्योः स्थानं लभमानाः समासन्। तथाहि आलोचनासौविध्यर्थम् आचार्यपक्षः चतुर्धा विभजयितुं शक्यः–

1. प्रसिद्धाचार्यपक्षः
2. अप्रसिद्धाचार्यपक्षः
3. टीकाकृदाचार्यपक्षः
4. अज्ञातलेखकवर्गश्चेति

**१.जगन्नाथोत्तरवर्तिनः प्रसिद्धा आचार्याः–** जगन्नाथात् परवर्तिकाले प्रसिद्धाऽचार्यवर्गेषु राजचूडामणिदीक्षितः, भूदेवशुक्लः, रामदेवचिरञ्जीवभट्टाचार्यः, विश्वेश्वरपण्डितः, नरसिंहकविः, विद्याराम, आशाधरभट्टः, वेणीदत्तशर्मा, अच्युतरायशर्मा, श्रीकृष्णकविः, राधावल्लभत्रिपाठी, रेवाप्रसादद्विवेदी, हर्षदेव-माधवश्च रराज्यन्ते। एत आलङ्कारिकाः स्वमौलिककर्मभिरर्वाचीनकाव्यशास्त्रस्या-विच्छिन्नगतिं पर्यरक्षन्।

**१.१.राजचूडामणिदीक्षितः–** दक्षिणभारतस्य सोमयाजिकुले जन्म लब्ध्वा सम्यक् काव्य-काव्यशास्त्र-दर्शनादिशास्त्राण्यधीत्य द्वाविंशतिः ग्रन्था विरचिता अनेन। तेष्वन्यतमाश्च मौलिका यथा- १.शङ्कराभ्युदयम् २.कंसवधम् ३.रुक्मिणीपरिणयम् ४.कमलिनीकलहंसनाटिका ५.आनन्दराघवनाटकम् ६.अलङ्कारचूडामणिः ७.चित्रमञ्जरी ८.काव्यदर्पणञ्चेति। परं काव्यशास्त्र-विषयकग्रन्थद्वयं तावत् अलङ्कारचूडामणिः, काव्यदर्पणञ्चेति। काव्यदर्पण-विश्लेषणाद् एतदेव प्रतीयते यद् मम्मटप्रभावितस्तावद् दीक्षितपादः। काव्यप्रकाशस्य तत्त्वजातम् आश्रित्यानेन कारिकावृत्तिभ्यां ग्रन्थोऽयं ग्रथितः। केषुचित् स्थलेषु मम्मटकृतशब्दावल्यामूलचूडं समानीतानेन। प्रस्तुतग्रन्थे समदृश्यत समावेशः समस्तकाव्यशास्त्रीयतत्त्वानाम्। ग्रन्थोऽयं दशोल्लासैर्विभक्तः। परं ग्रन्थस्यास्य मौलिकत्त्वं प्रायेण नास्त्येव।

**१.२.भूदेवशुक्लः–** गुजरातप्रदेशस्य जम्बूसरस्थानवास्तव्योऽयं श्रीकण्ठदीक्षित-सकाशात् काव्यशास्त्राण्यधीत्य स्वजीवद्दशायां ग्रन्थसप्तकं व्यरचयत्। ते च ग्रन्था यथा– १.रसविलासः, २.रुक्मिणीविलासः ३.रामचरितम् , ४.धर्मविजयः, ५.आत्मतत्त्वप्रदीपः, ६.ईश्वरविलासदीपिका, ७.रसविलासश्चेति। रसविलासो ह्यस्यालङ्कारशास्त्रविषयकग्रन्थः सप्तस्तवकैः पूरितः। कारिकागद्याभ्यां काव्यतत्त्व-सम्बन्धिलक्षणान्यपि लिखितानि। ग्रन्थस्य विषयाः स्तवकानुसारं यथा– रसविवेकः, नवरसविवेचननं, भावनिरूपणं, गुणनिरूपणं, दोषनिरूपणं, दोषोद्धारः, काव्यलक्षणं वृत्तिनिरूपणञ्चेति। काव्यप्रकाश-काव्यप्रदीप-रसगङ्गाधराणां प्रभावो विशेषेणोपलभ्यते ग्रन्थेऽस्मिन्।

**१.३.रामदेवचिरञ्जीवभट्टाचार्यः–** गौडदेशनिवासी ब्राह्मणकुलजोऽयं पितुः राघवेन्द्रस्य सकाशात्तथा च गुरो रघुदेवन्यायालङ्काराच्च शास्त्रादिकमधीत्य पञ्च ग्रन्थान् रचितवान्। ग्रन्थपञ्चके काव्यविलासोऽलङ्कारशास्त्रविषयको

गद्यकारिकाभ्यां ग्रथितोऽध्यायद्वयोपेतो लघुकायश्च। प्रथमभङ्ग्यां काव्यस्वरूप-प्रयोजन-कारण-रसनिरूपणादिविषयास्तथा द्वितीयायाञ्च शब्दार्थालङ्कारयोर्विवेचनमुपवर्णिताः सन्ति। पण्डितराजपरवर्तिनाम् अलङ्कारग्रन्थेषु ग्रन्थोऽयं सर्वाधिकप्रचारितो हस्तलिखितश्चेति। तदानीन्तनकाले अलङ्कारप्रसङ्गः मम्मटाप्ययदीक्षितयोरनुसारी परं लक्षणानां वृत्त्युदाहरणानि स्वरचितानि। वामनदण्डिनो रसस्य गौणत्वमिति तथा च विश्वनाथस्य काव्यसारतत्त्वत्वेन रसत्वमिति तत्त्वद्वयं निराकृत्य चमत्कारस्य साररूपत्वं प्रतिष्ठापितम् रामदेवेन। ग्रन्थोऽयमतीव लोकप्रियतां गतः। यद्यपि काणेमहाभागनये श्रृङ्गारतटिनीत्यप्यलङ्कारग्रन्थः अनेनैव विरचितः।

**१.४.विश्वेश्वरपण्डितः**– उत्तरप्रदेशस्याल्मोडामण्डलान्तर्गते पाटियाख्यग्रामे ब्राह्मणकुलेऽष्टादशशताब्द्यां जनिं लभमानोऽयं वैयाकरणसिद्धान्तसुधानिधेर्दीधितिप्रवेशस्य च प्रणेतापि अलङ्कारकौस्तुभनामकम् उच्चकोटिकम् अलङ्कारशास्त्रीयग्रन्थं प्रणीतवान्। तेन विरचितेषु चतुर्विंशति-ग्रन्थेषु काव्यरत्नम् , अलङ्कारमुक्तावली, अलङ्कारप्रदीपः, रसचन्द्रिका, कवीन्द्रकर्णाभरणम् , लक्ष्मी-विलासकाव्यम् , व्यङ्ग्यार्थकौमुदी, होलिकाशतकम् , ऋतुवर्णनञ्चेति समुल्लेखार्हाः। परम् अलङ्कारकौस्तुभोऽस्यात्यन्त-प्रामाणिकग्रन्थः। ग्रन्थस्य विवेच्यविषया नव्यन्यायपरिभाषया जगन्नाथवन्निबद्धाः। षट्षष्टिकारिकाभिः लक्षणानि स्पष्टीकृतानि विश्वेश्वरेण। रसस्य प्रतिपादनमलङ्कारादयश्च विषया प्रभविष्णुतया वर्ण्यन्ते। मम्मटसम्मतान् एकषष्टिम् अर्थालङ्कारान् पर्यालोचनात्मकशैल्या निरूपयन्नयं तदतिरिक्तान् अर्थालङ्कारान् खण्डितवान्।

अलङ्कारमुक्तावल्ल्यां सरलवचोभिः एकषष्टेः अतिरिक्तान् अष्टौ रसवदाद्यलङ्कारान् निरूपितम्। नायकनायिकादिभेदैः सह नवविधानां रसानां विश्लेषणं वर्तते रसचन्द्रिकायाम्।

**१.५.नरसिंहकविः**– अभिनवकालिदासापरनामको नरसिंहकविः प्रतिभावान् प्रभाववांश्च विद्वान् योऽष्टादशशताब्द्याः पूर्वभागे जन्म लब्ध्वा नञ्जराजस्य सभापण्डितरूपेण यशोऽलभत। असौ नञ्जराजयशोभूषणमिति ग्रन्थं न्यबध्नादित्यसौ यशोभूषणकार इत्येव सर्वत्रालङ्कारशास्त्रे विख्यातोऽभूत्। विद्यानाथकृतं प्रतापरुद्रयशोभूषणमाधारीकृत्य नञ्जराजयशोभूषणमिति निरमान्नरसिंहः। विलाससप्तकं वर्तते ग्रन्थस्यास्य। प्रभमे नायकस्वरूपं,

द्वितीये काव्यविषयकानौचित्यं, तृतीये ध्वनिप्रकारं, चतुर्थे रसस्वरूपं, पञ्चमे दोषप्रसङ्गेऽन्यालङ्कारिकाणां मतखण्डनं, षष्ठे नायकविषयकानौचित्यं, सप्तमेऽलङ्काराणां सिद्धान्ताः प्रतिपादिताः। अत्रेदमुल्लेख्यं यत् षष्ठविलासे सम्पूर्णनाटकस्यैकस्य समावेशः कृतः। जगन्नाथस्य 'निर्माय नूतनमुदाहरणानुरूपमिति' उक्त्या प्रभावितः सन् नरसिंहः स्वरचितान्युदाहरणानि प्रस्तुतीकृतवान्।

**१.६.आशाधरभट्टः**– रामजीभट्टस्य पुत्रत्वेन तथा च धरणीधरस्य शिष्यरूपेण प्रख्यात आशाधरभट्ट आनुमानिके १६५०ईशवीयाब्दे जन्म लेभे। अयञ्चासीद्व्याकरण-न्याय-मीमांसा-काव्यशास्त्रेषु पिता रामजीभट्ट इव विद्याप्रवीणः। आलङ्कारिक आशाधरभट्टः कृतिपञ्चकमलिखत्– १.कोविदानन्दः, २.त्रिवेणिका, ३.अलङ्कारदीपिका, ४.प्रभापटलम् , ५.अद्वैतविवेकश्चेति। अयं ग्रन्थरचनायां, वस्तुवर्णनशैलीमलङ्कारविधानञ्चावश्यम् एवाप्पयदीक्षितस्य जग्राह। कोविदानन्दो हि सर्वापेक्षया महत्त्वपूर्णग्रन्थः। अत्राभिधा-लक्षणा-व्यञ्जनासु शब्दशक्तिषु सारगर्भं पर्यालोचनं विहितम्। कारिकया निबद्धस्यास्य ग्रन्थस्योपरि कादम्बरीति स्वरचितटीका रचितानेन।

त्रिवेणिका कोविदानन्दस्य संक्षिप्तरूपमात्रम् 'विस्तारस्तु कोविदानन्दे द्रष्टव्यः' इत्युक्तेः। वेणीशब्दस्य केशपाशादिरूपेष्वर्थेषु सत्स्वपि प्रवाहात्मकोऽर्थः प्रयुक्तस्तेन। यथा गङ्गा-यमुना-सरस्वतीनां समवायः त्रिवेणीत्युच्यते तथैव वृत्तित्रयस्य समन्वयाद्ग्रन्थस्याभिधानमिदम्—

शक्तिं भजन्ति सरला लक्षणं चतुरा जनाः
व्यञ्जनां मर्ममर्मज्ञा कवयः कामनाजनाः॥ इति।

तन्मते अभिधावृत्तिः लक्ष्यव्यङ्ग्ययोः प्रतीतेराश्रयभूता। लक्षणा मुख्यार्थबाधाद्विलम्बप्रतीतये मलिना जाता। गद्येन विरचितायामस्यां त्रिवेणिकायां प्रसिद्धप्राचीनोदाहरणैर्विश्लेषणं दृश्यते। यद्यप्पयदीक्षिताशाधरयोर्ग्रन्थद्वयं पर्यालोच्यते तर्हि रचनादृष्ट्या कुवलयानन्दस्य प्रभावेणाशाधरः प्रभावित इत्यवबुध्यते। अलङ्कारदीपिकायां त्रीणि प्रकरणानि सन्ति। कुवलयानन्दस्य कारिकाभागस्य टीकालङ्कारदीपिकायां निवेशिताशाधरेण, परं न वृत्तिभागस्य। किन्तु ग्रन्थान्ते एकविंशतिः कारिकाः संयोजिताः।

**१.७.वेणीदत्तशर्मा**– अष्टादशशताब्द्या उत्तरार्धे वत्सगोत्रीयस्तीरभुक्तिप्रदेशजो

वेणीदत्तशर्मा रसकौस्तुभम्, अलङ्कारमञ्जरी चेति काव्यशास्त्रविषयक-ग्रन्थद्वितयमरचयत्। रसकौस्तुभे नवविधानां रसानां तथा च विशेषेण श्रृङ्गाररससम्बन्धिनायकनायिकादिभेदविषये मनो दत्तं वेणीदत्तेन। संक्षेपेण मानभङ्गोपाय-कामदशागतविभाव-नायिकाभेद-सखी-दूतीभेद-नायकभेद-भाव-सात्त्विक-स्थायि-व्यभिचारि-अनुभाव-श्रृङ्गारातिरिक्तरसाष्टकानां निरूपणं विहितं ग्रन्थेऽस्मिन्। शास्त्रार्थशैलीं नानुसृत्य कारिकायामभिमतलक्षणान्युपस्थाप्य लक्ष्याणि च निरूप्याभीष्टश्रीकृष्णमाहात्म्यविषयकोदाहरणैरुपस्थापितं लक्ष्यस्वरूपम् आलङ्कारिकेण वेणीदत्तेन। अयञ्च भानुदत्तेन प्रभावितः।

अलङ्कारमञ्जर्यां शब्दालङ्कारनिरूपणात्परं ऊनषष्टिसङ्ख्यकार्थालङ्कारा निरूपिता वर्तन्ते। समीक्षाशैली ग्रन्थेऽस्मिन् नानुसृताचार्येण। आदावेव कारिकायामलङ्काराणां लक्षणान्युपस्थाप्योदाहरणैस्तानि परिष्कृतवान् वेणीदत्तः।

**१.८.अच्युतरायशर्मा**– जगन्नाथोत्तरवर्तिकाले विशिष्टस्थानं लभमानोऽच्युत-रायशर्मा महाराष्ट्रस्य नासिके १८३१ईशवीयात्पूर्वं जनिं लब्धवान्। अनेन विरचितेषु ग्रन्थेषु साहित्यसारः काव्यशास्त्रविषयकः कश्चन प्रसिद्धो ग्रन्थः। ग्रन्थस्योपरि सरसामोदाख्यस्वोपज्ञटीकाऽपि वर्तते। द्वादशाध्यायैर्ग्रथितः साहित्यसारः। आचार्येण समुद्रमन्थनात् प्राप्तपदार्थानां नामानुसारम् अध्यायानां नामकरणं विहितम्। अध्यायानां विषया यथा–

- धन्वन्तरिरत्नम् - मङ्गलाचरणं काव्यभेदः साहित्यशास्त्रस्वरूपञ्च
- ऐरावतरत्नम् - शब्दार्थस्वरूपं शक्तित्रयञ्च
- इन्दिरारत्नम् - अर्थव्यञ्जकता
- दक्षिणावर्तकम्बुरत्नम् - ध्वनिभेदः रसभेदः व्यभिचारिभावलक्षणादिश्च।
- अश्वरत्नम् - गौणादिव्यङ्ग्भेदः
- विषरत्नम् - काव्यदोषः
- गुणरत्नकाव्यगुणः
- कौस्तुभरत्नम् - अर्थालङ्कारः
- कामधेनुरत्नम् - अधमकाव्यभेदः
- रम्भारत्नम् - नायिकाभेदः
- चन्द्ररत्नम् - नायकनिरूपणम्
- अमृतरत्नम् - उपसंहारः

साहित्यसारे स्वरचिताः १३१३ कारिका निबद्धा विलसन्ति। तत्र प्राचीनमतानां निरूपणपुरःसरं केषुचित् स्थलेषु नवीनमतानि समीक्ष्य समुपस्थापितानि वर्तन्ते। अत्रेदमुल्लेख्यं यल्लक्ष्यरूपाण्युदाहरणानि प्रायेणाद्वैतपरकानि।

**१.९.श्रीकृष्णकविः–** सप्तदशशताब्द्या उत्तरार्धः श्रीकृष्णकवेः समयकाल इति विदुषां मतम्। तेन काव्यविषयकग्रन्थचतुष्टयं लिखितम्। ते च यथा–१.मन्दारमरन्दचम्पूः, २.काव्यलक्षणम्, ३.रसप्रकाशः, ४.सारस्वतालङ्कारसूत्रं भाष्यञ्चेति। रसप्रकाशः खलु काव्यप्रकाशस्य टीकेति। मन्दारमरन्दचम्पूरिति ग्रन्थेऽस्मिन् काव्यशास्त्रविषयकलक्षणानि गद्यपद्याभ्यां निबद्धानीति कृत्वा चम्पूरिति नामधेयम्। न केवलमत्र काव्यशास्त्राणाम् अपि तु च्छन्दो-नाट्यशास्त्र-कविशिक्षादीनां पर्यालोचनं विद्यते। ग्रन्थोऽयमेकादशबिन्दुभिर्विभक्तः–

1. वृत्तबिन्दुः(छन्दः)
2. सारबिन्दुः(नायकवर्णनम्)
3. श्लिष्टबिन्दुः(श्लेषः)
4. चित्रबिन्दुः(यमकचित्रम्)
5. बन्धबिन्दुः(बन्धः)
6. गुप्तबिन्दुः(क्रियाकर्मकर्तृसम्बन्धगोपनम्)
7. नर्तनबिन्दुः(नाट्यशास्त्रम्)
8. शुद्धविन्दुः(नायकनायिकावृत्तिलक्षणम्)
9. रम्यबिन्दुः(भावरसौ)
10. व्यङ्ग्यबिन्दुः(अलङ्कारध्वनी)
11. शेषबिन्दुश्चेति(छन्दो-दोष-गुण-शब्दार्थ-पाक-काव्य-वर्ण्यावर्ण्यपदार्थप्रकरणम्)

**१.१०.अभिराजराजेन्द्रमिश्रः–** जगन्नाथपाठकेन व्यक्तिविशेषमाधारीकृत्य संस्कृतसाहित्यस्याधुनिककालो युगत्रयेण विभज्यते–

1. अप्पाशास्त्रि-शिवडेकरयुगः(१८७३—१९१३)
2. भट्टयुगः(भट्टमथुरानाथशास्त्रियुगः)—(१९३०—१९६०)
3. डा. वेङ्कटराघवन्युगः(१९६०—१९८०)

साहित्यसमालोचकवर्यैः कलानाथशास्त्रिमहाभागैर्जगन्नाथपाठकस्य नयः स्वीकृतः। परं प्रश्नो जायते १९८० खृष्टाब्दात् परवर्तिकालः कस्य नाम्ना व्यपदेष्टुं शक्यते? समयेऽस्मिन्नभिराजेन राधावल्लभेन च विशेषेणाऽर्वाचीन-संस्कृतसाहित्यमभवत् समृद्धम्। हर्षदेवमाधवेन मन्यते यत् १९८० खृष्टाब्दादुत्तरवर्तियुगोऽभिराजयुग इति निश्चप्रचम्।

दुर्गाप्रसादाभिराजीदेव्योः पुत्रोऽयं १९४३ ईशवीयाब्दे जनवरीमासस्य द्वितीये दिनाङ्के उत्तरप्रदेशस्य जौनपुरजनपदमलञ्चकार स्वजन्मना। साहित्यरचनायां तथा च शोधसर्जने राजेन्द्रमिश्रोऽद्वितीय इत्यत्र नास्ति संशयः। अर्वाचीनसंस्कृतजगद् अस्य महाकाव्यद्वयेन खण्डकाव्यपञ्चदशकेन नवगीतसंग्रहचतुष्टयेन गजलसंग्रहचतुष्टयेन बालकृतिद्वितयेन नाटकचतुष्टयेन एकाङ्किसङ्ग्रहनवकेन कथासंग्रहादिभिः सुसमृद्धम्।

न हि मौलिककाव्यरचनायामपि च काव्यशास्त्रग्रथनविधौ स्वभावयितृ-प्रतिभायाः परिचयं प्रादादयम्। अभिराजयशोभूषणमिति महनीयकाव्यशास्त्रीय-कृतिरस्य। पारम्परिकपद्धत्या लिखित्वापि काव्यशास्त्रीयतत्त्वानां साङ्गोपाङ्गं विवेचनं कृतमनेन। ग्रन्थेऽस्मिन् गद्यात्मकवृत्त्या ५६८ कारिका विलसन्ति। ग्रन्थकृता प्रायेण स्वरचितान्युदाहरणानि केषुचित् स्थलेषु चापि विंशशताब्द्याः समसामयिककवीनां काव्येभ्यो दृष्टान्ताः समाकलितानि। ग्रन्थस्यास्य मङ्गलाचरणे भरतमुनितो रेवाप्रसादद्विवेदिनं यावत् सर्वेषामाचार्याणां नम्रशिरसा संस्मरणं विहितम्। २००७ ईशवीयाब्दे प्रयागस्य वैजयन्तप्रकाशनात्प्रकाशपदवीं गतो ग्रन्थोऽयम्।

अभिराजयशोभूषणमिति पञ्चभिरध्यायैर्विभक्तम्।

१. काव्यपरिचयोन्मेषः– काव्यप्रशंसा-काव्यलक्षण-हेतु-प्रयोजनानि पर्यालोचितानि वर्तन्ते। काव्यविभाजनमिदं सहृदयहृदयानां पाठकानां दृक्कोणतः कृतमास्ते। तन्मते सहृदयास्वाद्यम्, कोविदास्वाद्यम्, लोकास्वाद्यमिति काव्यस्य भेदत्रियतं भवितुमर्हति, न तु उत्तममध्यमाधमभेदेन विभागः, सरस्वत्या अधमत्वस्यानौचित्यात्।

२. शरीरतत्त्वोन्मेषः– शब्दशक्ति-वृत्ति-रीति-गुणालङ्काराश्चालोचिताः।

३. आत्मतत्त्वोन्मेषः– काव्यात्मतत्त्वत्वेन रसस्य स्थापनं विहितम्।

४. निर्मितितत्त्वोन्मेषः– गद्य-पद्य-मिश्रभेदात् पद्यबन्धाः दृश्य-श्रव्यकाव्ये च

आलोचितानि। प्राचीनकाव्यभेदानां नवीनकाव्येषु प्रयोगो दर्शितोऽनेन।

५. प्रकीर्णततत्त्वोन्मषः– गीतकाव्य-गलज्जलिका-छन्दोमुक्तादिरचनानां लक्षणोदाहरणानि प्रस्तुतीकृतानीहाध्याये।

**१.११.राधावल्लभत्रिपाठी**–राधावल्लभत्रिपाठी साम्प्रतिककालस्य संस्कृतनभस्यर्जुन इव राराजते। स फेब्रुयारीमासस्य पञ्चदशे दिने १९४९ ईशवीयाब्दे मध्यप्रदेशेषु राजगडजनपदे जनिमलभत। संस्कृतहिन्द्याङ्गलभाषासु नवोत्तरशतं ग्रन्था अस्य प्रकाशिता येषु काव्यशास्त्र-नाट्यशास्त्र-संस्कृतकाव्यादिविषयानधिकृत्य विमर्शपूर्वं विरचिताः केचन प्रबन्धाः, कथासङ्ग्रहत्रयी, उपन्यासाः पञ्च, संस्कृतकाव्यसङ्कलनानि च परिगण्यन्ते।

कृत्स्नेऽपि ग्रन्थे नवनवोन्मेषनिदर्शकान् स्वाभिमतनूत्नराद्धान्तान् प्रतिपाद्य काव्यालङ्कारसूत्रं व्यरचयदयमाचार्यः। तत्रैव स्वोपज्ञव्याख्यया सूत्रात्मको ग्रन्थः संवलितः। ग्रन्थेऽस्मिन् त्रीण्यधिकरणानि सन्ति। तत्र काव्यस्वरूपनिरूपणनामके प्रथमाधिकरणे षडध्यायाः, अलङ्कारविमर्शात्मके द्वितीये च षडध्यायाः, काव्यविशेषविमर्शात्मके तृतीयेऽधिकरण एकोऽध्यायो विलसति। आचार्यस्यास्य वैशिष्ट्यमत्रैव यदद्यतनसमाजपरिप्रेक्षे काव्यभेदो निरूपितस्तेन। तथाहि प्राचीनाचार्यैर्व्यपदिष्टं श्रव्यं पाठ्यनाम्ना व्यपदिशति त्रिपाठी। तन्नये यस्मिन् काले कवयः सदसि स्वकाव्यं पाठं पाठं श्रावयन्ति स्म, सहृदयहृदयाः च श्रावं श्रावं काव्यार्थं विभावयन्ति स्म, तस्मिन् काले श्रव्यकाव्यमिति नामान्वर्थमासीत्। परं साम्प्रतं साहित्यस्य श्रवणं न तथा प्रचलितं, यथा मुद्रितैः पुस्तकैस्तस्य पाठः। अतः पाठ्यमिति संज्ञैवोचिता। विषयमूला महाकाव्योपन्यासाद्या विधा गजलगीतिश्चेत्याद्या विषयिप्रधाना गद्यभेदेषु निबन्धालोचनाकथोपन्याससंस्मरणजीवनचरित्रात्मककथारेखाचित्रयात्रावृत्तान्त-दैनन्दिनीवार्तासाक्षात्काराद्यो भेदा निरूपिताः परिभाषिताश्चाभिनवपरिपाट्या।

यथा मम्मटाचार्याणां काव्यलक्षणानि परिशील्य ‘लोकानुकीर्तनं काव्यमिति’ काव्यलक्षणं पुरस्करोति पुनः पुनः व्याख्याति च। एवं ‘मुक्तिस्तस्य प्रयोजनमिति’ नूतनं काव्यप्रयोजनं प्रस्तौति। पुनश्च ‘जागरिता प्रतिभा तस्य कारणमिति’ काव्यहेतुं प्रतिपादयति। ततः ‘अलङ्कारः काव्यजीवनमिति’ प्रतिपाद्यालङ्कारवादिभिरलङ्कारतयैवाभिमतेषु गुणरीतिरसादिष्वलङ्कारपदमलङ्करोतीत्यलङ्कारः, अलङ्कृतिश्चालङ्कार इति निर्वचनं

विधीयते।

इत्थं प्राच्यप्रतीच्यकाव्यशास्त्राणां क्षीरोदधिं निर्मथ्य नवीनसिद्धान्तावलीमस्मत्सविधे समुपायनीकरोति राधावल्लभत्रिपाठी। तदुक्तं तेन स्वयमेव–

"प्राच्यपाश्चात्त्यसाहित्यशास्त्राणां क्षीरसागरम्।
निःसारितं विनिर्मथ्य नवसिद्धान्तमौक्तिकम्॥" इति।

**१.१२.रेवाप्रसादद्विवेदी**–मध्यप्रदेशस्य सीहौरजिल्लान्तःपातिनि नादनेरग्रामे १९३५ ईशवीये वर्षे पूते ब्राह्मणवंशे ज्योतिषाचार्यस्य पुत्रत्वेन रेवाप्रसादद्विवेदी जनिमलभत। महाकाव्यत्रयं, खण्डकाव्यसप्तदशतयम्, अलङ्कारशास्त्रविषयकं ग्रन्थचतुष्टयञ्च विरचितवानाचार्योऽयम्। काव्यशास्त्रविषयकग्रन्थास्तावत् १. काव्यालङ्कारकारिका, २. साहित्यशारीरकम्, ३. नाट्यानुशासनम्, ४. अलं ब्रह्म। काव्यालङ्कारकारिकायां काव्यशास्त्रीयतत्त्वानां नवीनरीत्या व्याख्यानं विहितमनेनालङ्कारिकेन। तथाहि अभिनवकाव्यशास्त्रमित्युपशीर्षकं वर्तते ग्रन्थस्यास्य। प्रत्ययवादिदृष्टिभङ्ग्या (Idealistic) रेवाप्रसादद्विवेदिना स्वकाव्यदर्शनं पर्यालोचितम्। काव्यदर्शनमिदं न हि प्रमातृमूलकं, परं प्रमेयमूलकम्। ध्वनिमार्गस्य परमाचार्याणां तत्त्वानि तेनाकाट्ययुक्तिपुरःसरं खण्डितानि। २६१संख्यककारिका विलसन्ति संस्कृताङ्गलभाषाभ्यां विरचितटीकोपेताः। चौखाम्बासुरभारतीप्रकाशनालयतः १९७७ ईशवीये वर्षे प्रकाशपदवीं गतो ग्रन्थोऽयम्। अलङ्कारवादी रेवाप्रसादद्विवेदी काव्यात्मत्वेनालङ्कारं स्वीकृतवान्। रसादिप्रस्थानषट्कमलङ्कारवादानुसारं समीक्षितमनेन। तत्र रस-रीत्यौचित्यानां ध्वनावन्तर्भावोऽङ्गीकृतः। किञ्च, वक्रोक्तेरलङ्कारत्वमुरीचकार द्विवेदी। तन्नये ध्वनिरप्यलङ्कारप्रस्थानेऽन्तर्भवेत्। अतः अलङ्कारः काव्यात्मा। तदुदितं-

"अस्मन्मते त्वलङ्कारः काव्यस्याङ्गस्य वीक्षणे।
ध्वनिं सोमं यथा वह्निः कवलीकृत्य राजते॥" इति।

## २. अप्रसिद्धा अल्पप्रसिद्धाश्चाचार्याः–

**२.१.नरहरिः**– नरहरिणा नवरसमञ्जरीति उल्लासषटकेन पूरितोऽलङ्कार-शास्त्रीयग्रन्थो विरचितः। ग्रन्थेऽस्मिन् प्रत्युल्लासं विषया इत्थं– १. गुरुप्रशंसा, २. नायकभेदः, ३. नायिकाभेदः, ४. नायिकोपभेदः, ५. रसः, ६. भावः।

प्राचीनाचार्येभ्यो लक्षणान्याकलितान्यप्युदाहरणप्रदानावसरे मौलिकत्वं प्रदर्शितं नरहरिणा।

**२.२.कृष्णदीक्षितः–** आचार्यस्यास्यालङ्कारशास्त्रविषयकं ग्रन्थद्वितयं वर्तते– रघुनाथभूपालीयः अलङ्कारमुक्तावली चेति। कृष्णदीक्षितः प्रथमे ग्रन्थे स्वाश्रयदातू रघुनाथस्य प्रशंसापरकान्युदाहरणानि प्रदत्तवान्। रघुनाथः सप्तदशशताब्द्या नृपतिरासीदिति कृत्वालङ्कारिकोऽयं सप्तदशशताब्दीकः। ग्रन्थेऽस्मिन् काव्यशास्त्रस्य सर्वाणि तत्त्वानि व्याख्यातानि। अष्टविलासैर्विभाजितो ग्रन्थोऽयम्। तत्र क्रमेण नायकगुणः, काव्यस्वरूपम् , संलक्ष्यक्रमव्यङ्ग्यः, असंलक्ष्यक्रमव्यङ्ग्यः, गुणीभूतव्यङ्ग्यः, शब्दालङ्कारः, अर्थालङ्कारः, गुणविवेचनञ्चेति विषया परिवेशिताः। द्वितीये ग्रन्थे केवलमलङ्काराणां विषये सारगर्भं पर्यालोचनमास्ते।

**२.३.मौनिकृष्णभट्टः–** मौनिकृष्णभट्टस्यालङ्कारग्रन्थो हि वृत्तिदीपिकेति। ग्रन्थस्य परिशेषे तेन स्वयमेवोदितम्- "इति श्रीमौनीतिलकायमानगोवन-भट्टात्मजरघुनाथभट्टसुतश्रीकृष्णभट्टविरचिता वृत्तिदीपिका समाप्तिमगमत् " इति। एतेन कृष्णभट्टस्य वंशपरिचयादिकं स्फुटं काशते स्म। वृत्तिदीपिकायामप्पयदीक्षितकृतवृत्तिवार्तिकस्य केषाञ्चिद्विषयाणां पर्यालोचनं प्रस्तौति आलङ्कारिकोऽयम्। परं तेन पण्डितराजस्य नाममात्रस्याप्युल्लेखो न कृतो वर्तते। अतः प्रतीयते यज्जगन्नाथो ह्यस्य समसामयिकः। ग्रन्थेऽस्मिन् शब्दवृत्त्यतिरिक्तवैयाकरणाभिमतकृत्तद्धितसमासैकशेषसमाद्यन्तधातुरूपात्मकवृत्ति-पञ्चतयं विचारितम्। गद्येन रचिते इह ग्रन्थे प्रसङ्गवशात्स्फोटादिविचारो निहितः।

**२.४.हरिप्रसादमाथुरः–** आचार्येण काव्यशास्त्रविषयकं ग्रन्थद्वितयं लिखितम्। ग्रन्थौ तावत् काव्यार्थगुम्फः काव्यालोकश्चेति। प्रथमग्रन्थस्य रचनाकालः १७७५ ईशवीयाब्दः। सप्तप्रकाशैर्विभक्तः काव्यालोकः १७२८ ईशवीये वत्सरे लिखितोऽवर्तत। काव्यार्थगुम्फः केनाप्यध्यायेन न विभक्तः। ग्रन्थद्वितयस्य विषयाः प्रायेण तुल्या वर्तन्ते। काव्यालोकस्य प्रतिप्रकाशं विषयास्तावत् काव्यलक्षणम् , ध्वनिनिरूपणम् , रसविकाशः, दोषविवेचनम् , गुणनिरूपणम् , शब्दालङ्कारविवेचनम् , अर्थालङ्कारनिरूपणञ्चेति। कारिकाकारेण सूत्रवृत्त्युदाहरणैः प्रपूरितोऽयं ग्रन्थः।

**२.५.बलदेवविद्याभूषणः–** अष्टादशशताब्दीकोऽयं वङ्गदेशीयो ब्राह्मण-

कुलोद्भवः काव्यकौस्तुभम्, साहित्यकौमुदी चेति ग्रन्थद्वितयं विरचितवान्। नवप्रभाभिर्विरचिते काव्यकौस्तुभे ग्रन्थे काव्यफल-शब्दार्थवृत्ति-रस-गुण-रीति-दोष-ध्वनिभेद-मध्यमकाव्यशब्दार्थालङ्कारादिविषया पर्यालोचिता विलसन्ति। परं साहित्यकौमुदी खलु काव्यप्रकाशस्य टीकेति। अत्र काव्यप्रकाशस्य कारिकाभागस्य व्याख्या कृता वर्तते। अस्य ग्रन्थस्योल्लेख्यं वस्तु तावदत्र मम्मटस्य कारिका भरतसूत्रमिति नाम्ना व्यपदिष्टा। साहित्यकौमुदीमुपरि आचार्येण स्वयमेव कृष्णानन्दिनीति टिप्पणी रचिता। अस्यां टिप्पण्यां काव्यप्रकाशे इव शब्दार्थालङ्कारात्मक एकादशोऽध्यायो वर्तते। अन्तिमेऽध्याये भाषासमक-बिन्दुच्युतक-विकल्प-अनुगुण-प्रहर्षण-पूर्वरूप-विचित्राद्यर्थालङ्कारा निरूपिता भवन्ति। अनेन स्वरचितेषूदाहरणेषु चैतन्यदेवस्य स्तुतिर्विहिता।

**२.६.चन्द्रकान्ततर्कालङ्कारः–** महामहोपाध्यायचन्द्रकान्ततर्कालङ्कारोऽलङ्कार-सूत्राणीति काव्यशास्त्रविषयकग्रन्थं रचितवान्।

**२.७.हरिदाससिद्धान्तवागीशः–** जीवानन्दविद्यासागरस्य शिष्यत्वेन प्रसिद्धिं गतो हरिदासः काव्यकौमुदीति अलङ्कारशास्त्रविषयकं ग्रन्थं लिखितवान्। एतं व्यतिरिच्य नैकाश्च टीका अनेन रचिताः। तेषु साहित्यदर्पणग्रन्थस्य कुसुमप्रतिमा टीका, नैषधटीका, शिशुपालवधटीका, दशकुमारचरितटीका, रघुवंशटीका, किरातार्जुनीयटीका चेत्यन्यतमाः।

काव्यकौमुदीति ग्रन्थस्य रचनानेन कृता वर्तते १८४२ शकाब्दे। तदुक्तं तेन-

पक्षाब्धिनागेन्दुमिते शकाब्दके।
सौराश्विने तेन चतुर्दशे दिने।
विनिर्मिता श्रीहरिदासशर्मणा
समाप्तिमाप्ता किल काव्यकौमुदी॥ इति।

लक्षणसूत्राभ्यां ग्रथितो ग्रन्थोऽयं पञ्चदशकलासम्पूर्णः। ग्रन्थेऽस्मिन् प्रायः सर्वाणि काव्यशास्त्रीयतत्त्वानि व्याख्यातानि सन्ति। तत्र प्रथमे काव्यप्रयोजनं, स्वरूपञ्च, द्वितीये दृश्यकाव्यं, तृतीये श्रव्यकाव्यम्, चतुर्थे ध्वनिः, पञ्चमे गुणीभूतव्यङ्ग्यं, षष्ठे शक्तित्रयं, सप्तमे रसः, अष्टमे नायकादिः, नवमे नायिकादिः, दशमे दोषः, एकादशे गुणः, द्वादशे रीतिः, त्रयोदशे शब्दालङ्कारः, चतुर्दशे चित्राद्यलङ्कारः, पञ्चदशे अर्थालङ्कारश्चेति वर्णिताः सन्ति।

ग्रन्थस्यास्य लक्ष्यरूपान्युदाहरणानि स्वरचितानि तथा च माघादिग्रन्थेभ्यो निबद्धानि। ग्रन्थे पूर्ववर्तिकाव्यशास्त्रीयग्रन्थानां सरस्वतीकण्ठाभरण-काव्यप्रकाश-साहित्यदर्पणानामपि समुल्लेखः समस्ति।

**२.८.छज्जुरामशास्त्री विद्यासागरः–** विंशशताब्दीयालङ्कारिकेषु छज्जुरामशास्त्री महत्त्वपूर्णस्थानं लभमानोऽभूत्। तेन बहूनि मौलिककाव्यानि शास्त्रीयग्रन्थाश्च रचितानि। न केवलं काव्यशास्त्रे अपि तु व्याकरणन्यायादिषु तस्य व्युत्पत्तिरपारा।

साहित्यबिन्दुरलङ्कारशास्त्रविषयकग्रन्थो विद्यासागरस्य। बिन्दुपञ्चकैर्ग्रथितो ग्रन्थोऽयञ्चतुर्धा विभक्तः- कारिका, वृत्तिः, उदाहरणञ्चोदाहरणविवरणमिति। कारिकावृत्तिविवरणानि विद्यासागरेण स्वयमेव विरचितानि परमुदाहरणेषु प्रायेण सर्वाणि ग्रन्थकृतः, कानिचिच्चान्येषां कविवराणाम्। परमत्रेदमुल्लेखार्हं यद्दोषप्रकरणस्य सर्वाण्युदाहरणानि श्रीहर्षरचितनैषधचरितादुद्धृतानि तेन। प्राचीनसाहित्यग्रन्थेषूपस्थापितान्यश्लीलोदाहरणानि नोल्लिख्य शिक्षाप्रदैरुदाहरणैर्भारतीयसभ्यतासंस्कृत्योर्बोधः पाठकानां सविधे पुरस्कृतः। प्रथमबिन्दौ काव्यलक्षण-फल-कारण-भेदाः, द्वितीयायां शब्दार्थयोः त्रैविध्यत्वं, रसश्च, तृतीयायां दोषप्रकरणम्, चतुर्थबिन्दौ रीतिगुणौ, पञ्चमबिन्दौ अलङ्कारप्रकरणञ्च वर्णिताः।

**२.९.ब्रह्मानन्दशर्मा–** पाञ्जाबवास्तव्योऽयमालङ्कारिको मौलिककाव्यशास्त्रीय-ग्रन्थत्वेन काव्यसत्यालोकं रचितवान्। काव्यशास्त्रीयषड्ग्रन्थास्तेन विरचिताः– वस्त्वलङ्कारदर्शनम्, अभिनवरसमीमांसा, तत्त्वशतकम्, रसालोचनञ्चेति। Re-assessment of Rasa-theory इति शीर्षकोपेतं शोधनिबन्धं विरचय्य राजस्थानविश्वविद्यालयतः प्रकाशितवान्। काव्यसत्यालोकाख्ये ग्रन्थे उद्योतपञ्चकं वर्तते। प्रथमे उद्योते सत्यनिरूपणम्, द्वितीये धर्मसूत्रताधानम्, तृतीये व्यापारयोगः, चतुर्थे भावयोगः, पञ्चमे काव्यलक्षणादिविवेचनम् आलोचितानि वर्तन्ते। संस्कृतकाव्यशास्त्रे जगन्नाथात्परं नूत्नैका सरणिस्तेन प्रस्तुता।

**२.१०.रहसबिहारीद्विवेदी–** आचार्यश्री-सारस्वतसम्मानादिभिः सभाजितो रहसबिहारीद्विवेदी साहित्यविमर्श इति ग्रन्थे काव्यशास्त्रीयततत्त्वानि

विवेचितवान्। तस्य काव्यशास्त्रीयपर्यालोचनमाधुनिकसंस्कृतकाव्यानां दृक्कोणतो भवति। तन्मते ये खलु इदानीन्तनीयाः काव्यज्ञाः मम्मटविश्वनाथाद्याचार्यानुसारं काव्यशास्त्राणि प्रणयन्ति, ते न ह्यर्वाचीना भवितुमर्हन्ति। प्रतिकवि काव्यरचनापरिभाषा भिद्यते। अपि च, काव्यशास्त्रनिगडेन प्रत्येकं कवितानां निगडनं न ह्युचितम्। एतेन रसोपलब्धिर्न जायते। परं वाल्मीकि-कालिदास-भारवि-माघ-श्रीहर्ष-भवभूति-राजशेखरादीनां प्रभावेन भावितः सन्काव्यविरचनं साम्प्रतम्। आधुनिककाव्यशैल्यां राग-विमान-दूत-लहरी-उपन्यास-बिम्बविधान-प्रतीक-नभोनाट्यादिकाव्यविधानामन्तर्भूक्तिः कृता वर्तते।

**२.११.सीतानाथ आचार्यः**– वङ्गप्रदेशस्य कश्चन विशिष्टः काव्यतात्त्विकश्चालङ्कारिक इति कृत्वा तस्य प्रत्येकं धमण्यां सततं प्रवहति लोहितशोणितात्मककाव्यतत्त्वम्। तथाहि काव्यवैशिष्ट्यानि स्वत एव तद्भमणितो निःसृत्य सरलमनोभङ्ग्या 'कविते विश्ववन्दिते' इति मौलिककाव्यग्रन्थे रोचिष्णुतया पदं कुर्वन्ति। अत्र कवितेति पदं काव्यपरम्। कवितायाः प्रशंसापरकेयम्।

कविता कविमानसोत्थतीव्रानुभूतेर्विशेषे क्षणे स्वसत्तां लभते। विश्वजनीनमानसे तस्याश्चिरन्तनी सगौरवा च स्थितिः। वयसातिप्रवीणापि नवीना सा सदैव पाठकानां मनो रञ्जयन्ती विराजते। तस्यामलङ्कार-रीति-रस-भाव-वक्रोक्त्यौचित्यानां स्थितिर्विद्यते -

"प्रत्यङ्गमालिङ्ग्य विराजते ते
जन्मक्षणाद् विस्मयिता सखीव।
जगुप्सितञ्चेप्सितां प्रयाति
त्वदङ्गसङ्गं लभते यदीह"॥इति।

देशस्य स्वाधीनतान्दोलने देशप्रेमिकान् प्रोत्साहयति कवितेयं- 'स्वतन्त्रतां देशगतां त आप्तुं/ यच्छन्ति प्राणान् भवतीं स्मरन्तः।' इति। ब्रह्मस्वरूपं यथा देवैरप्यज्ञातं तथैव काव्यमीमांसकानामनेकेषां प्राचीनकालादधुनापि प्रचेष्टा व्यर्थतां गता काव्यस्वरूपविषयिनी। प्रतिक्षणं सचेतोभिः काङ्क्षमाणापि सा सङ्गतौ प्राप्तिसीमानमतिक्रम्य सरहस्यावतिष्ठते। कविता मानवेन मानवान्तरस्य, जात्या जात्यन्तरस्य, अतीतेन भविष्यतः, देशेन देशान्तरस्य, कविना सहृदयस्य, अरण्यप्रकृत्या मानवप्रकृतेर्मेलनं साधयति। सा चाद्वैतवादिनोऽपि द्वैतमार्गे प्रेरयति-

"द्वैताद्वैतमते भिन्नस्वरूपेऽभिन्नरूपता।

कदाचिदेवमायाति कविते तव शक्तितः"।इति।

कवितायाः नाट्यरूपस्य रामकृष्णादौ, भजनगीतिरूपायाः, शाक्तपदावली-रूपायाः, वैष्णवस्तोत्रात्मिकाया, अरविन्दकविताया, रोगविमुक्तये च प्रभावो विद्योततेतमाम्। कवितेयं पुरुषार्थसाधिका, कलाप्रावीण्यदात्री, कान्तासम्मितोपदेशदात्री, नियतिकृतनियमरहित्री, प्रतिक्षणं नवायमाना च। किञ्च, सा नरचित्तमूर्द्ध्वं नयति, मानवानामानन्दतृष्णामपि। पाठकानानन्दमयसत्तायां स्थापयति, पङ्कजवत्तुच्छाल्लब्धजन्मापि सौन्दर्यं वितनोति, सर्वेषु लोकेषु तथा सर्वभाषासु च विचरति सा। तदुक्तं कविना-

"पृथ्वीदिवो भेदमतीत्य कामं
सर्वत्र निर्बाधतया भ्रमन्ती।
भाषासु सर्वासु कृतप्रकाशा
भावैर्विचित्रैः कविते विभासि॥"इति।

वैज्ञानिकसत्याद्भिन्नं तावत् काव्यसत्यम् -

"वैज्ञानिकाद् वास्तविकात् प्रभिन्ने
सत्यात्तथा दर्शनदृष्टिसम्भवात्॥"इति।

कवितायाः छन्दोवैचित्र्येण कविचित्तं मोमुद्यते, सौन्दर्य्येण पृथ्वी सुन्दरी, संगीतेन मानवचित्तमेकतानीभवति, समुद्रे तरङ्गा जायन्ते। कवितेयं निष्प्राणादौ प्राणसञ्चारादिकं करोति। जगति कवितायाः स्वरूपविषये वास्तवता-कल्पनाप्रभव-कल्पना-कलाकैवल्यादिविविधानि मतानि प्रादुरभवन् -

"एवमन्यान्यनेकानि मतानि विषये तव।
कविते परिदृश्यन्ते दुर्विज्ञेया तथाप्यसि॥" इति।

परिशेषे संस्कृतकाव्यधारायाः क्रमविकाशः कविना दशश्लोकैर्विन्यस्तः।

**३.टीकाकृदाचार्यवर्गः–** संस्कृतकाव्यशास्त्रजगति नैके टीकाकृतो राराज्यन्ते, ये खलु स्वस्वभावयितृप्रतिभया काव्यशास्त्राणि विश्लेषितवन्तस्तेषां नामग्राहमुल्लेखो विधीयते–

| टीकाकाराणां नामानि | टीकानां नामानि |
|---|---|
| १. गदाधरचक्रवर्तिभट्टाचार्यः | काव्यप्रकाशटीका |
| २. महेश्वरन्यायालङ्कारः | विज्ञप्रिया(साहित्यदर्पणस्य टीका) |
| ३. जीवानन्दविद्यासागरः | विमला (साहित्यदर्पणस्य टीका) |

| | |
|---|---|
| ४. नागेशभट्टः | १. गुरुमर्मप्रकाशः(रसगङ्गाधरटीका)<br>२. उद्योतः(काव्यप्रकाशटीका)<br>३. प्रदीपः(काव्यप्रकाशटीका)<br>४. अलङ्कारसुधा(कुवलयानन्दटीका)<br>५. प्रकाशः(रसमञ्जरीटीका)<br>६. रसतरङ्गिनी टीका |
| ५. प्रेमचन्द्रतर्कवागीशः | १. नैषधचरितस्य टीका<br>२. शब्दकल्पसारः<br>३. काव्यादर्शटीका |
| ६. रामचरणतर्कवागीशः | १. साहित्यदर्पणस्य टीका विकृतिः<br>२. कुवलयानन्दटीका |
| ७. शुभविजयगणिः | मकरन्दः (काव्यकल्पलताया वृत्त्याः कविशिक्षायाः टीका) |
| ८. गोपीनाथः | १. सुमनोमनोहरकाव्यप्रकाशटीका<br>२. साहित्यदर्पणटीका प्रभा<br>3. रघुवंशटीका |
| ९. नरसिंहठक्कुरः | नरसिंहमनीषा(काव्यप्रकाशस्य टीका) |
| १०. आनन्दराजानकः | १. निदर्शना(काव्यप्रकाशस्य टीका)<br>२. शितिकण्ठविबोधनम् |
| ११. राजानकरत्नकण्ठः | १. सारसमुच्चयः(काव्यप्रकाशटीका)<br>२. स्तुतिकुसुमाञ्जलिटीका<br>३. युधिष्ठिरविजयकाव्यटीका<br>४. हरिविजयकाव्यटीका |
| १२.अतिरात्रयज्वन् | १. चित्रमीमांसाया दोषोद्धारः<br>२. चित्रमीमांसादोषधिक्कारः |
| १३. सिद्धिचन्द्रगणिः | १. बृहती<br>२. काव्यप्रकाशखण्डनम् |

| | |
|---|---|
| १४. वामनभट्टझालकीकरः | काव्यप्रकाशस्य बालबोधिनी टीका |
| १५. विश्वनाथचक्रवर्ती | १. आनन्दचन्द्रिका(उज्ज्वलनीलमणिटीका)<br>२. सारबोधिनी(अलङ्कारकौस्तुभटीका) |

एतानतिरिच्य बहवः टीकाकारा वरीवर्तन्तेऽर्वाचीनकाव्यशास्त्रमञ्चे, ये खलु बन्धस्य व्यापकत्ववशान्नोल्लिख्यन्ते। अर्वाचीनसाहित्यशास्त्रक्षेत्रे तु तेषां टीकाकृतामवदानं सर्वदा संस्मरणीयमिति निश्चप्रचमभिधातुमलम्। भवन्तः शोधपाठकाः एवं न चिन्तयेयुः यत्तेषां नोल्लेखात्ते न विशिष्टटीकाकाराः उत नास्ति तेषां विशिष्टावदानं सौन्दर्यतत्त्वपरिसरे।

**४.अज्ञातालङ्कारिकवर्गः–** अद्यतने काले केचित् काव्यशास्त्रीयग्रन्थाः परिप्राप्यन्ते येषां कर्तृविषये विदुषां विप्रतिपत्तिर्विद्यते। तद्यथा-

**४.१.काव्यलक्षणविचारः–** ग्रन्थस्यास्य कर्ता क इति नोल्लिख्यते। अत्र रसगङ्गाधरचित्रमीमांसयोर्ग्रन्थयोर्नामोल्लेखाद् ग्रन्थस्य रचनाकालः सप्तदश-शताब्दीत्यनुमीयते।

**४.२.अलङ्कारमञ्जरी–** काव्यनाट्यतत्त्वादिविषयपूरितो दशाध्यायैर्ग्रथितश्च ग्रन्थोऽयम् अष्टादशशताब्दीकः। ग्रन्थेऽस्मिन् निबद्धान्युदाहरणानि काकर्लपूरि-वंशजस्य रामचन्द्रस्य प्रशंसामूलकानि। ग्रन्थस्यास्य कर्ताज्ञातः। प्रतापरुद्रीय-ग्रन्थस्यानुकरणात्मकोऽयं ग्रन्थः।

**४.३.रसकौमुदी–** रसकौमुदीति काव्यशास्त्रीयग्रन्थस्यापि कर्तुः समुल्लेखो न कुत्रापि प्राप्यते। समालोचकस्य पी.के.गोडपादस्य मतानुसारमष्टादशशताब्द्या उत्तरार्धे रचितोऽयं ग्रन्थः।

**४.४.अलङ्कारदर्पणः–** असम्पूर्णपाण्डुलिप्याकारेण सम्प्राप्तो ग्रन्थोऽलङ्कार-शास्त्रीयो यत्रोपमालङ्कारतो विरोधाभासान्तं यावदलङ्कारसमीक्षा विद्यते। अपि चालङ्कारदर्पणस्य लेखकः क इति विवादधूमावृतोऽद्यापि।

**४.५.अलङ्कारप्रकाशिका–** शब्दालङ्काराणां सङ्ग्रहात्मकस्यास्य ग्रन्थस्य रचयिता क इत्यत्रापि विद्वांसो विवदन्ते। अष्टादशशताब्द्या अन्तिमभागे

ऊनविंशशताब्द्याश्चादिमे पर्याये रचना जातास्य ग्रन्थस्य।

**४.६.रसविवेकः**– न जानन्ति स्म केऽपि कोऽस्यालङ्कारग्रन्थस्य कर्तेति। परं लेखकस्तद्गुरुभ्रात्र्योर्नामोल्लिखितवान्। अध्यायत्रितयात्मको ग्रन्थोऽयम्। अध्याया यथा रसविवेकः, रसाधिकरणम्, रसभेदश्चेति।

**४.७.रसिकरसायनम्**– ग्रन्थस्यासम्पूर्णा पाण्डुलिपिर्वर्तते। अध्यायद्वितयात्मके प्रथमे यथाक्रमं दशरूपकाणि काव्यञ्च वर्णितानि। नायिकादिप्रकरणमिति तृतीयाध्यायस्य नाम। दशरूपकप्रतापरुद्रीयाभ्यां ग्रन्थाभ्यां प्रभावभावितमिदं रसिकरसायनम्।

**४.८.लक्षणमालिका**– लक्ष्यलक्षणमालिकेति ग्रन्थस्यास्य नामान्तरम्। काव्यशास्त्रस्य प्रथमाध्येतॄणां कृते रचितेयम्। नायक-काव्य-रस-अलङ्कार-नाटकपद्धतयो ग्रन्थस्य विषयत्वेनालोचिताः। ग्रन्थकर्तुर्नामानुल्लिखितमिह ग्रन्थे।

**५.उपसंहृतिः**–नित्यनूत्नकाव्यविषय-बिम्ब-प्रतीक-मिथ्-उक्ति-प्रत्युक्ति-अन्योक्ति-मुक्तकादि-काव्यशैलीनां विविधदेशिकवैदेशिकच्छन्दसाम् अनुकरणेन लिखितानां प्राचीनाभिः सह नूतनाभिः काव्यविधाभिर्विरचितानाम् असङ्ख्य-काव्यबन्धानां समीक्षात एतदेव परिज्ञायते यत् एकविंशशतके नूतनकाव्य-शास्त्रप्रणयनस्य प्रयोजनम् अस्ति न वेति। काव्यशास्त्रीयपरम्परायाम् अस्माकं काव्यशास्त्र-विरचनस्य मुख्यम् उद्देश्यम् आसीद् ग्रन्थग्रन्थिशिथिलीकरणम्, न तु परमतखण्डनम्। परं परम्परागतमार्गत्यागो नोचितः सर्वदा सर्वथा। तदुक्तम् अमरनाथेन काव्यसिद्धान्तकारिकायाम्-

> "परम्पराखण्डनदत्तचित्तै-
> र्न बध्यते काव्यमुदात्तवस्तु।
> अपार्थशब्दैः रचितं तु वृत्तं
> क्लिश्नाति चेतो मृदु सत्कवीनाम्॥" इति।

अभिराजराजेन्द्रमिश्रः स्वकीयेऽभिराजयशोभूषणे कुन्तकादिप्राचाम् आचार्याणामुपरि नितरां खड्गहस्तो भूत्वा ब्रूते–

> "किन्तु तद्विषये तूष्णीमुपाश्रित्य यथा निजम्।
> मतं न्यस्यति साटोपं कुन्तकस्तन्न साम्प्रतम्॥
> व्यङ्ग्यार्थविषये यद् यद्वाचिकं महिमान्वितम्।

प्रस्तौति ध्वनिकारोऽसाविदं प्रथमतां गतः॥
तत्तदेवानुवदति कुन्तकोऽपि च केवलम्।
अपसार्य ध्वनिं तावत्स्वीयवक्रोक्तिसंज्ञया॥" इति।

यद्यपि साम्प्रतं पञ्चविंशतिप्रायाः संस्कृतकाव्यशास्त्रीयग्रन्थाः प्रणीताः सन्ति, किन्तु परम्परागतसंवादाभावात्तेषां समीक्षा प्रायेण न संज्ञाता। तथापि केवलमभिराजयशोभूषणम्, अभिनवकाव्यालङ्कारसूत्रञ्चातिरिच्य समकालीनकाव्यशास्त्रीयग्रन्थानां खण्डनं मण्डनं नामोच्चारणमपि न भवतीति समालोचकानां नारायणदाशानामाशयः।

भरतादारभ्य जगन्नाथं यावद्यथा काव्यशास्त्रीयधाराविच्छिन्नत्वेन प्रवाहिता वर्तते, तद्वत्पण्डितराजोत्तरवर्तिकाले संस्कृतकाव्यशास्त्रसन्तानः प्रवहन्नस्ति। नैके काव्यशास्त्रज्ञाः काव्यशास्त्रीयतत्त्वानां साङ्गोपाङ्गं विवेचनं कृतवन्तः। केचिच्च काव्यशास्त्रस्य किमप्यङ्गविशेषमुपजीव्य, केचिद्वा प्राचामर्वाचीनानां ग्रन्थानाञ्च टीकाश्च विरच्य काव्यशास्त्रपरम्पराया अभ्युन्नतिं साधितवन्तः।

किन्तु जगन्नाथोत्तरवर्तिकाव्यिकानां काव्यशास्त्रविरचनप्रवृत्तिः पूर्वापेक्षया अधिका संदृश्यते। मन्ये अष्टादश-ऊनविंश-विंशैकविंशशतकेषु लक्षणग्रन्थ-विरचनं विद्वत्तायाः प्रसिद्धेश्च सूचकमिति। विना काव्यशास्त्रविरचनं प्रतिष्ठा न लभ्यते, न तु नूत्नकाव्यराद्धान्तस्थापनं लक्ष्यमिति कृत्वौपचारिकता-वशात्साम्प्रतं काव्यशास्त्रीयग्रन्था विरच्यन्ते यत्र तत्र पिष्टपेषणं पूर्वोक्तालङ्कारग्रन्थविश्लेषणं चैव भवतीत्यभिधातुमलम्।

प्रथमतः, अभिराजयशोभूषणम्, अभिनवकाव्यालङ्कारसूत्रं, काव्यालङ्कार-कारिका, नव्यकाव्यतत्त्वमीमांसा इत्यादिग्रन्थाः कियदंशेनाधुनिककाव्यशास्त्रीय-प्रयोजनानि पूरयन्ति।

द्वितीयतः, प्रायेण सर्वैरर्वाचीनैरालङ्कारिकैः बालबोधाय ग्रन्थविरचनं कृतम्। यतः समीक्षात्मकशैल्याश्रयं न विधाय लक्षणलक्ष्ययोः सरलं स्वरूपमुपन्यस्तम्। सर्वेषां पुरातनलक्षणानां यथाशक्ति परिष्कारः स्यादिति उद्देश्यं वर्तते साम्प्रतम्। अलक्षितानां लक्षणनिर्माणं स्यात्।

परमद्यत्वे विश्वेश्वररचिते अलङ्कारकौस्तुभे नव्यन्यायपरिभाषयालङ्काराणां विवेचनं प्रस्तुतम्। रसगङ्गाधरे नैयायिकभाषाया यद्बीजारोपणं बभूव, विश्वेश्वरलेखन्या तस्यैव चरमोत्कर्षः संदृश्यते। परवर्तिकाले भट्टदेवशङ्करपुरोहितेनालङ्कारमञ्जुषायामलङ्कारस्य निर्दुष्टं लक्षणं कृतम्-

“इतराङ्गीभूतरसभावभिन्नव्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठायाः समवाय-सम्बन्धावच्छिन्नचमत्कृतिनिष्ठकार्यतानिरूपितसमवायसम्बन्धावच्छिन्नकारणता-निरूपितविषयतासम्बन्धावच्छिन्नावच्छेदकता, तन्निरूपितस्वरूपसम्बन्धा-वच्छिन्नावच्छेदकत्वं काव्यालङ्कारस्य लक्षणमिति”।

तृतीयतः, पण्डितराजस्य निर्माय नूतनमुदाहरणानुरूपमिति प्रतिज्ञया परवर्तिनश्चाचार्याः प्रभाविता अभवन्। नरसिंह-विद्याराम-कृष्णादयः स्वरचितलक्षणैः समं स्वकरचितलक्ष्यरूपाण्युदाहरणानि प्रस्तुतवन्तः। एतेन तेषामाचार्याणां कारयितृप्रतिभायाः परिचयः समुपलभ्यते।

चतुर्थतः, साम्प्रतिककाव्यशास्त्रीयग्रन्थानां विशिष्टोल्लेखार्हा प्रवणतैषा वर्तते यदर्वाञ्चः आचार्याः काव्यशास्त्रीयतत्त्वलक्षणानि विलिख्य स्वरचितोदाहरणेषु निजाश्रयदातुर्गुणकीर्तनं कुर्वन्तः समासन्। केचिच्च ग्रन्थस्य नामकरणमपि विहितवन्त आश्रयदातुर्नामानुसारेण। उदाहरणानि तावत्-

१. नञ्जराजयशोभूषणम्

२. रामवर्मयशोभूषणम्

३. गोदवर्मयशोभूषणम्

४. रघुनाथभूपालीयश्चेति

पञ्चमतः, साम्प्रतिककाव्यशास्त्रग्रन्थेषु चन्द्रालोककुवलयानन्दग्रन्थयोः प्रभावः सर्वाधिकतया प्रपतितः।

षष्ठतः, केचिदाचार्याः महाकाव्यादिवाङ्माध्यमेन काव्यशास्त्रीयतत्त्वानां व्याख्यानं कृतवन्तः। यथा मन्दारमरन्दचम्पूः, रामोदयं महाकाव्यम् ,रामसुन्दरमहाकाव्यञ्चेति।

सप्तमतः, दृश्यते जगन्नाथोत्तरवर्तियुगे अलङ्कारनाट्यशास्त्रयोर्भिन्न-धारयोर्द्वयोरेकस्मिन्नेव ग्रन्थे समाकलनम्। कृष्णकवेर्मन्दारमरन्दचम्पूरित्यलङ्कार-ग्रन्थेऽलङ्कारशास्त्रं नाट्यशास्त्रञ्चातिरिच्य छन्दःशास्त्रं कविशिक्षा च समीक्ष्येते।

अष्टमतः, काव्यमीमांसा-शृङ्गारप्रकाशादीनां शैल्या सरलभाषया कृत्स्नविषयमात्मसात्कृतवतः कस्यचित्प्रस्थानग्रन्थस्य ग्रन्थनं सङ्कलनं वा भवेदिति शिवम्।

✦✦✦

# भारतीयकाव्यव्याकरणशास्त्रयोः लक्षणास्वरूपविचारः

शम्पा-पालः*

## ०.भूमिका

भाषया भाषते जगदिदम्। भाषामृते लोकोऽन्धकारमयः सम्पद्येतेति निश्चप्रचम्। भाषापरनामधेयं शब्दाह्वयं ज्योतिः सावित्रं ज्योतिरिव लोकयात्रायामस्मान् उपकरोति। परं कोऽयं शब्द इति चेदुच्यते महाभाष्यकृता-

"येनोच्चारितेन सास्नालाङ्गुलककुदखुरविषाणिनां सम्प्रत्ययो जायते स शब्दः"[१]।इति। अर्थात् 'उच्चार्यमाणः शब्दः सम्प्रत्यायको भवति, न सम्प्रतीयमानः' इति महाभाष्योक्तेः वचनादेव शब्दार्थप्रतीतिर्भवति। सुप्राचीनकालादेव भारतवर्षे शब्दं तदर्थं तयोः सम्बन्धञ्चाश्रित्य विविधा वादाः प्रादुरभवन्। आलंकारिकाः दार्शनिकाश्च स्वस्वमतानि व्याकृतवन्तः विषयेऽस्मिन्। परमेतत्सत्यं यन्नास्ति मतसाम्यं विद्यते उक्तविषयेषु। परन्तु अस्मिन् विषये नास्ति संशयः तेषु यत् शक्तिं विहाय शब्दोऽर्थं बोधयितुं नालम्। शक्त्यैव शब्दः स्वाभीष्टमर्थं प्रद्योतयति। शक्त्यभावे घोरे प्रयत्नेऽपि शब्दार्थप्रतीतिर्न स्यात्। तदुक्तं भर्तृहरिणा-

"विषयत्वमापन्नैः शब्दैर्नार्थः प्रकाश्यते।
न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः॥"[२] इति।

केवलं प्राप्तविषयाः शब्दा एवार्थबोधने क्षमाः। तथाहि महाभाष्ये भाषितम्– 'शब्द उपलब्धोऽर्थं प्रत्याययति न सत्तामात्रेण॥' इति। परं का नाम शक्तिरिति जिज्ञासायामाह नागेशः-

"शब्दार्थयोस्तादात्म्यमेव शक्तिः" इति।

यद्व्यापारद्वारा वाचकादीनां वाच्यादर्थबोधनं सम्भवति सैव वृत्तिः। 'शाब्दबोधहेतुपदार्थोप-स्थित्यनुकूलपदपदार्थयोः सम्बन्धो वृत्तिरि'ति तत्त्वचिन्तामणौ शब्दखण्डे गङ्गेशोपाध्यायाः। शक्तिर्हि वृत्तेः पर्यायवाचिका। अस्या लक्षणं क्रियते– 'इदं पदमिममर्थं बोधयेत्', 'अस्मात् शब्दादयमर्थो

---

*आंशिककालीनाध्यापिका, नवद्वीप-विद्यासागर-महाविद्यालये,पश्चिमवङ्गेषु।

[१]महाभाष्यम् (सङ्घमित्रसेनगुप्तसम्पादितमहाभाष्यम् , पृ.९)

[२]वाक्यपदीयम्(कारिका-५६)

बोद्धव्यः’ चेत्येवं प्रकारः सङ्केतः खलु शक्तिः। सा चा वाच्यवाचकरूपा।

## १. शक्तेः प्रकारभेदः

शक्तिरियं कतिविधा इत्येवंविषये विप्रतिपत्तिर्विद्यते विदुषाम्। केचिच्छक्तेरेकविधत्वं, केचिद्वा त्रिविधत्वं केचन विद्वांसश्चतुर्विधत्वं स्वीकुर्वन्ति। मुकुलभट्टमहिमभट्टादीनामेकवृत्तिवादिनां नये- केवलयाभिधावृत्त्या एव समेषामर्थानां सम्प्रत्ययो जायते। अतो नास्ति प्रयोजनं लक्षणादिवृत्तिभिः। परं मुकुलभट्टमहिमभट्टयोः पार्थक्यमत्रैव यन्मुकुलेन लक्षणाया अस्तित्वं स्वीकुर्वता तस्या अभिधायामन्तर्भावोऽङ्गीकृतः। अपरतो महिमभट्टेन व्यक्तिविवेके लक्षणास्तित्वं न स्वीकृतम्। तथाहि कान्तिचन्द्रपाण्डेमहाभागेनोक्तम्– “Mahima Bhatta includes the secondety meaning (Gauna or kaksanika Artha)in the inferalde (Anumeya). Accordingly, he denies the second power of words, technically called Laksana.”[३] इति।

नागेशभट्टेन ‘परमलघुमञ्जूषायां’ पृथक्तया लक्षणा व्यञ्जना चेति शक्ती स्वीक्रियेते परं चैकस्याः शक्तेरेव प्रकारत्वेन। तथाह्युदितम्-

“तथाहि शक्तिर्द्विविधा- प्रसिद्धा अप्रसिद्धा च। आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम्। सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम्। तत्र गङ्गादिपदानां प्रवाहादौ प्रसिद्धा शक्तिः, तीरादौ चाप्रसिद्धेति।” इति।

अभिधालक्षणाव्यञ्जनाभ्योऽतिरिक्ता वाक्यार्थस्य वृत्तिरस्ति- सा च तात्पर्यवृत्तिरेवेति केचित्। तदुक्तं मम्मटेन- ‘तात्पर्यार्थोऽपि केषुचित् ’ इति। तात्पर्यवृत्तिमवलम्ब्य विवदमानं वादद्वितयं दृश्यते अभिहितान्वयवादोऽन्विताभिधानवादश्चेति। ‘अभिहितानां स्वस्ववृत्त्या पदैरुपस्थापितानामर्थानामन्वय इति ये वदन्ति तेऽभिहितान्वयवादिनः’ इति परं ‘पदानि अन्वितानि भूत्वा पश्चाद् विशिष्टमर्थं कथयन्तीति ये वदन्ति तेऽन्विताभिधानवादिनः’[४] इति। विश्वनाथेन साहित्यदर्पणे द्वितीयपरिच्छेदे अभिहितान्वयवादिनां मतमुपस्थापितम्—

“तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।

---

[३]Indian Aesthetics(पृ-३०२)

[४]काव्यप्रकाशः(द्वितीयः)

तात्पर्यार्थं तदर्थञ्च वाक्यं तद्बोधकं परे[५]"॥इति। अभिधा लक्षणा चेति वृत्तिद्वयमङ्गीकृतवन्तो नैयायिकाः। तदुक्तं गदाधरभट्टाचार्येण- 'वृत्तिश्च द्विविधा-शक्तिर्लक्षणा च' इति। तेषां नये अभिधाया विलक्षणस्तृतीयोऽर्थोऽनुमित्या चोपलभ्यते। परं तदर्थं नास्ति प्रयोजनं व्यञ्जनवृत्तिस्वीकारेण। मीमांसकानां मते वृत्तिस्त्रिविधा– अभिधा लक्षणा गौणी चेति। वैदान्तिकेषु केचित् मीमांसकवद् वृत्तित्रितयमूरीचक्रुः, परं केचन वृत्तिद्वयम्। ('पदार्थौ द्विविधः- शक्यो लक्ष्यश्चेति।' वेदान्तपरिभाषा)।

आलङ्कारिकेष्वपि मतभिन्नं विद्यते। आचार्यो धनिकस्तस्य 'काव्यनिर्णय' इत्याख्ये ग्रन्थे व्यञ्जनावृत्तिं न स्वीकृत्य व्यावृतवान् यदभिधालक्षणातिरिक्तस्य विद्यमानस्य रसाद्यर्थस्य ज्ञानं केवलया तात्पर्यवृत्त्यैव भवति। तन्मते– तात्पर्यवृत्तेर्नास्ति कोऽपि परिसरः। प्रयोजनानुसारं तात्पर्यवृत्तिर्यं कमप्यर्थं प्रकाशयितुं क्षमा-

"यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम्॥" इति।

आनन्दवर्धनाद्यालङ्कारिकाणां राद्धान्तोऽयं यदभिधालक्षणातिरिक्ते स्थले सर्वेऽर्था व्यञ्जनावृत्त्यैव प्रतीयन्ते। परं मम्मटविश्वनाथदिभिः आलङ्कारिकैः वृत्तिचतुष्टयमङ्गीकृतम् -

"अभिधातात्पर्यलक्षणात्मकव्यापारत्रयातिवर्त्ती ध्वननादिव्यापारोऽनपह्नवनीय एव।" इति काव्यप्रकाशकृत्।

साहित्यदर्पणे भणितम्–

"वृत्तीनां विश्रान्तेरभिधातात्पर्यलक्षणानाम्।
अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम्॥" इति। आङ्गलसाहित्येऽपि 'Primary Sense' इत्यनेनाभिधा तथा च 'Secondary Sense' इत्यनेन लक्षणावबुध्यते। लेभि-ओयेबलिमहाभागः शब्दस्यार्थत्रयं स्वीकृतवान्– "The one crucial question in all expression is its special property, first of sense, that in which it is used, then of meaning as the intention of the user, and, most far reaching and momentous of all, of implication, of ultimate significance.[६]" इति।

---

[५]साहित्यदर्पणम्(पृ.१६)

[६]Signifies and Language(पृ-९)

# २. लक्षणाविचारः

## २.१काव्यिकानां नये

वृत्तिषु लक्षणास्वरूपविचारोऽस्मदालोच्यविषयः। शब्दस्य शक्तिभिन्नं लक्षणेति वृत्त्यन्तरं वर्तते इति आमनन्ति भूयिष्ठा वादिनः। पदस्य शक्तिलभ्येन शक्यार्थेन समं चान्यपदार्थस्य सम्बन्धो लक्षणा। सा च शक्यार्थसम्बन्धः।

परमालङ्कारिकाणां नयो वैयाकरणनैयायिकाभ्यां किञ्चिद्भिद्यते। लक्षणायां तत्त्वत्रितयमपेक्षते– १) मुख्यार्थस्य बाधः स्यात् २) मुख्यार्थसम्बद्धोऽर्थः प्रतीयते ३) रूढिः प्रयोजनविशेषो वा तत्र कारणं स्याच्चेति।

तथाहि लक्षणा तावत्संज्ञिता विश्वनाथेन–

"मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।

रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता॥ [7]" इति।

अर्थात् 'मुख्यार्थः' मुखमिव मुख्यः, प्राथमिकप्रतीतिविषयो वाचार्थ इत्यर्थः। अस्य 'बाधे' कुतोऽपि प्रतिबन्धे सति, यद्वा अनुपपत्तिग्रहे। तद्यथा- 'कूपे गर्गकूलमि'त्युदाहरणे प्रवाहादिरूपस्य शक्यार्थस्य घोषाद्यधिकरणत्वाद्यसम्भवरूपे बाधे सति। तात्पर्यानुपपत्तिरेव हि लक्षणाबीजम्। 'तद्युक्तः' तस्य प्रत्यक्षादिप्रमाणेन बाधितस्य मुख्यार्थस्य योग इत्यर्थः। अर्थात् साक्षात्सम्बन्ध इत्यर्थः। 'रूढेः' नाम प्रसिद्धेः। तद्यथा- 'कलिङ्गः साहसिकः' इत्यादौ कलिङ्गस्या साहसासम्भवः। अतः कलिङ्गशब्दस्य तद्देशीये जने लक्षणा, एतादृशस्य प्रयोगस्यातिप्रसिद्धत्वात्। 'वा' इति विकल्पार्थकः। अतो 'गङ्गायां घोषः' इत्यादौ लक्षणाप्रयोजनं हि शैत्यपावनत्वादिप्रतीतिरूपस्य व्यङ्ग्यस्य प्रतिपादनम्। अर्थाद् यया वृत्त्या 'अन्योऽर्थः' मुख्यभिन्नोऽर्थान्तरं तटादिरूपं 'प्रतीयते' बुध्यते सा वृत्तिर्लक्षणेत्युच्यते। अतोऽभिधेयार्थान्वयानुपपत्तिग्रहत्वे सति रूढिप्रयोजनान्यतरप्रयोज्यमुख्यार्थसम्बन्धवत्तदतिरिक्तार्थप्रतिपादकशक्तित्वं लक्षणात्वम्।

लक्षणेयं शब्दस्यार्पिता आरोपिता मुख्यार्थव्यवहितलक्ष्यार्थविषयकत्वाद् अर्वाचीनैः शब्देषु कल्पिता इत्यर्थः। तथाहि विश्वनाथेन वृत्तौ भणितम्- 'शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम' इति। एतद्धि तेन वैयाकरणनैयायिकयोर्मतमाश्रित्योक्तम्।

---

[7]साहित्यदर्पणम्(द्वितीयः )

मम्मटेन तदीये काव्यप्रकाशे लक्षणालक्षणं लक्षितम्-

"मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया॥[८]" इति।

'कर्मणि कुशलः' इत्यादौ दर्भग्रहणादेरयोगाद् 'गङ्गायां घोषः' इत्यादौ च गङ्गादीनां जलप्रवाहरूपस्य मुख्यार्थस्य बाधे विवेचकत्वादौ सामीप्यादौ च मुख्यार्थसम्बन्धे रूढितः प्रसिद्धेस्तथा शीतत्वपावनत्वादिबोधनप्रयोजनाद् यया शक्त्यान्यार्थस्य मुख्यार्थभिन्नस्य प्रतीतिर्भवति सारोपिता क्रिया शक्तिर्वा व्यापारो लक्षणेत्युच्यते।

## २.२ वैयाकरणमते लक्षणा

नागेशेन लघुमञ्जूषायां लक्षणास्वरूपविषये बहूनि मतानि उपस्थापितानि। तत्र तेनोपस्थापितम्– "किञ्च अन्वयाद्यनुपपत्तिज्ञानपूर्वकं शक्यत्वेन गृहीतार्थसम्बन्धज्ञानेन उद्बुद्धशक्तिसंस्कारतो बोधे लक्षणेति व्यवहारात्"[९]। गङ्गायां घोष इत्यादौ अन्वयानुपपत्तिसन्धानात्परं शक्तिलब्धार्थस्य प्रवाहादेः सामीप्यादिसम्बन्धः स्मर्यते, तत्सम्बन्धेन लक्ष्यार्थतीरादिविषयकसंस्कार उद्बोध्यते, ततः तीरादिबोधो जायते। यो लक्ष्यार्थसंस्कार एवं प्रकारेण उद्बुद्धो भवति, तस्यैव लक्षणेति परामर्शः। शक्तिलब्धोऽर्थः शक्यार्थ इति उच्यते। स च वाच्यार्थोऽभिधेयार्थो वा वक्तुं शक्यते नागेशेन। अस्या लक्षणाया बीजं तावदन्वयानुपपत्तिप्रतिसन्धानमिति। किन्तु न हि अन्ययानुपपत्तिस्तात्पर्यानुपपत्तिरेव लक्षणाया बीजमिति नागेशेन लघुमञ्जुषायां स्पष्टीकृतम्। अन्यथा गङ्गायां घोष इत्यादौ घोषादिपदे मकरादिलक्षणापत्तिः, तावतापि अन्वयानुपपत्तिविरहात्। तस्मात् लक्षणा तात्पर्य्यानुपपत्तिं परिहर्तुं क्रियते। यदि शैत्यपावनादौ तात्पर्यं प्रकरणाद् अवगम्यते, तर्हि गङ्गापदे लक्षणा। विश्वनाथादिभिः नैयायिकैः तात्पर्यानुपपत्तेः लक्षणाबीजत्वं स्वीकृतम्। विश्वनाथेनोक्तम्—'लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपत्तितः'[१०] इति। अन्नम्भट्टेनाप्युक्तम् 'शक्यसम्बन्धो लक्षणेति'। 'गङ्गायां घोष' इत्यादौ

[८]काव्यप्रकाशः(द्वितीयः)

[९]लघुमञ्जुषा, (पत्राङ्कः-११६)

[१०]भाषापरिच्छेदः, (कारिका-८२)

गङ्गापदस्य शक्यार्थे भगीरथरथखातावच्छिन्नजलप्रवाहरूपे आभीरपल्लीरूपस्य घोषस्य अन्ययानुपपत्तिः तात्पर्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते, तत्र लक्षणया तीरस्य बोधः। सा च लक्षणा शक्यसम्बन्धरूपा। एतेन स्वबोध्यसम्बन्धो लक्षणेति मीमांसामतं निरस्तं वेदितव्यम्। सा लक्षणा द्विविधा जहत्स्वार्था अजहत्स्वार्था चेति। तत्राद्यामुपपादयति– प्रवाहरूप-शक्यार्थ-सम्बन्धस्य तीरे गृहीतत्वात् तीरस्य स्मरणम्। तादृशात्स्मरणात् गङ्गातीर-वृत्तिर्घोष इत्याकारक-शाब्द-बोधो जायते। 'यष्टीः प्रवेशय' इत्यादौ यष्टीनां प्रवेशयोग्यत्वात् प्रवेशनकर्मत्वेनान्वयो निर्बाध एवेति न काप्यस्त्यनुपपत्तिरनन्वयस्य किन्तु भोजनतात्पर्यानुपपत्तेः तदुपपत्तिनिर्वाहार्थं यष्टिशब्दस्य यष्टिधररूपार्थे लक्षणा स्वीक्रियते। एवं 'काकेभ्यो दधि रक्ष्यतामि'त्यादौ काकपदस्य दध्युपघातके लक्षणा, सर्वतो दधिरक्षायाः तात्पर्यविषयत्वात्। नागेशेन परमलघुमञ्जुषायां न्यायनयः समुद्धृतः–'स्वशक्यसम्बन्धो लक्षणेति [११]'इति। शब्दशक्तिप्रकाशिकाकृज्जगदीशो लक्षणास्वरूपस्य शक्यार्थसम्बन्धत्वं न साक्षात्तयाभिधत्ते, परं लक्षकपदनिरूपणचिकीर्षायां लक्षणालक्षणं व्याख्यातवान्–

"यादृशार्थस्य सम्बन्धवति शक्तं तु यद् भवेत्।
तत्र तल्लक्षकं नाम तच्छक्तिविधुरं यदि"[१२]॥इति।

अर्थे यादृशानां सम्बन्धवति यन्नाम संकेतितं तदेव तादृशार्थे लक्षकं, यदि तादृशार्थे शक्तिशून्यं तत्पदं भवेदिति रीत्या प्रपञ्चितम्।

नागेशेन मीमांसामतमुपस्थापितम्–'केचित्तु ज्ञाप्यसम्बन्धेनोद्बुद्धशक्तिसंस्कारतो बोधे लक्षणा'[१३] इति। ज्ञाप्यमित्यनेन बोध्यसामान्यमुच्यते, न तु शक्यमात्रम्। मीमांसानये वाक्यार्थो लक्षणालभ्यः। शक्यसम्बन्धं परित्यज्य सामान्येन ज्ञाप्यसम्बन्ध एव लक्षणेति उक्तम्। गभीरायां नद्यां घोषः, चित्रगुः इत्याद्यनुरोधात् समुदायस्य लक्षणा स्वीकार्या। शक्यार्थसम्बन्धस्य लक्षणात्वे पदस्यैव लक्षणा स्यात्, न तु समुदायस्य। प्रभाकरशिष्येण शालिकनाथेन निरूपितं लक्षणास्वरूपम–

"वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः।

---

[११]परमलघुमञ्जुषा, (पत्राङ्कः-२४)

[१२]शब्दशक्तिप्रकाशिका, (कारिका-२४)

[१३]भाट्टचिन्तामणिः, तर्कपादः(पत्राङ्कः-६३)

तत्सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते"[१४]॥ इति।

वाक्यार्थो लक्षणालभ्य इति प्रभाकरविरुद्धं मतम्। वस्तुतः, अन्वयानुपपत्तेः वाच्यसम्बन्धवशाल्लक्षणेति।

नागेशः पुनः मतान्तरमुपस्थापयति– "परे तु, आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे वा लक्षणेति व्यवहारः"[१५]इति। अर्थाल्लक्षणा नाम वृत्त्यन्तरं प्रकृत्या नास्तीति मतं संसूचितम्।

लक्षणा द्विधा विभक्ता– गौणी शुद्धा चेति। नागेशेन उभयोः लक्षणयोः लक्षणमुक्तम्। प्रकारान्तरेण लक्षणा त्रिविधा–जहत्स्वार्था अजहत्स्वार्था जहदजहल्लक्षणा चेति।

परिशेषे वक्तव्यं यत् पूर्वमीमांसायामुत्तरमीमांसायाञ्च पृथग्वृत्तित्वेन स्वीकृता गौणी अपि न्यायनये लक्षणायामन्तर्भवति। अतः पृथग्वृत्तित्वं तिरस्कृतं तत्र तस्या अपि। तथाहि शब्दशक्तिप्रकाशिकायामुक्तम्–

"जहत्स्वार्थाजहत्स्वार्थनिरूढाधुनिकादिकाः।
लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा"[१६]॥ इति।

अस्याः कारिकायाः व्याख्यायामुक्तं तेन, 'आदिना शक्यसदृशत्वप्रकारेण बोधकतया गौण्युपगृह्यते[१७]' इति। किञ्च, तर्कामृते भणितम्– "गौणीवृत्तिरपि लक्षणैव, यथाग्निर्माणवकः, गौर्वाहीकः। अत्र लक्षणयाग्न्यादिसादृश्यं प्रतीयते"।इति। वेदान्तपरिभाषायां गौणी न पृथग्वृत्तिः, सा लक्षणाविशेषः इत्युक्तम्। मधुसूदनसरस्वतीप्रमुखाः केचित्तात्त्विकाः गौणीं लक्षणातः स्वतन्त्रतया वृत्तित्वेन अङ्गीकुर्वन्ति। वस्तुतः 'गौण्यसम्भवात्'[१८], 'गौणश्चेन्नात्मशब्दात्'[१९] चेत्यादिषु शारीरकसूत्रेषु तत्तद्भाष्यादिषु च गौणीशब्दस्य उपचारशब्दस्य च प्रयोगो दरीदृश्यते। परं सा गौणी उपचारो वा लक्षणातो भिद्यते न वेति न तत्र स्पष्टमभिहितम्।

✦✦✦

[१४]प्रकरणपञ्चिका, (पत्राङ्कः-३९८-९९)

[१५]लघुमञ्जुषा, (पत्राङ्कः-१३३)

[१६]शब्दशक्तिप्रकाशिका (द्वितीयः खण्डः)

[१७]तत्रैव

[१८]ब्रह्मसूत्रशङ्करभाष्यम्(२/३/३)

[१९]तत्रैव(१/१/६)

# परिशीलितग्रन्थसूची


1. कारिकावली, न्यायसिद्धान्तमुक्तावली, पण्डितश्रीकृष्णवल्लभाचार्यः, चौखाम्बासंस्कृतसंस्थान, वाराणसी, २००६।
2. काव्यप्रकाशः, मम्मटः, भाण्डारकर ओरियेण्टाल रिसार्च इन् स्टिटिउट, पुना, १९६५।
3. पतञ्जलिकृतं महाभाष्यम्, संघमित्रासेनगुप्ता, संस्कृतपुस्तकभाण्डार ओ श्रीयुक्ता कल्याणीदासगुप्ता, कोलकाता, १४०७(वङ्गाब्दः)।
4. परमलघुमञ्जुषा, पण्डितवंशीधरमिश्रः, चौखाम्वा विद्याभवनम्, वाराणसी।
5. वाक्यपदीय, भर्त्तृहरि, (सम्पा) श्रीविष्णुपदभट्टार्य्य, पश्चिमवङ्ग राज्यपुस्तक पर्षत्, कोलकाता।
6. भाषापरिच्छेद, विश्वनाथ न्यायपञ्चानन, (सम्पा) गोपालचन्द्रमुखोपाध्याय, वर्धमानविश्वविद्यालय।
7. शब्दार्थतत्त्व, रवीन्द्रकुमारभट्टाचार्य, प्रवर्त्तक पावलिसार्स, कलिकाता।
8. साहित्यदर्पण, विश्वनाथकविराज, (सम्पा) विमलाकान्तमुखोपाध्याय, पुस्तकश्री, कोलकाता।

# संस्कृतस्तोत्रसाहित्ये ब्रह्मचारिणो मेधाचैतन्यस्य योगदानम्

नारायणदाशः*

## ०. भूमिका

त्वदीयाङ्घ्रिद्वन्द्वक्षरितमकरन्दं प्रतिदिशं
सदा पायं पायं कलितभवभीतिं प्रशमयन्।
भजन्साम्यानन्दं विमलहृदयो याति परमां
जनानां सङ्घोऽयं निखिलभुवि शान्तिं मुहुरहो॥५॥

इत्यादिपुरातनस्तोत्रच्छायासंवलितैः श्लोकैः विशेषतः पुष्पदन्ताचार्यस्य शिवमहिम्नस्तोत्रच्छायया अन्यच्छायासंवलितैः श्लोकैः स्वगुरोः स्तवनेन लेखनं प्रारब्धवान् दण्डिस्वामी दीनानाथत्रिपाठी। ब्रह्मचर्याश्रमे मेधाचैतन्यनाम्ना प्रसिद्धोऽयं ब्रह्मचारी संस्कृतशास्त्रेषु कृतभूरिपरिश्रमः अधुना दक्षिणेश्वरस्थ-रामकृष्णसङ्घस्य आद्यापीठाधिपतिः वर्तते। अस्य स्तोत्रैः सह गद्यलेखनमपि प्रसिद्ध्यति। अस्य कृतीनां संक्षिप्ता परिचितिरेवात्र विधीयते।

**१.मधुसूदनसरस्वतीचरितम्–** १५३९ ईसवीयसंवत्सरे लब्धजन्मनो मधुसूदन-सरस्वतीवर्यस्य जीवनचरितमुपजीव्य सुन्दरं गद्यविधया लिखितवान् श्रीत्रिपाठी मधुसूदनसरस्वतीचरितमिति ग्रन्थम्। षष्टिपुटात्मकोऽयं ग्रन्थः केन्द्रसाहित्य-अकादम्या १९९४तमे ईसवीयसंवत्सरे प्रकाशितो वर्तते। चतुर्विंशति-भागेषु विभक्तेऽस्मिन् ग्रन्थे- वंशपरिचयः, जन्मकालः पितृपरिचयश्च, वासभूमेर्वर्णनम्, नदीमातृकः फरीदपुरः, कैशोरवृत्तम्, नवद्वीपस्य पथि, वाराणस्यां वेदान्ताध्ययनम्, वेदान्तप्रचारः, वैराग्यपरीक्षा, योगबलेन शरीरत्याग इत्यादिविषयाः सन्ति। श्रीशङ्कराचार्यस्य नमनेन नमस्कारात्मकमङ्गलश्लोकेन ग्रन्थकारो ग्रन्थारम्भं करोति–

नत्वाऽद्वैतपथाम्भोजभास्करं शङ्करं गुरुं
तद्दर्शितसृतिव्याख्याकृतो नौमि गुरून् सदा।

---

*अध्यापकः, संस्कृतविभागे, रामकृष्णमिशन्-स्वयंशासितमहाविद्यालयस्य नरेन्द्रपुरस्थस्य, कलिकातायां, पश्चिमवङ्गेषु

श्रीविश्वेश्वरशिष्यस्य मधुसूदनवाक्पतेः
नत्वा पदद्वयं कुर्वे तच्चरित्रोपवर्णनम्॥[1]॥

मधुसूदनस्य वासभूमेर्वर्णनमेवं विदधाति कविः–

"पुण्यतोया भागीरथी सागरसङ्गमाय प्रवहन्ती वङ्गदेशम् आगत्य द्विधा विभक्ता। तयोरेका मुर्शिदावादादिमण्डलपार्श्वतो गत्वा चब्बिशपरगणा-कलिकतामण्डलयोरन्तरा समुद्रं सङ्गता। अपरा च पद्मेति नामधेया बहुशाखा सती ब्रह्मपुत्रेण मिलिता चट्टलप्रदेशपार्श्वतो गत्वा समुद्रं सम्प्रविष्टा। फरिदपुर-मण्डलान्तर्गतकोटालिपाडापरगणाया उनसियाग्रामस्तु त्रिकोणाकारो बहुनदीविशिष्टसमतलभूमिरूपेण शस्यश्यामलो मनोहरः, पूगपनसजम्बूखर्जूरतालरसालनारिकेलादिफलवृक्षैः सुशोभनो, जपापराजिताशतपत्रशेफालिकामल्लिकाचम्पककामिन्यादिपुष्पवृक्षसमन्वितो, वापीकूपतडागादिजलाशयबहुलो, हंससारसादिपक्षिकुल-नादैर्भ्रमरगुञ्जनैः श्रुतिसुखावहशब्दैः पूरितः छात्राणां वेदस्मृतिपुराणेतिहासादि शास्त्रोच्चारणशब्दैरहरहः पवित्रीकृतः सन् जनानां मुदमावहति स्म।"

एवं सरलतरलगद्यनिर्माणेन चरितग्रन्थोऽयं सुखपाठ्यो वर्तते।

**२.श्रीश्रीरामकृष्णस्तोत्रम्**– स्वामिना अपूर्वानन्देन सम्पादितात् "वेदमूर्तिरामकृष्णः" इति ग्रन्थात् ब्रह्मचारिणो मेधाचैतन्यस्य नाम्ना स्तोत्रद्वयं लभ्यते। यथा- श्रीश्रीरामकृष्णस्तोत्रम्[2], श्रीसारदाषट्कम्[3]। श्रीश्रीरामकृष्णस्तोत्रमित्यत्र एकादशशिखरिण्यः, एकम् अनुष्टुप् च विलसन्ति। शिखरिण्या गेयत्वं स्तोत्रस्य महत्त्व नितरां वर्धयति। यथा–

जगज्जातं त्यक्तं हिमगिरिसुतापादकमले
शरीराद्याः प्राणा बलय इव येनार्पणमगुः।
त्रिवर्गो यच्छ्रद्धाविमलगुरुभक्त्या हि सुलभो

---

[1]मधुसूदनसरस्वतीचरितम् पृ.७

[2]वेदमूर्तिरामकृष्णः पृ.२६२

[3]तत्रैव पृ.२७५

नुमो रामकृष्णं सुरनुतपदं भेदरहितम्॥ १॥
स्वयं त्यक्तं प्रोक्तं हृदयकरशाखोल्लिखनतः
पुरा रामात्कृष्णः समभवदनन्यो न हि परः।
इदानीमायान्तं नयनविषयत्वं जनिभृतां
प्रविष्टो देहेऽस्मिन्निति कनककामातिगतया॥ २॥

अग्रे साधको भक्तो गुरुवरेण्यमद्वैतं शान्तं मायारहितं चिदानन्दं शुद्धं प्रेमवशगमवतारपुरुषं मनुते–

यदद्वैतं शान्तं सततमघमायाविरहितं
चिदानन्दं शुद्धं प्रकृतिसहितं प्रेमवशगम्।
त्वमेवाविर्भूतं करणविषये दुर्लभतरं
जगज्जीवैः क्रीडन्महदमितवीर्यं रसतमम्॥ ३॥

गुरोराराध्यामित्थं निरूपयति स्तोता–

ध्रुवा मूर्तिर्गङ्गातटपरिगता या गुणमयी
गुणातीतापि स्यान्नतु लसति दक्षेश्वरमणिः।
व्रजन्ती गायन्ती भवतरणिमातुर्गुणकथाः
सदा स्वान्ते सा मे स्फुरतु रमणीया द्युतिमयी॥ ६॥

पदे पदे अत्र पुरातनस्तोत्राणां छाया लक्ष्यते। पुष्पदन्ताचार्यस्य शिवमहिम्नस्तोत्रस्य अन्यच्छायासंवलितानि तस्य कानिचित् पदानि यथा–

त्वदीयाङ्घ्रिद्वन्द्वक्षरितमकरन्दं प्रतिदिशं
सदा पायं पायं कलितभवभीतिं प्रशमयन्।
भजन्साम्यानन्दं विमलहृदयो याति परमां
जनानां सङ्घोऽयं निखिलभुवि शान्तिं मुहुरहो॥ ५॥

अग्रे गुरोर्गुणान्गणयति शिष्यः–

समुद्धर्तुं लोकान् स्वयमधिगतिस्ते प्रतिगृहं
क्व देवेन्द्रादीनां वसति भवनं क्वेह शशधृक्।
गुणानां साधूनां त्वयि निवसनं भो गुणधर
स्मरामो नित्यानामपि निरभिमानं निरुपमम्॥ ९॥

शिशुस्वभाववान् अपि स जीवानां नियन्ता, सर्वेषु स्वतन्त्रः, विश्वस्य अभिज्ञाता इति अभिप्रैति स्तोता–

नियन्ता जीवानामपि शिशुवदेवानुनटसि

स्वतन्त्रः सर्वेषामिव चरसि देवीपरगतः।
अभिज्ञाता विश्वं भणसि ननु मूर्खाभिध इति
प्रियां ते जानीमो निजसकलगुप्तिं नटवर॥१०॥

अन्ततो गत्वा तस्मै रामरूपाय कृष्णरूपाय सर्वदेवस्वरूपाय परमहंसाय यतये प्रणतिततिं विज्ञापयति–

नमो रामैक्यायामितमधुरदेवीमयतनू-
भृते कृष्णैक्याय श्रुतपरमहंसाय यतये।
नमश्चन्द्रामण्याः प्रियतनयदेवाय गतये
नमः सर्वस्वाय प्रणयिखुदिरामस्य मणये॥११॥

अन्ते अनुष्टुभा स्तोत्रार्पणं करोति। यथा–

इयं स्तुतिकथा पूजा रामकृष्णे परे गुरौ।
अर्पिता तेन देवेशः प्रीयतां परमेश्वरः॥१२॥

**३.श्रीसारदाषद्कम्**– यथानाम अत्र मालिनीछन्दसा षट् श्लोकाः सन्ति, यत्र स्तोता गुरुपत्न्या लोकोत्तरत्वं वर्णयति।

धवलवसनवेषा मूर्तकारुण्यदेहा
सुरनरमुनिवन्द्या रामकृष्णार्चिताद्या।
सकलगुणयुता नो वेष्टिताङ्गा सलज्जा
जननमरणभङ्गा सारदा पातु दिव्या॥१॥
विमलगगनशुद्धा सर्वलोकार्थचिन्ता
विगतविषमदृष्टिश्चिन्मयी शान्तिदात्री।
त्रिभुवनजनधात्री मङ्गला मर्त्यभूमा–
ववतरति परेशे स्वेच्छयाविर्भवन्ती॥२॥

अग्रे कविः मार्जनीहस्तामपि तां विश्वविधात्रीं कालिकां विश्वहन्त्रीं स्व्यकरोत् , यथा स्वीकृतवान् स्वयं गुरुदेवः–

त्रिपुरदहनकान्ता रामचन्द्रस्य कन्या
निखिलभुवनकर्त्री मार्जनीहस्तमुष्टिः।
भवनिगडविमुक्तिर्याऽद्य माया विमुग्धा
नरपतिगणशास्त्री दैन्यदुःखे धरित्री॥३॥
प्रलयसमयघोरा रोषसंघातदेहा

स्तनितभयविधात्री कालिका विश्वहर्त्री।
अमरनिकरवन्द्या देवदेवोरुवासा
नटनहसनलास्या सारदा भिन्नरूपा॥४॥

कदा तां दशभुजां गुहगणपतिमातरं दक्षकन्यां स्मरति, कदा सकलभयनिवारिणीं राज्यलक्ष्मीं मनुते–

दशभुजदशशास्त्रा दिव्यमोदा सुहास्या
गुहगणपतिमाता दक्षकन्या शरण्या।
विनतभयविहन्त्री पार्वती राज्यलक्ष्मी-
र्विधिहरिभवपात्रं सारदा भूतधात्री॥५॥

श्रीशङ्कराचार्यस्य शैल्या मातृपदकमले सकलं विनिवेद्य जपनभजनहीनानामपि कुपुत्राणां त्राणाय प्रार्थयति–

जपनभजनहीना किं नु पुत्राः कुपुत्रा
व्यसनगणनियुक्ताः किं नु हेया जनन्या।
इति गुणततिशून्यान् सारदे त्रायतां नो
विदितसकलदोषा नैव माता जहाति॥६॥

**४.उपसंहृतिः**– उपसंहाररूपेण इदं वक्तुं शक्यते यत्, श्रीरामकृष्णमठस्य नवनिर्माणे, श्रीरामकृष्ण-सारदादेव्योः देवस्वरूपप्रदाने, अशेषभक्तजनानां भावनाराज्याधिकारे संस्कृतलिखितानां वेदसम्मितानां स्तोत्राणां प्रणयने स्वामिनो विवेकानन्दस्य स्वामिनो अभेदानन्दस्य मार्गे ब्रह्मचारिणो मेधाचैत्यन्यस्य अपूर्वं योगदानं जातम्। वयमस्य स्तोत्रेषु पुरातनप्रचलितप्रसिद्धस्तोत्राणां प्रभावं पश्यामः, यः खलु नवनिर्मितभक्तसमाजस्य मनःसु विश्वासजननस्य सरलतम उपायो भवेदिति अनुमिनुमः। एवमेव श्रीरामकृष्णतत्त्वस्य वैश्वकीकरणे ब्रह्मचारिणो मेधाचैत्यन्यस्य अनल्पं स्तोत्रसाहित्यमलमिति वक्तुं सुशकम्। सन्न्यासिनः कवेरन्तिमनतिः अस्माकीनप्रणतिपुष्पायितं सत् विलसतु अस्य गुरोः पादकमलयोः–

त्वमेव श्रीरामो मधुरिपुहरिर्गोपतनयः
स्वयं भूतश्चाद्यः परमपुरुषो नाथ रमण।
विवादं धर्माणां शमयितुमनाश्चिन्मयवपुः
प्रसन्नो लोकानां प्रकटितमकार्षीः पुनरिह॥

✦✦✦

# सुरभारतीसुधापिपासुः स्वामिविवेकानन्दः

पीताम्बरनिराला*

ॐ नमः श्रीयतिराजाय विवेकानन्दसूरये।
सच्चित्सुखस्वरूपाय स्वामिने तापहारिणे॥

सुप्राचीनकालाद् एवाद्यावधि विविधगीर्भिर्जेगीयते गीर्वाणवाण्या गरीयस्त्वम्। सुरभारतीसरणिम् अनुसरन् सुधीसङ्घः सुधोपमं प्रमारसस्वादं स्वादयितुं वेदार्णवं निर्मथ्य ससर्ज प्रज्ञानामृतकलशम्। तस्मादियं भारती ज्ञानपीयूषपिपासूनाम् एकशरणं, तां विना पुरुषार्थचतुष्टयावगत्यसम्भवात्। न केवलं पुरुषार्थचतुष्टयमपि तु कृतिष्वपि कवीनां काव्यरसः अमृतस्यन्दनीमारूढ एव स्फुरति। अस्या हृद्यत्वमनुपमत्वमनवद्यत्वञ्च प्रेक्ष्य एवं मन्यते यत् कालिदासमाघादिमनस्विनः कवयश्चारुत्वसम्पादने अचूचुरंश्चन्द्रमसोऽभिरामताम्। अतोऽमृतस्यन्दन्याः संस्कृतभाषाया लालित्यललितो माधुर्यापेतः सरसो ज्ञानगर्भो वचोनिचयो वीरसन्न्यासिनो विवेकानन्दस्वामिपादानपि दुर्भाषहर्षसागरे निमज्जयेयुरित्यत्र किमाश्चर्यम्?

आदावेव ज्ञेयं यत्संस्कृतमित्युक्ते अस्माकं मानसपटे कः पदार्थः प्रतीतिविषयतां प्रयाति। तत्रास्माभिः परिलक्ष्यते यत्संस्कृतमिति कथनमात्रमेव न केवलं संस्कृतभाषा तस्यां विरचितञ्च साहित्यजातमेव ज्ञानविषयतां लभतेऽपि तु तदतिरिच्यापि नैके विषया ज्ञानगोचरीभवन्ति। विषयोऽयमुदाहरणयोगेन विशद्य स्पष्टीक्रियते। तथाहि संस्कृतविद्वांसं वीक्ष्य कस्यचिन्न केवल“मयं संस्कृतमधिकृत्य पठती”ति बोधो जायतेऽपि तु तस्य “सामान्यतोऽयं साङ्गवेदं जानीयात्, स्मृतिशास्त्रं जानीयात्, काव्यं जानीयात्, दर्शनं जानीयादि”त्येवम्प्रकारकप्रतीतिरपि जायते, न चैतदितरासु भाषासु सम्भवति। किम्बहुना, लोके तावद् भारतीयदर्शनादिषु प्रतिपाद्यतत्त्वानामनुरूपं तत्त्वजातं तदितरेषु पाश्चात्त्यादिदर्शनेषु समुपलभ्यते चे“दिदं संस्कृते बहु प्राप्यते”, “इदं संस्कृते प्रागेवोक्तम्”, “संस्कृतेऽप्येतत् प्रतिपादितपूर्वमि”त्यादिरूपेण व्यवहारो न केवलमस्मादृशैः संस्कृतज्ञैरपि तु तद्भिन्नैरपि जनैर्भूयशः क्रियमाणो दृश्यते।

---

*अतिथि-अध्यापकः, संस्कृतविभागे, नैहाटिमहाविद्यालयस्य, उत्तरचब्बिशपरगनामण्डलस्थस्य, पश्चिमवङ्गेषु

एतावता पर्यालोचनमानस्य सन्दर्भस्यास्य तात्पर्यमेतद्यत्संस्कृतम् आङ्ग्ल-वङ्ग-हिन्द्यादिभाषावत् केवलं भाषात्वेन नास्माभिः परिगण्यते अपि तु संस्कृतं खलु जगति विद्यमानस्याखिलस्य ज्ञानराशेरनादिनिधनो निधिरित्येवमङ्गीक्रियते। तस्मादेव कारणात् यन्नास्ति संस्कृते तन्नास्ति भूमण्डले इति लोकमुखारूढा निरूढिर्विलसतितराम्। एतदेव कारणं यत्स्वामिविवेकानन्दपादाः पारमार्थिक-तत्त्वज्ञानप्रदायिनीं भारतगौरवविवर्धिनीं सनातनधर्मख्यापिनीं वाग्वैभवशालिनीं सुरभारतीं नवभारतोदयाय सनातनवैदिकधर्मस्य पुनःप्रतिष्ठायै च गरीयसीं मेनिरे।

भारतीयनवजागृतेर्नायकानां स्वामिविवेकानन्दचरणानां नये निखिलवाङ्मयेषु संस्कृतं तावद् भारतीयानाममोघमैतिह्यम्। तन्नये संस्कृत-शब्दानामुच्चारणमात्रमेव भारतीयाः स्वकीयं सुप्राचीनं सांस्कृतिकमैतिह्यं स्मारं स्मारं परां श्लाघामनुभवन्ति। तथाहि संस्कृतस्यैतादृशं माहात्म्यं यत्संस्कृतशब्दा उच्चारिताः सन्त एव भारतजातिं सम्मानितां कुर्वन्ति, तस्यै वीर्यं प्रददति, ओजस्विनी च सा सञ्जायते इति स्वामिचरणानां धीरासीत्। यद्यपि स्वामिपादैरगादि यद् आध्यात्मिकतत्त्वानि धर्मतत्त्वानि च लोकभाषाद्वारेणैव जनसाधारणेभ्य उपदेष्टव्यानि। तथाप्यस्मदीयप्राचीनम् ऐतिह्यं संस्कृतिर्वा ज्ञेया चेन्नूनं सर्वैरेव भारतीयैरध्येयं संस्कृतम्। एकत्र स्वामिपादैर्निगद्यते यन्मानवजातेरभ्युदयो विधेयश्चेदादौ तेभ्यः शिक्षा प्रदेया। अस्मच्छास्त्रेषु निखिलकुसंस्कारहन्तृ यज्ज्ञानजातं विद्यते तत्सर्वं तेभ्यः प्रचलितलोकभाषामाध्यमेनोपदेष्टव्यम्। किन्तु यौगपद्येन संस्कृतविषयिणी शिक्षापि प्रदेया। यतो हि संस्कृतशब्दानामुच्चारणमात्रमेव भारतीया आत्मनो गौरवान्वितान् मन्यन्ते, तेषु च ओजस्सञ्चारो जायते।[1]

शैशवादेव स्वामिचरणानामनुरागोऽदर्शि संस्कृतभाषायाम्। येन बाल्य एव स्वामिपादैर्मुग्धबोधव्याकरणं कानिचन स्तोत्राणि चाधिगतानि। भारतस्य दिशि दिशि प्रव्रजनकाले ते जयपुराधीशराजधानीपदमापेदिरे। तत्रासीत्कश्चन वैयाकरणः। स्वामिपादास्तच्छकाशात् पाणिनीयाष्टाध्यायीम्

[1]"Therefore the ideas must be taught in the language of the people; at the same time Sanskrit education must go on along with it, because the very sound of Sanskrit words gives a prestige and a power and a strength to the race." (Volume 3 - 290.2) The Complete Works of Swami Vivekananda – Published by Advaita Ashrama, 5 Dehi Entally Road, Calcutta - 14 in September 1992.

अध्येतुमुपचक्रमिरे। यावच्छक्यं सरलोपायेन विविधप्रकारेण च प्रथमसूत्रभाष्यं दिवसत्रयं यावत् ते स्वामिपादान् बोधयामासुः। परन्तु तैर्भाष्यविषये यद्भाषितं तत्सर्वमेव स्वामिपादसमक्षं दुरवबोध्यं प्रतिभातम्। तदा कृतप्रयत्नेनापि पण्डितेन तेनाकथि तुरीयेऽहनि “मच्छकाशात्पाठमधीत्य न कोऽपि लाभो भवेद् भवताम् ” इति। एतन्निशम्य निशाम्य च भाष्यावबोधे स्वदुरवस्थितिमात्मानं मन्वाना लज्जितं स्वामिपादाः प्रहरैकादनन्तरं तद्वैयाकरणसमीपं ययुः। ततः स्वामिपादैः क्रियमाणं प्राञ्जलव्याख्यानमाकर्ण्य स नूनमेव विस्मितिमवाप। तदनन्तरं खेतडिस्थानेऽवस्थानकाले स्वकीयज्ञानभाण्डं वर्धयितुकामाः स्वामिविवेकानन्दपादास्तत्परा आसन्। तेषु दिनेषु राजस्थानप्रदेशे वैयाकरणेषु मूर्ध्निभूतो वैयाकरण आसीन्नारायणदासाभिधो भक्तः कश्चन। स्वामिपादैस्तच्छकाशात् पाणिनीयव्याकरणस्य तथा पतञ्जलिप्रणीतमहाभाष्यस्यापि अध्ययनमारब्धम्। गतेषु केषुचिदहस्सु स्वामिपादैरध्ययनं समापितम्। नारायणदासमहाभागोऽपि पूर्वाधीतं विषयं छात्रसकाशाच्छ्रोतुमियेष। स्वामिपादा अधीतविषयाणां समुपस्थापनं प्राञ्जलव्याख्यया चक्रिरे, त्त्वचिच्च स्वमतमपि समुपस्थापितवन्तः। वस्तुतो गीर्वाणवाणीं प्रति स्वामपिपादानां गभीरानुरक्तिरेव तान् अष्टाध्यायीपाठे प्रचोदयामास।

योग्याश्रयाभावान्मन्दीभूतवेगा संस्कृतमन्दाकिनी स्वकीयं महीयस्त्वं निरन्तरमेव विजहत्यस्तीति प्रेक्ष्य स्वामिपादानां चेतो नितरामेवावसादमगमत्। अत एव संस्कृतभाषाया यावच्छक्यमातिशय्येन बाहुल्येन वा संरक्षणेऽनुशीलने सम्प्रसारणे च कृतोद्यमा आसन्। तथाहि केन भारतीया उपदिष्टाः संस्कृतशिक्षाया आध्यात्मिकसाधनायाश्च अवधीरणे? कुतः संस्कृतनिपुणा न भवन्ति भारतीयाः? किं निमित्तमर्थानां शतानि न विनियुज्यन्ते वितनितुं संस्कृतविद्यां सर्ववर्णेषु भारतीयानाम्– इत्येवम्प्रकारककठोरभणितिस्तेषां सुरभारती प्रति क्रमवर्धमाननैराश्यं जनानां दूरीकृत्य तानुद्बोधयति।[2] किञ्च, स्वामिपादानामान्तरिकप्रयास आसीद्यदियं भाषा भारतीयानामास्येषु

[2]“Why do you not become Sanskrit scholars? Why do you not spend millions to bring Sanskrit education to all the castes of India? That is the question. The moment you do these things, you are equal to the Brahmin. That is the secret of power in India.” (Volume 3 - 298.2) - C.W. of Sw. Vivekananda

मुखरतामियात्।

अत्रेदं विचारपदवीमधिरोहति यत्किमत्र कारणं यत्संस्कृतं भाषात्वेन परिगण्यमानमपि तदतिरिक्तमपि किञ्चिद् बोधयति इति चेदत्रोच्यते– यतो हि जगदुत्पत्तेरद्यावधि मानवजीवने परिदृश्यमानस्याभ्युदयप्रवाहस्य चारुचित्रं चित्रणीयं चेत् सुतरां संस्कृतमेवाधारीकृत्य तदालेख्यम् , गीर्वाणवाणीमेव समारूढो निखिलज्ञानमयोऽखिलधर्माधारो भगवान् वेदः प्रथमं प्रकाशं गतः, वेदार्थावबोधसहायकानि व्याकरणादीनि वेदाङ्गानि संस्कृतवाङ्मयविधृतानि, प्रवृत्तिनिवृत्तिबोधकानि वेदमबलकानि गृह्यसूत्रात्मकानि धर्मशास्त्राणि महाभारतादीनि च संस्कृतमाश्रित्यैव प्रवर्तितानि, धर्मादिपुरुषार्थचतुष्टयं तल्लाभोपायश्च सर्वप्रथमतया संस्कृत एव सन्निवेशितः, ऐहिकामुष्मिकविषयाणां प्राथम्येन परिचयः संस्कृतादेव लभ्यते, ब्रह्मचर्याद्याश्रमेषु निवसतां मनुजनूनामाश्रमावसाने जागतिकसर्ववस्तुसन्न्यासेनेहलोकादात्यन्तिकनिवृत्तिरित्येवं तत्त्वजातं संस्कृतेनैवोपदिष्टम् , जागतिकवस्तूनामापातरमणीयत्वेऽपि परिणामे परितापयुक्तत्वात् संसारोऽयं हेयकोटावन्तर्यातीत्यतस्त्रिविधदुःखस्यात्यन्तिकनिवृत्तिरूपोऽपवर्गो मोक्षो वा संसारदुःखमनुभवतां वैराग्यभाजां मुमुक्षूणामभीष्टश्चेत्संस्कृतनिबद्धं सांख्याद्यास्तिकदर्शनमभ्युपेयम् , काव्यरसपिपासूनां तृष्णाशमनार्थं कालिदासमाघादिमहाकवीनां जगत्प्रतिष्ठितानि महाकाव्यानि संस्कृतेनैव प्रणीतानि, एतद् व्यतीत्यापि कलाशास्त्रवैद्यकशास्त्रशिल्पशास्त्रादीन्यपि संस्कृतेनैव प्रथमतया प्रकाशितानि। तस्मादेव कारणाद् भारतात्मा अस्माभिर्ज्ञेयश्चेन्नूनं संस्कृतमेकशरणमिति स्वामिपादानामभिप्राय इति तद्वचनानुशीलनादवगम्यते।[3]

प्रागुक्ता विषया वस्तुतस्तु भारतीयसनातनपरम्पराया मूलीभूतानि वैशिष्ट्यानि। आ बहोः कालादेव तानि सर्वाण्येवैतिह्यानुक्रमेण वंशपरम्परया

---

[3]"Its religion, its philosophy, its history, its ethics, its politics were all inlaid in a flower-bed of poetic imagery–the miracle of language which was called Sanskrit or 'perfected', lending itself to expressing and manipulating them better than any other tongue. The aid of melodious numbers was invoked even to express the hard facts of mathematics." (Volume 6 - 158.2) - C.W. of Sw. Vivekananda

चानुशीलनात्तथा निरन्तराभ्यासादस्माभिः शोणितीकृतानि। वस्तुतः किं नाम संस्कृतिरिति चेद् वक्तुं शक्यते यत्किमपि समग्रामपि

मानवजातिमनर्थादपवार्याभीष्टार्थं नियोजयत्युत्तरोत्तरमुत्कृष्टां विदधाति, प्रपित्सितलक्ष्यञ्च प्रापयति तदेव संस्कृतिपदवाच्यत्वं बिभर्ति। तथाहि शुद्धसत्त्वैस्तपस्तप्यद्भिरस्मद्गोत्रमूलीभूतैः संयतेन्द्रियैः ऋषिभिरर्जितानि मानवजातेरुत्कर्षविधायकानि तत्त्वरत्नानि रत्नभाण्डारसमे अबाधितद्वारे संस्कृते इतस्ततो वितानि। प्रसङ्गेऽस्मिन् सङ्गृहीतपद्यमिदमुल्लिख्यते–

नैषा भाषा रत्नभाण्डारमेतच्-
छङ्के शास्त्रं कृत्स्नमाश्चर्यरत्नम्।
द्वारं मुक्तं नात्र दौवारिकोऽस्ति
कास्ते चिन्ता पान्थ कालः प्रयाति॥[4] इति।

इयमेव संस्कृतिर्या किल भारत्याः संस्कृताख्याया विभूत्या सृष्टिकालादेवोह्यमाना संस्कृतीतरापेक्षया सर्वातिशायित्वं भजते। ननु संस्कृतेतरा अपि भाषाः काव्यादिद्वारा तत्तन्मानवजातेर्वैशिष्ट्यख्यापनात्संस्कृतिवहा इति चेत्सत्यम्, तथापि संस्कृतमेव केवलमाहिमाचलकन्याकुमारिकापर्यन्तं वास्तव्यानां भिन्नाचारशीलानां भिन्नभाषाभाषिणां भिन्नाभिरुचिशीलानां भारतीयानां मध्ये संयोगसूत्रं साधयति, स्वोपज्ञतां विदधाति, ऐक्यानुभूतिञ्च कारयति। किं बहुना, प्रत्येकमपि भारतीये सुप्राचीनकालादेव यः सनातनधर्मानुगुणसमुदाचारः संस्कारश्चानुस्यूतः स संस्कृतमहिम्नैवेति विषये नास्ति कस्यापि विपश्चितो विप्रतिपत्तिः। अत एवैकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति न्यायेन संस्कृत-भारतीयसंस्कृत्योरन्यतरस्याख्याने एकोऽपरं नैयत्येन बोधयति।

संस्कृत-भारतीयसंस्कृत्योः सम्बन्धः शब्दार्थवदत्यन्तसम्पृक्तः। अथवोभयोर्मध्ये तादात्म्यलक्षणसम्बन्धः, यथाग्नितस्तद्दाहिकाशक्तिरभिन्ना तद्वत्संस्कृततो भारतीयसंस्कृतिरभिन्ना। यदेव संस्कृतं सैव संस्कृतिः, या च संस्कृतिस्तदेव संस्कृतम्। संस्कृतव्यतिरेकेण भारतीयसनातनसंस्कृतेः सत्ता कल्पयितुमेवाशक्या।

अतस्तानि वैशिष्ट्यानि ध्यायं ध्यायं कस्य न चेतसि ह्लादो जायेत, को वा

---

[4]पश्चिमवङ्गराष्ट्रियविश्वविद्यालयस्य संस्कृतविभागस्य पि.एच्.डि.प्रवेशपरीक्षायां(Research Entrance Test - RET) इमां कारिकामाश्रित्य अलङ्कारादिविषयकः प्रश्नः कृतः

न स्वान्तं श्लाघार्हमभिमन्येत? तस्मादेव कारणात् स्वामिविवेकानन्दपादैरुच्यते यद्भारतवर्षे सम्मानः संस्कृतञ्च सहगामिनी। यावदधिगता सुरभारती न कश्चन तावदुत्सहते कमपि प्रतिकुलयितुम्। एतन्नाम (संस्कृतनैपुण्यम्) अभ्युन्नते रहस्यम् , एतदेव शरणम्।[5]

बुद्ध-चैतन्य-कबीरादिभिर्महात्मभिस्तावद् वेदोपनिषद्धर्मशास्त्रादिषु निहितं तत्त्वमुपदिश्यावरजातिषु विद्यमानानां जनानामभ्युदयो व्यधायीति सत्यं, परन्तु तेन सह संस्कृतशिक्षापि सम्प्रचारणीयासीत् , यतो हि एतेनास्मच्छास्त्रगतविद्यया सह परिचयस्तेषां जातः किन्तु सा विद्या दृढसंस्काररूपेण मज्जासु अप्रविष्टा सती तेषाम् आत्मश्लाघामुद्बोधयितुं नालमभूत्। समधिगता विद्या यावन्न संस्कारमज्जादिक्रमेण परिणम्य संस्कृतिरूपतां लभते तावन्न तद्भावराशेर्भृशं प्राबल्यं सोढुं शक्नोति।[6]

